एषामेव चतुर्णां छन्दसां पादैः सर्वाणि छन्दांसि वर्तन्ते। नान्येषां पादाः सम्भवन्तीति[17] बह्वृचाः। तथा च लिङ्गं श्रूयते।[18] सप्तै[19]तानि वा सर्वाणि[20] छन्दांसि यान्येतानि विराट्चतुर्थानीति। तथा गायत्र्यत्रैष्टुभजागतैरेव त्रिभिः पादैश्छन्दांसि वर्तन्ते लघुमिश्रं वैराजेनेति छन्दोगाः। तत्रापि[21] निदर्शनानि तथोपपन्नानि भवन्ति[22]। त्रीणि छन्दांसि त्रीणि सवनानीति।[23] तथा गायत्रं जागतं त्रैष्टुभञ्चानुक्रमोक्तम्[24]—'एतद्वै यज्ञमापद्य छन्दांस्युपेयानि[25] इति। सम्यक्[26] आप्तिः समाप्तिरित्यर्थः। तथा सर्वाणि छन्दांस्येतस्यामिष्ट्यामनूच्यानीत्युक्त्वा तान्येव त्रीणि छन्दांसि सम्पादयति। तत्र—'तत्र त्रैष्टुभजागतौ पादौ आ दशाक्षरतायाः प्रतिक्रामतः। आ पञ्चदशाक्षरताया अभिक्रामतः आ अष्टादशाक्षरतायाः' (NS. I. 6) इति बह्वृचाः। 'गायत्र आ दशाक्षरताया अभिक्रामति। आ चतुरक्षरतायाः प्रतिक्रामति' (NS. Pp. I. 1, lines 5, 7, 8)।

पञ्चाक्षरो गुरुवृत्तिर्वैराजः पादः।[27] अथ किमिदं विराण्णाम छन्दः? न तावद्गायत्र्यादिभ्योऽन्यदस्ति। [10] अनुक्त[28]त्वादप्रसिद्धत्वाच्च। तर्हि तेष्वेवैतद् यथायोगमन्तर्भावयामः। या खलु त्रिपदा[29] विराट् साऽनुष्टुभमभिसम्पद्यते। संख्यासन्निकर्षात्। या चतुष्पदा सा पङ्क्तिः। या द्विपदैकपदा वा[30] ताश्च पंक्तिरेव।[31] कथं पुनर्द्विपदैकपदाः न्यूनसंख्याः[32] पंक्तिमभिसम्पद्येरन्? पादर्चा[33]र्धर्चजातीयकत्वात्।[34] आहुः। पादर्च[35]जातीयका ह्येकपदा पादेनैव समा स्यात्। अर्धर्चजातीयका द्विपदा अर्धर्चेनै-

(9) A: वृत्तिवृत्तमित्यभिधीयते। (10) M & S omit पादयोः (11) A & S omit पादस्य (12) A omits this sentence. (13) A : उपरि (14) M : मृग्यजुषस्य (15) A & S drop संख्या (16) A : अपवादाभावे (17) A & S : सन्तीति (18) M drops this sentence ; A reads तदा च etc. (19) A & M drop सप्त (20) A : वा एतानि ; M : वासव ; S : सप्तैतानि वासव (21) A & M : तथा (22) M & S drop तथोपपन्नानि भवन्ति (23) M drops this sentence. (24) A : नुपक्रम्योक्तम् (25) A : स्याप्नोति (26) All the Mss.drop सम्यक् (27) A drops पादः (28) A : दिभ्योऽन्यदस्तीत्युक्त (29) M : प्रपदा (30) M & S omit वा (31) A : पंक्तावेव (32) A & S : हि न संख्याः (33) M & S : पादार्धर्च (34) A : जातीयत्वात् (35) All the Mss : पादजातीयका

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व समा स्यात्। 'पादजातीयकत्वादेवैकपदानामध्यासवशाद्दाशतय्यामेकपदा' (Ṛ. Pr. XVII. 42. and Uvaṭa thereon) इति यास्क आचार्यः। यथाऽध्यासः—

वीहि स्वस्तिं सुक्षितिं दिवो
नृन्द्विषो अंहांसि दुरिता तरेम
ता तरेम तवावसा तरेम॥ RV. VI. 2. 11^{c-e}

'वसुं सूनुं सहसो जातवेदसं विप्रं न जातवेदसम्' (RV. I. 127. 1^{b}) इत्यादयो यमकाभासाः पादाः पूर्वस्या ऋचः पादा एव न पृथगृचः (Ṛ. Pr. XVII. 43)। एवमेकपदा अपि—'भद्रं नो अपि वातय' (RV. X. 20. 1^{a}) इति। एकं पदं विना स तु पृथगेवेति यास्को मन्यते (Ṛ. Pr. XVII. 43)

अन्ये तु अध्यासा अप्येकपदा[36] इति प्राहुः (Ṛ. Pr. XVII. 43)। तथा द्विपदानामर्धर्चजातीयकत्वादर्धर्चादिव द्विपदा अपि मध्य अनवसाय[37] पठन्ति।[38] पूर्वया चर्चाऽध्यासवदुपसमस्यानूच्यन्ते।[39] दृश्यन्ते[40] च द्विपदैकपदाः प्रातरनुवाकाश्विनशस्त्रयोः।[41] तस्मात् पादार्धर्चजातीयकाः। तेन[42] तैरेव समानसंख्याः स्युः न कृत्स्ना अर्धर्चाः। एतेन गायत्र्यादीनां द्विपदैकपदा व्याख्याताः॥

॥ ३ ॥ एकद्वित्रिचतुष्पादुक्तपादम् ॥ ७ ॥

गायत्र्यादीन्युक्तपादानि चत्वारि छन्दांसि स्वैः स्वैः पादैर्यथायोगमेकपाद्द्विपात्त्रिपा42^{a} चतुष्पादिति भवन्ति। तत्र गायत्र्यैकपदा[43] द्विपदा त्रिपदा वाऽष्टा [11] क्षरैः पादैर्भवन्ति। न चतुष्पदा संख्याधिक्यात्। त्रिष्टुब्जगत्यौ एकपदे द्विपदे चतुष्पदे च स्वैः स्वैः पादैर्भवतः[44]। न त्रिपदे संख्याहीनत्वात्। न पञ्चपदे संख्याधिक्यात्। विराट् चतुर्धाऽपि दशाक्षरैः पादैः भवन्ति।

तत्र गायत्र्यैकपदा[45]—'इन्द्रो विश्वस्य गोपतिः' (Ā. Śr. VIII. 2. 21) इति चतस्रः सूत्रे पठिताः।

अथ द्विपदा—'पवस्व सोम मन्दयन्निन्द्राय मधुमत्तमः' (RV. IX. 67. 16) इति तिस्रः।

अथ त्रिपदा—'अग्निमीळे पुरोहितम्' (RV. I. 1. 1^{a}) इत्येवमादयः। सामयोनिषु च—'अग्न आयाहि' (SV. I. 1^{a}) 'उच्चा ते जातमन्धसः' (SV. I. 467^{a}) इत्यादयः।

तथा जगत्यैकपदा—'मदन्ति देवीरमृता ऋतावृधः' (Ś. Br. III. 43. 22) इति।

अथ द्विपदा—'सनो वाजेष्वविता पुरूवसुः पुरःस्थाता मघवा वृत्रहा भुवत्' (RV.VIII.46.13) इति।

अथ चतुष्पदा—'युञ्जते मन उत युञ्जते धियः' (RV. V. 81. 1^{a}) इति। 'अभि प्रियाणि पवते चनोहितः' (RV. IX. 75. 1^{a}) इत्यादयश्च[46]। सामयोनिषु च 'विश्वा पृतना' इत्यादयश्च।[47]

(36) A : पादाः (37) A : मध्ये न वा साय ; M : अनवसानाः (38) M : सन्ति (39) A : अध्यासमदुपसमस्यानूच्यते (40) M : शंस्यन्ते (41) A : प्रातरनुवाकादौ (42) M drops तेन ; S : ते च (42a) All the Mss. drop त्रिपात् (43-45) A drops due to haplology (44) M drops पादैः (46) M : इत्यादि (46-47) M : omits.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ विराडेकपदा—'असिक्न्यां यजमानो न होता' (RV. IV. 17. 15) इति, 'सिषक्तु नः' (RV. V. 41. 20a) इति, 'उत देवाः (RV. X. 137. 1a) इति च।

अथ द्विपदा—'प्रति नः स्तोमं त्वष्टा जुषेत। स्यादस्मे अरमतिर्वसूयुः ॥ (RV. VII. 34. 21) इति वि द्वेषांसी नुहि वर्धयेलाम् (RV. VI. 10. 7a) इति, 'स्वायुधास इष्मिणः' (RV. VII. 56. 11a) इति च।

अथ त्रिपदा—'पिबा सोम-[12]-मिन्द्र मन्दतु त्वा' (RV. VII. 22. 1a) इति, 'प्रह्वे अग्ने दीदिहि पुरो नः' इति च।

अथ चतुष्पदा—'अयुज्यन्त इन्द्र विश्वकृष्टीः' (RV. I. 169. 2a) इति, 'स्वस्ति न इन्द्रो वृद्धश्रवाः' (RV. I. 89. 6a) इति च।

अथ त्रिष्टुदेकपदा—'आ वां सुम्ने वरिमन् सूरिभिः ष्याम्' (RV. VI. 63. 11a) इति।

अथ द्विपदा—'महि राधो विश्वजन्यं दधानान्। भरद्वाजान्त्साञ्जयो अभ्ययष्ट' (RV. VI. 47. 25) इति, 'अग्ने भव सुषमिधा समिद्धः' (RV. VII. 17. 1a) इति च सूक्तम्।

अथ चतुष्पदा—'जातवेदसे सुनवाम सोमम्' (RV. I. 99 1a) इत्यादयो दाशतयीषु सामयोनिषु च भूयिष्ठाश्चतुष्पदास्त्रिष्टुभः॥

॥ ३ ॥ आद्यं चतुष्पादृतुभिः ॥ ८ ॥

आद्यं छन्दो गायत्री चतुष्पाद्भवति ऋतुभिः षड्क्षरैः पादैः। तद्यथा—'इन्द्रः शचीपतिः बलेन व्रीलितः। दुश्च्यवनो वृषा समत्सु सासहिः॥' (Ṛ. Pr. XVI. 17) इति, 'पेटिलालकन्ते पेटाविटकन्ते। तत्र ककुवद्धस्तज्जगिध परेहि॥' (NS. I. p. 2, ll 21–22) इति॥

॥ ३ ॥ क्वचित्त्रिपादृषिभिः ॥ ९ ॥

॥ ३ ॥ सा पादनिचृत्[48] ॥ १० ॥

क्वचिद्गायत्री सप्ताक्षरैः पादैः[49] त्रिपदा भवति। सा पादनिचृदित्युच्यते। 'युवाकु हि शचीनाम्' (RV. I. 17. 4a) इति। क्वचिद्‌गायत्र्यष्टाक्षरै[50]स्त्रिपदाया गायत्र्या अनपवादाय।. नानल्पत्वात्[51]। 'भूयस्यो हि पादनिचृतो भवन्ति' (Ṛ. Pr. XVI. 21)। तथा हि—'इन्द्रः सहस्रदाव्नाम्' (RV. I. 17. 5a), 'अभी षु णः सखीनाम्' (RV. IV. 31. 3a), 'आ शर्म पर्वतानाम्'[52] (RV. VIII. 18. 16a), 'अस्माकं शिप्रिणीनाम्' (RV. I. 30 11a) 'इन्द्र इन्नो महानाम्' (RV. VIII. 92. 3a) 'य एकश्चर्षणीनाम्' (RV. I. 7. 9a) 'यो गर्भमोषधीनाम्' (RV. VII. 102. 2a) 'त्वं न इन्द्र वाजयुः'[53] (RV. VII. 31. 3a) इत्यादयः पादनिचृतः॥

(48) M : निवृत् ; SSp. निवृत् (49) A & S drop पादै : (50) A : अष्टकैः (51) A अनवादनल्पत्वात् (52) A omits this illustration (53) A omits the last four illustrations ; S omits the penultimate one.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

|| ३ || षट्कसप्तकयो[54]र्मध्येऽष्टावतिपादनिचृत् || ११ ||

षड्क्षरसप्ताक्षरयोर्मध्ये यद्यष्टाक्षरः पादः स्यात् साऽतिपादनिचृत्। यथा—

प्रेष्ठं वो अतिथिं
स्तुषे मित्रमिव प्रियम्।
अग्निं रथं न वेद्यम् ॥ (RV. VIII. 84. 1) इति,

तथा—

प्रेष्ठमु प्रियाणां
स्तुह्यासावातिथिम्।
अग्निं रथानां यमम् ॥ (RV. VIII. 103. 10) इति च।

अथ किमिदं वचनगौरवम् 'षट्कसप्तकयोर्मध्ये अष्टावतिपादनिचृत्' इति? षट्काष्टकसप्तका अतिपादनिचृदित्युक्तेऽपि निर्देश[55]क्रमात् क्रमः प्रतीयते। सत्यम्।[56] [13] एवं तर्हि[57] सूचयति—अविवक्षितोऽत्र निर्देशक्रम इति।[58] तथा वक्ष्यामः 'तृतीयं द्विपाज्जागतगायत्र्याभ्याम्' (P. 3/16) इत्यादिषु ॥[59]

|| ३ || द्वौ नवकौ षट्कश्च[60] नागी || १२ ||

द्वौ नवाक्षरौ पादौ एकः षडक्षरश्च स्यात् सा नागी नाम गायत्री। यथा—

ययोरिदं विश्वमेजति
तौ विद्वांसा हवामहे वाम्।
वीतं सोम्यं मधु ॥ इति वार्ष्यगययानाम्।[61] अस्मिन् सूत्रे

उत्तरादुत्तरस्मिंश्च निर्देशक्रमो विवक्षितः 'विपरीता वाराही' (3/13) इत्यादिलिङ्गात् ॥

|| ३ || विपरीता वाराही || १३ ||

षट्कः प्रथमः अन्यौ[62] नवकौ इति पूर्वविपरीता[63] वाराही नाम गायत्री।[64] यथा—

वीतं स्तुके स्तुके
युवमस्मासु नियच्छतम्।
प्र प्र यज्ञपतिं तिरतिम् ॥ (TA. III. 11. 20) इति।

'प्रप्र यज्ञपतिं तिर' इति पाठे नोदाहरणम् ॥

(54) A : सप्तषट्कयोर्मध्ये (55) M विनिर्देश (56) : M ; adds इदम् (57) A : अपि त्विदमेव (58-59) A omits. (60) M adds सा (61) A & S ; वार्ष्यगण्यानि (62) M & S : अन्त्यौ (63) M : पूर्वविपरीतौ (64) M omits गायत्री

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ३ ॥ षट्कसप्तकाष्टकैश्च[65] वर्धमाना ॥ १४ ॥

एभिर्पादैर्वर्धमाना नाम गायत्री। यथा—

ईशाना वार्याणां

क्षयन्तीश्चर्षणीनाम्।

अपो याचामि भेषजम् ॥[66] (RV. X. 9. 5) इति।

त्वमसि प्रशस्यो

विदथेषु सहन्त्यः।

अग्ने रथीरध्वराणाम्॥ (RV. VIII. 11. 2.) इति च।

'त्वमग्ने यज्ञानाम्' (RV. VI. 16. 1[a]) इति च बह्वृचानाम्[67] (R. Pr. XVI. 24, 25) ॥

॥ ३ ॥ विपरीता प्रतिष्ठा ॥ १५ ॥

अष्टकसप्तकषट्का[68] इति पूर्वविपरीता[69] प्रतिष्ठा नाम गायत्री। यथा—

आपः पृणीत भेषजं

वरूथं तन्वे मम।

ज्योक् च सूर्यं दृशे ॥[70] (RV. I. 23. 21) इति,

'त्वमग्ने व्रतपा असि' (RV. VIII. 11. 1[a]) इति च।

देवस्त्वा सविता मधु

प्रास्तां विश्वचर्षणीम्।

स्पत्येव नश्वरः॥ इति आह्वारशाखायाम्॥

॥ ३ ॥ तृतीयं द्विपाज्जागतगायत्राभ्याम् ॥ १६ ॥

क्वचिदित्यनुवर्तते। 'तृतीयम्' इति[6] गायत्र्या वसवः' (3/3) इति निर्देशापेक्षं विराट्छन्द [14] -सो ग्रहणम्। विराट् क्वचिद्दि पाद्भवति द्वादशाक्षराष्टाक्षराभ्याम्[71]। यथा—

रायस्कामो वज्रहस्तं सुदक्षिणम्।

पुत्रो न पितरं हुवे॥ (RV. VII. 32. 3) इति।

'ते[72] नो अर्वन्तो हवनश्रुतो हवम्' (VS.IX.17[a]) इत्यध्वर्युशाखायाम्।[73] 'गावो न यूथमुप यन्ति वध्रयः' (RV. VIII. 46. 30[a]) इति, 'इन्दुरिन्द्राय तोशते नि तोशते'[74] (RV. IX. 109. 22[a]) इति च। 'बभ्रुरेको विषुणः'[75] (RV. VIII. 29. 1[a]) इति च सूक्तम्।

(65) A : सप्तषट्काक्षरैर्वर्धमाना (66) A omits this illustration (67) A & S omit बह्वृचानाम् (68) M : षट्कैश्च (69) M : पूर्वविपरीतौ (70) A & S drop this illustration (71) A adds पादाभ्याम् (72-73) A omits (74) All the Mss. leave out नि तोशते (75) M & S quote the whole *ṛk*

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निर्देशक्रमस्याविवक्षितत्वाद्गायत्रजागताभ्यामपि स्यात्। यथा—'अग्ने त्वं नो अन्तम्' (RV. V. 24. 1[a]) इति सूक्तम्, 'आ याहि वनसा सह' (RV. X 172. 1[a]) इति सूक्तञ्च। 'अनुष्टुभाऽपि तृतीयम्'[76] (P. B. IV. 8. 9) इति निर्देशोपपत्तेः। 'अनुष्टुबेवा द्विपदा पंक्तिरेव' (NS.) इति छन्दोगाः।

क्वचित्तिष्टुब्गायत्राभ्याम्। यथा—'इमा नु कं भुवना सीषधाम' (RV. X. 157. 1[a]) इति। क्वचित्त्रैष्टुभनवकाभ्याम्। यथा—'पितुर्न पुत्रः सुभृतो दुरोण' (RV. VIII. 19. 27[a]) इति। क्वचिन्नवकचतुर्दशाभ्याम् जगती द्विपदा। यथा—'शं पदं मघं रयीषिणे' (SV. I. 441[a]) इति साम-योनिषु। क्वचित्त्रै[77]ष्टुभत्रयोदशकाभ्यां जगत्येव। यथा—'प्र व इन्द्राय वृत्रहन्तमाय' (SV. V. 446) इति। क्वचित्[78] षट्कदशकाभ्यां गायत्री—'विश्वस्य प्र स्तोभ' (SV. I. 450[a].) इति सामयोनिष्वेव।

क्वचिज्जागतवैराजाभ्यां जगती वा विराड् वा—'तिग्ममेको बिभर्ति हस्त आयुधम्' (RV. VIII. 29. 5[a]) इति। क्वचिद्वैराजत्रैष्टुभाभ्यां विराड् वा त्रिष्टुब्वा—'यज्ञञ्च नस्तन्वञ्च प्रजाञ्च' (RV. X. 157. 2[a]) इति द्वे। 'प्रिया वो नाम हुवे तुराणाम्' (RV. VII. 56. 10[a]) इति, अया वाजं देवहितं सनेम' (RV. VI. 17. 15[a]) इति च। यत्[79] पुनर्द्विपदैकपदा एतेषु चतुर्षु छन्दःसु न युज्यन्ते, तच्छन्दोऽन्तरमेव[80]। न च[81] कृत्स्नपादार्धर्चजातीयकम्। यथा—'नूनमथे त्वे कपर्दे' (RV. VIII. 46. 15[c]) इति।[82]

॥ ३ ॥ त्रिपात्त्रैष्टुभैः ॥ १७ ॥

तृतीयमित्यनुवर्तते क्वचिदिति च। त्रैष्टुभैः पादैः[83] क्वचिद्विराट् त्रिपदा भवति। यथा—'अग्निं नरो दीधितिभिररण्योः' (RV. VII. 1. 1[a]) इति। तथा 'पयः पृथिव्यां पय ओषधीषु' (TS. IV. 7. 12. 2[a]) इति,[84] 'या-[15]-भिरह्रं हज्जगतः प्रतिष्ठाम्' (Ā. Śr. V. 2 1[a]., TB. I. 2. 1. 4[a]) इति च। अनुष्टुब् वाऽसौ[85]॥

॥ ३ ॥ उष्णिग्गायत्रौ जागतश्च ॥ १८ ॥

गायत्रौ द्वौ जागतश्चैक उष्णिक्छन्दो भवति। अत्र विशेषः[86]—

॥ ३ ॥ ककुम्मध्ये चेदन्त्यः ॥ १९ ॥

योऽयमन्त्यो[87] जागतः पादः स गायत्रयोर्मध्ये चेत्[88] सा ककुभ् नामोष्णिक्। यथा—'प्र सो अग्ने तवोतिभिः' (RV. VIII. 19. 30[a]) इति। सामयोनिषु च 'प्र मंहिष्ठाय गायत' (SV. I. 107[a]) 'अभ्रातव्यो अना त्वम्' (SV. I. 399[a]) इत्यादयः॥

(76) M : आरभो वि तृतीयम (77) M adds द्विपदा (78) M adds सामयोनिषु (79) A : यः (79-80) S omits (81) A : तच्च (79-82) M omits (83) A drops पादैः (84) M drops इति (85) A omits this sentence. (86) A & S drop this sentence. (87) A : योऽयमन्त्यत्वेन निर्दिष्टः ; M : यो ग्मन्त्यो (88) M adds स्याद्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ३ ॥ पुर उष्णिक् पुरतः ॥ २० ॥

पुरतश्चेज्जागतः पादः[89] सा पुर उष्णिक्। यथा—

अप्स्वन्तरमृतमप्सु भेषजम्
अपामुत प्रशस्तये।
देवा भवत वाजिनः॥ (RV. I. 23. 19.)[90] इति॥

॥ ३ ॥ परोष्णिक् परतः ॥ २१ ॥

परत उपरिष्टाच्चेज्जागतः पादः सा परोष्णिक्[91]। यथा—[92] 'अग्ने वाजस्य गोमतः' (RV. I. 79. 4ª.) इति, '[93]त्वामग्ने मनीषिणः' (RV. III. 10.1ª) इति 'आ मित्रे वरुणे वयम्' (RV. V. 72. 1ª.) इत्यादीनि च सूक्तानि।[94] सामयोनिषु च—'पुरु त्वा दाश्वान् (=दाशिवान्) वोचे' (SV. I. 97ª.) 'इन्द्रमच्छ सुता इमे' (SV. I. 566ª.) इत्यादयः॥

॥ ३ ॥ चतुष्पादृषिभिः ॥ २२ ॥

सप्तकैः[95] पादैः चतुष्पादुष्णिग् भवति। यथा—नदं व ओदतीनाम्' (RV. VIII. 69. 2ª.)[96] इति, 'मंसीमहि त्वा वयम्' (RV. X. 26. 4ª.) इति च।

कथं पुनः—'प्र प्र वस्त्रिष्टुभमिषं' (RV. VIII. 69. 1ª), 'अर्चत प्रार्चत' (VIII. 69. 8ª) 'यो व्यतीँरफाणयत्' (VIII. 69. 13ª.) इति तृचामनुक्रम्य प्रज्ञाताऽनुष्टुभः शंसति'[97] (AiBr. XVI. 4.7.) इति ब्राह्मणम्? तेषु हि नदं व ओ-[16] दतीनाम्' इति पठ्यते। पादसाद्दश्यादयं गुणवादः। तथा च रहस्यब्राह्मणे दर्शितम्—'नदं व ओदतीनामित्युष्णिगक्षरैर्भवेदनुष्टुप्पादैः' (AiĀr. I. 3. 8) इति॥ (vide Ṛ. Pr. XVI. 32.)

॥ ३ ॥ अनुष्टुब्गायत्रैः ॥ २३ ॥

चतुष्पादित्यनुवर्तते। अनुष्टुबष्टकै[98]श्चतुष्पदा भवति। यथा—'त्रियम्बकं यजामहे' (RV. VII. 59. 12ª.) इति, 'गायन्ति त्वा गायत्रिणः' (RV. I. 10. 1ª.) इत्यादीनि च सूक्तानि। सामयोनिषु च—'विशो विशो वो अतिथिम्' (SV. I. 87ª.), 'पुरोजिती वो अन्धसः' (SV. I. 545ª.) इत्यादयश्चानुष्टुभः॥

(89) M adds स्यात् (90) A quotes only the first *pāda*. (91) A adds इत्युच्यते (92) All the Mss. quote here प्र होत्रे पूर्व्यं वचः as an extra illustration (93-4) A omits (94) M: वक्तानि (95) A : सप्तभिः (96) M quotes the second *pāda* too. (97) A सन्ततो (98) A drops अनुष्टुप् and पादैः; S drops पादैः; M: अष्टाक्षरैः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ३ ॥ त्रिपात् क्वचिज्जागताभ्याञ्च[99] ॥ २४ ॥

जागताभ्यां पादाभ्यां, 'च'-काराद्गायत्रेण चैकेन त्रिपदा चानुष्टुप्[100]। यथा—"मा कस्मै धातमभ्यमित्रिणे नः" (RV. I. 120. 8[a].) इति। 'तामेतां कृतिः' (Ṛ. Pr. XVI. 38) इति बह्वृचाः॥

॥ ३ ॥ मध्येऽन्ते[101] च ॥ २५ ॥

एतौ जागतौ पादौ मध्ये चान्ते च स्यातां गायत्रस्त्वादाविति त्रिपाद्भवति। किमर्थमिदं प्राप्तमेवं[102] निर्देशक्रमस्याविवक्षात्? सत्यम्। आद्यन्तयोर्जागतौ मा भूतामिति नियमार्थोऽयं योगः। तथात्वे तु पिपीलिकामध्या स्यादिति वक्ष्यति।

ननु चात्रोक्तस्यापि पिपीलिकामध्यत्वमविरुद्धम्। तस्य सर्ववर्ण[103]च्छन्दोविषयत्वात्। तर्हीदमेव सूचकम्[104]। न[105] पूर्वोक्तार्थविषये[106] उत्तरयोग इति। तेनेह द्वयोस्तुल्यबलयोर्लक्षणयोः प्राप्तयोः[107]पूर्वं बलवत्। यथा शङ्कुमत्यादिषु[108] सूत्रोदाहरणम्[109]—

यास्ते अग्ने सूर्ये रुच
उद्यतो दिवमातन्वन्ति रश्मिभिः।
ताभिः सर्वाभी रुचे जनाय नस्कृधि॥[110] (TS. IV. 2. 9. 4.) इति॥

॥ ३ ॥ बृहती जागतस्त्रयश्च गायत्राः ॥ २६ ॥

जागतः पाद एकस्त्रयश्च गायत्राः बृहती नाम[111] छन्दः।[112] 'त्रयः' [17] इति ग्रहणं षडक्षरपादाश्चत्वारो मा भुवन्निति[113]। तेऽपि हि गायत्रा भवन्ति। गायत्रपादह्रासरूपत्वात्।[114] गायत्रपादा हि विकाररूपा, इति विकारपादानां सद्भावः सूचितो भवति।[115] तत्र विशेषः —

॥ ३ ॥ पथ्या पूर्वश्चेत्तृतीयः ॥ २७ ॥

योऽयं पूर्वोक्तो[116] जागतस्तृतीयश्चेत् पथ्या नाम बृहती[117]—'ऊर्ध्व ऊ षु ण ऊतये[118] (RV. I. 36. 13[a].) इति, 'कदा चन स्तरीरसि' (RV. VIII. 51. 7[a].) इति [119]। 'अयं तेऽस्तु हर्यतः' (RV. III. 44. 1[a].) इति सूक्ते[120]। सामयोनिषु च—'यज्ञा यज्ञा वो अग्नये' (SV. I. 35[a].) इति, 'अभि त्वा शूर नोनुमः' (SV. I. 233[a].) इत्यादयश्च। एषैव[121] प्रायेण प्रगाथेषु पूर्वा[122] भवति॥

(99) A omits क्वचित् (100) A adds भवति (101) A : अन्त्ये (102) A & M : प्राप्तमेव (103) A omits वर्ण (104) M : सूचितम् (105) A drops न (106) A : पूर्वमनुक्तार्थविषये (107) A & M : प्राप्तौ (108) A drops शङ्कुमत्यादिषु (109) A adds तु (110) A quotes only the first *pāda*. (111) M & S drop नाम (112) A & M add भवति (113) M adds दर्शयितुम् (114-115) A drops this line. (116) A : पूर्वनिर्दिष्टः (117) A reads : जागतः पादः सोऽयं पथ्या नाम बृहतीति वेदितव्या (118) M drops ऊतये (119-120) A drops. (120) M : सूक्तानि (121) A : एष वै (122) M & S . पूर्वप्रगाथेषु ; A : प्रगाथे पूर्वा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ३ ॥ न्यङ्कुसारिणी द्वितीयः ॥ २८ ॥

स एव जागतो[124] द्वितीयश्चेत् न्यङ्कुसारिणी नाम बृहती[125]—

मत्स्यपायि ते महः
पात्रस्येव हरिवो मत्सरो मदः ।
वृषा ते वृष्ण इन्दुः
वाजी सहस्रसातमः ॥[126] (RV. I. 175. 1) इति ॥

॥ ३ ॥ स्कन्धोग्रीवी क्रौष्टुकेः[127] ॥ २९ ॥

एषैव स्कन्धोग्रीवी क्रौष्टुकेराचार्यस्य मतेन ॥

॥ ३ ॥ उरोबृहती यास्कस्य ॥ ३० ॥

एषैवोरोबृहती यास्कस्याचार्यस्य मतेन ॥

॥ ३ ॥ उपरिष्टाद्बृहत्यन्ते ॥ ३१ ॥

जागत एव पादोऽन्ते चेदुपरिष्टाद्बृहती[128]—

यदर्जुन सारमेय
दतः पिशङ्ग यच्छसे ।
वीव भ्राजन्त ऋष्टय
उप स्रक्वेषु बप्सतो नि षु स्वप ॥[129] (RV. VII. 55. 2) इति, 'न तमंहो न दुरितम्' (RV. X. 126. 1*a*.) इति च सूक्तं त्रिष्टुबन्तम् ॥

॥ ३ ॥ पुरस्ताद्बृहती पुरः ॥ ३२ ॥

[18] जागत एव पादः पुरत[130]श्चेत् पुरस्ताद्बृहती—

महो यस्पतिः शवसो असाम्या
महो नृम्णस्य तूतुजिः ।
भर्ता वज्रस्य धृष्णोः
पिता पुत्रमिव प्रियम् ॥[131] (RV. X. 22. 3.) इति ॥

॥ ३ ॥ क्वचिन्नवकाश्चत्वारः ॥ ३३

क्वचिन्नवाक्षरै[132]श्चतुर्भिः पादैः बृहती भवति—'उपेदमुपपर्चनम्' (RV. VI. 28. 8*a*.) इति ।

(124) A adds पादः (125) M : भवति instead of नाम बृहती (126) A quotes only the first *pāda* (127) A : क्रौष्टुकः M : क्रौष्टुकेः (128) A adds नाम भवति (129) A quotes only the first *pāda*. (130) A adds प्रथमतः (131) A quotes only the first *pāda*. (132) A & M नवकाक्षरैः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अनुष्टुबियमृगिति[133] बह्वृचाः (*vide* Ṛ. Pr. XVIII. 21.)। तं त्वा वयं पितो वचोभिः' (RV. I. 187. 11ª.) इति च, 'उभावग्नी उपस्तृणते' (TB. III. 7. 4. 18ª.) इति च ॥

॥ ३ ॥ वैराजौ[134] गायत्रौ च ॥ ३४ ॥

क्वचिदित्यनुवर्तते। वैराजौ द्वौ पादौ गायत्रौ च द्वौ क्वचिद्बृहती भवति—

द्यौस्ते पृष्ठं पृथिवी सधस्थम्

आत्माऽन्तरिक्षं समुद्रो योनिः।

विख्याय चक्षुषा त्वम् -

अभि तिष्ठ पृतन्यतः ॥ (VS. XI. 20.) इति वाजसनेयके।

निर्देशक्रमस्याविवक्षितत्वात् पूर्वौ[135] गायत्रौ परौ नु वैराजौ [136] 'या ते रुद्र शिवा तनुः [137] (TS. IV. 5. 1. 1ª) इति तैत्तरीयके।

अथ मध्ये[138] वैराजौ अभितो गायत्रौ—'युवं ह्यास्तं महो रन्' (RV. I. 120. 7ª.) इति। इमां विष्टारबृहतीति बहवृचाः (Ṛ. Pr. XVI. 49)। अथ मध्ये गायत्रौ अभितो वैराजौ—'इन्द्राणीवाविधवा भूयासम्' (TB. III. 7.5. 10ª) इति ॥

॥ ३ ॥ त्रिभिर्जागतैर्महाबृहती ॥ ३५ ॥

त्रिभिर्जागतैः पादैर्महाबृहती [139]—

अजीजनो अमृत मर्त्येष्वाँ

ऋतस्य धर्मन्नमृतस्य चारुणः।

सदासरो वाजमच्छा सनिष्यदत् ॥ [140] (RV. IX. 110.4) इति, पराश्च तिस्रः 'अभ्यभि हि श्रवसा' (RV. IX. 110.5ª) इति, 'दिवः पीयूषं पूर्व्यं यदुक्थ्यम्' (IX. 110.8ª) इति पञ्चर्चश्च [141] ॥

॥ ३ ॥ सतोबृहती ताण्डिनः[142] ॥ ३६ ॥

एवैव सतोबृहती ताण्डिन आचार्यस्य मतेन। 'बार्हतमपि तृचं सतो—[19] बृहत्य इत्येवाचक्षते' (NS. I. 2. 1. 41) इति छन्दोगाः। तथा च ब्राह्मणम्—'वयं घ त्वा सुतावन्तः' (PB. XII. 4. 3.ª) इति सतोबृहती ॥

(133) A : इयमेवानुष्टुबिति ; M : अनुष्टुबिदमृगिति (134) M adds द्वौ (135) A & M add पादौ (136) A drops नु ; M : परन्निवैराजौ (137) All the Mss. quote another word अघोरा (138) M drops अथ मध्ये (139) A omits the sentence ; (140) A quotes only the first *pāda*, and omits the rest of the *bhāṣya* (141) M reads 'पञ्चर्चश्च' after अभ्यभि हि ; S omits the last illustration. (142) A omits this *sūtra* along with the *bhāṣya* on it.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ३ ॥ पंक्तिर्जागतौ गायत्रौ ॥ ३७ ॥

जागतौ[143] पादौ गायत्रौ च[144] पंक्तिच्छन्दः। तत्र विशेषः—

॥ ३ ॥ पूर्वौ चेदयुजौ सतःपंक्तिः ॥ ३८ ॥

याविमौ पूर्वनिर्दिष्टौ[145] जागतौ तावयुजौ प्रथमतृतीयौ चेत् सतःपंक्तिर्नाम पंक्तिः[146]—'ओजिष्ठं ते मध्यतो मेद उद्भृतम्' (RV. III. 21. 5^{a}.) इति 'इरज्यन्नग्ने प्रथयस्व जन्तुभिः' (RV. X. 140. 4^{a}.) इति, 'य उस्रिया अप्या अन्तरश्मनः'[147] (RV. X. 108. 6^{a}.) इति च। एताः[148] सतोबृहतीति बह्वृचाः (R. Pr. XVI. 57)। तथा च वालखिल्यानधिकृत्य ब्राह्मणम् (Ai.B.) 'ते हैके सह बृहत्यौ सह सतोबृहत्यौ व्याहरन्ति' इति। 'एतां सिद्धविष्टारबृहतीति[149] छन्दोगाः (NS. I.)

एषैव प्रायेण प्रगाथानामुत्तरा भवति॥

॥ ३ ॥ विपरीतौ[150] च ॥ ३९ ॥

सतः पंक्तेर्विपरीता च पंक्तिर्भवति। तेन गायत्रावयुजौ जागतौ च युजौ चेत् पंक्तिर्भवति। संज्ञा[151] विपरीतेत्येव। यथा—

य ऋष्वः श्रावयत्सखा
विश्वेत् स वेद जनिमा पुरुष्टुतः।
तं विश्वे मानुषा युगा
इन्द्रं हवन्ते तविषं यतस्रुचः॥ (RV. VIII. 46. 12.) इति॥

॥ ३ ॥ आस्तारपंक्तिः परतः ॥ ४० ॥

तावेव जागतौ पादौ परतः परस्तात्[152] स्याताम् आद्यौ च गायत्रौ चेदास्तारपंक्तिः। यथा—

विभ्राजञ्ज्योतिषा स्व-
रगच्छो रोचनं दिवः।
येनेमा विश्वा भुवनान्याभृता
विश्वकर्मणा विश्वदेव्यावता॥ (RV. X. 170. 4) इति, 'असौ यस्ताम्रोऽरुणः' (TS. IV. 5. 1. 7^{a}.) इति, 'अग्निं न स्ववृक्तिभिः' (RV. X. 21. 1^{a}.) इति च [153] सूक्तम्। 'इन्द्र सोममिमं पिब' (RV. X. 24 1^{a}.) इति च द्वे सूक्ते॥ [154]

(143) M adds द्वौ (144) A & M omit च and have द्वौ instead. (145) A : पूर्वौ निर्दिष्टौ (146) A adds भवति (147) M omits this illustration. (148) A : एतां ; M : एतौ (149) M : सिद्धां विष्टारपंक्तिरिति (150) A does not read it as a *sūtra* ; A reads विपरीता (151) M & S : संख्या (152) M : पुरस्तात् (153-154) A omits ; S omits द्वे सूक्ते

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ३ ॥ प्रस्तारपंक्तिः पुरतः ॥ ४१ ॥

[20] पुरतश्चे[155]ज्जागतौ परतः गायत्रौ प्रस्तारपंक्तिः। यथा—'उच्छ्वञ्चस्व पृथिवि मा निबाधथाः' (RV. X. 18. 11^{a}.) इति, 'आ विद्युन्मद्भिः मरुतः स्वर्कैः' (RV. I. 88. 1^{a}.) इत्यादयश्च ॥

॥ ३ ॥ विष्टार[156]पंक्तिरन्तः ॥ ४२ ॥

अन्तो मध्यश्चेज्जागतौ अभितो गायत्रौ विष्टारपंक्तिः। यथा—'अग्ने तव श्रवो वयः' (RV. X. 140. 1^{a}.) इति ॥

॥ ३ ॥ संस्तार[157]पंक्तिर्बहिः ॥ ४३ ॥

यदि बहिरादितोऽन्ततश्च जागतौ मध्ये गायत्रौ[158] संस्तारपंक्तिः। यथा—'पितुभृतो न तन्तुमित् सुदानवः' [RV. X. 172. 3^{a}(2^{a})] इति।

॥ ३ ॥ अक्षरपंक्तिः पञ्चकाश्चत्वारः ॥ ४४ ॥

पञ्चाक्षराः पादाश्चत्वारश्चेदक्षरपंक्तिः। यथा—'परि प्र धन्वेन्द्राय सोम' (RV. IX. 109. 1^{a}) इति सूक्तम्। 'पश्वा न तायुं गुहा चतन्तम्' (RV. I. 65. 1^{ab}) इति षट् सूक्तानि। 'क ईं व्यक्ता नरः सनीला' (RV. VII. 56. 1^{ab}.) इति नवर्चः, 'प्र शुक्रैतु देवी मनीषा' (RV. VII. 34. 1^{ab}.) इत्यत्र[159] विंशतिः।

कथं पुनः 'प्र शुक्रैतु देवी मनीषेति वैश्वदेवमित्युपक्रम्य ता उ विच्छन्दः सन्ति द्विपदा' (Tan. B. I. 2. 9.) इति ब्राह्मणम्? 'द्विपदा एवैते' (R. Pr. XVIII) इति बह्वृचाः। तथा च—द्विपदा इव मध्येऽनवसाय पठन्ति[161]। चतुष्पदास्वेव छन्दोगाः पठन्ति ब्राह्मणञ्च (P. B. XIV. 5. 6)। 'प्र वाज्यक्षाः' (SV. II. 510^{a}) इत्यक्षरपंक्तिरिति। 'पवस्व सोम महान् समुद्रः' (RV. IX. 109. 4^{ab}) इत्यक्षरपंक्तिरिति च ॥

॥ ३ ॥ द्वावप्यल्पशः ॥ ४५ ॥

अक्षरपंक्तेरेवाल्पमल्पं क्षीयमाणमल्पेन परिमाणेन द्वौ पञ्चाक्षरौ पादौ भवतः। 'अल्पशः' इति वचनात् त्रिपदाऽपि[162] भवति। तत्र त्रिपदा—

भगो न चित्रो
अग्निर्महोनाम्।
दधाति रत्नम् ॥ (SV. I. 449.) इति। [21] अथ

(155) A adds प्रथमतः (156) M : विस्तार° (157) A : प्रस्तार° (158) A adds चेत् (159-160) M omits. S omits from कथं...(161) A : पंक्ति (162) M : त्रिपदी भवति ; S : त्रिपद्यपि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्विपदा—

एवा ह्येव ।

एवा ह्यग्ने ।

एवा हि वायो ।

एवा हीन्द्र ।

एवा हि पूषन् ।

एवा हि देवाः ॥ (TA. I. 20. 1.) इति । एवमन्यान्यपि बह्वृचानां पुरीषपदानि । 'अपि' शब्दादेकपदाऽपि भवति—'अंशुर्न शोचिः' (*Mahānāmnyaḥ* 5.) इति, 'ईशे हि शक्रः' (AA. IV. 8)[163] इत्यादयश्च ॥

॥ ३ ॥ पदपंक्तिः पञ्च ॥ ४६ ॥

पञ्चाक्षरा पञ्चपदा पदपंक्तिः । यथा—

इन्द्र जुषस्व

आयाहि शूर ।

पिबा सुतस्य

मध्वश्चकानः

चारुर्मदाय ॥ (SV. II. 302.) तथा—

इन्द्र जठरं

पृणस्व मधोः ।

अस्य सुतस्य[164]

उप त्वा मदाः

सुवाचो अस्थुः ॥ (*Ibid* 303) तथा—

इन्द्रस्तुराषाट्

जघान वृत्रम् ।

विभेद वलं [165]

ससाहे शत्रून्

मदे सोमस्य ॥ इति (*Ibid* 304)

एवमेतत्तृचमध्येषु त्रिपादेषु[166] त्रीणि त्रीण्युपसर्गाक्षराणि, न तु स्वानि इति ब्राह्मणवादेभ्यः । तथा हि—'चतुस्त्रिंशदक्षराः संस्तुतो[167] भवति' (P. B. XII. 13.24) इति स्वतश्चतुस्त्रिंशदक्षरत्वं[168] नास्तीति सूचयति । 'कनीयांसि वेदेषु छन्दांस्यासन् इत्युपक्रम्यानुष्टुभमभिसम्पादयन्ति' इति प्रकृत्या

(163) M adds an इति here (164-165) A leaves out the last two feet of the melody (166) M : एवमेतत्तृच आद्येषु त्रिषु त्रिषु (167) A : संस्तुता ; M : संस्कृता ; S संस्तुताः (168) A : चतुस्त्रिंशदक्षरं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[169]नानुष्टुबिति दर्शयति। तथा—'द्वे वा अक्षरे अतिरिच्येते षोडशिनोऽनुष्टुभमभिसम्पन्नस्य इति। तदेव सूचयति।[170]

अपि चाथर्वणिका अनुष्टुप्सृष्टमे[171]वैतत् सूक्तमधीयते[172]। एतेनानुरूपस्तृचो व्याख्यातः।[173] अस्यान्त्यामृचं बह्वृचा अपि अनुष्टुप्सृष्टामधीयते।[174] सामयोनिषु च संख्या[175]प्रकर्षोऽपीष्यते विराट्स्थानासु विराड्रूपासु च—'साधुर्न गृध्नुरस्तेव शूरः' (RV. I. 70. 11^{ab}) इति। सा च स्यादक्षरपंक्तिः॥[176]

[22] ॥ ३ ॥ चतुष्कषट्कौ त्रयश्च ॥ ४७ ॥

'पञ्च'[177] इत्यनुवर्तते। चतुरक्षरषडक्षरश्चेति द्वौ पादौ त्रयश्च पञ्चाक्षराः स्युः सा पदपंक्तिः। 'अग्ने तमद्याऽश्वं न स्तोमैः' (RV. IV. 10. 1^{ab}.) इति तिस्रः[178]। आ प्रथमाया आद्यास्त्रयः[179] पञ्चकाश्चतुर्थश्चतुष्कः पञ्चमः षट्क इति। बह्वृचास्त्वाहुः 'आद्याश्चत्वारः पञ्चकाः पञ्चमषट्क इति भुरिक् पदपंक्तिर्भवति' (R. Pr. XVI. 19.) इति। तद्यथा—'अधा ह्यग्ने क्रतोर्भद्रस्य' (RV. IV. 10. 2^{ab}) इति तिस्रः,[180] 'घृतं न पूतम्' (RV. IV. 10. 6^{a}) इति च। 'चतुष्कषट्कौ' इति योगविभागेन[181] अक्षरपंक्तिष्वपि योज्यम्।[182] तथा हि—'वि यो वीरुत्सु रोधन् महित्वा' (RV. I. 67. 9^{ab}) इति। पदपंक्तिष्वपि अक्षरपंक्तिप्रवादो दृश्यते'—बृहतीरुष्णिहाः पंक्तिरक्षरपंक्तिरिति। विरूपाणि छन्दांसीति पदपंक्तिप्रवादो दृश्यते। पदपंक्तिरूपदधातीति। 'पदपंक्त्यो गायत्रीविशेषाः संख्या[183]सन्निकर्षात्' इति बह्वृचाः। पंक्ति[184]विशेषा एव ब्राह्मणवादेभ्य इत्याचार्याः। तथा च ब्राह्मणवादः—'पङ्क्त्यौ याज्यानुवाक्या भवन्ति पंक्ती याज्यानुवाक्ये भवतः। पञ्चाक्षरा पंक्तिः—"अग्ने तमद्य" (RV. IV. 10. 1^{a}) इति।' पंक्त्या[185] जुहोतीति-संख्याविकर्षो[186]ऽपीष्यते विराट्स्थानासु विराड्रूपासु च॥[187]

॥ ३ ॥ पथ्या पञ्चभिर्गायत्रैः ॥ ४८ ॥

पञ्चभिर्गायत्रैः पादैर्पथ्या नाम पंक्तिः[188]। 'अक्षन्नमीमदन्त हि' (RV. I. 82. 2^{a}) इति, 'यच्चिद्धि सत्य सोमपाः' (RV. I. 29. 1^{a}) इत्यादि सूक्तञ्च।[189] सामयोनिषु च—'स्वादोरित्था विषूवतः' (SV. I. 409^{a}.), 'आ ते अग्न ऋचा हविः' (SV. II. 373^{a}.) इति च॥[190]

॥ ३ ॥ जगती षड्भिः ॥ ४९ ॥

गायत्रैरित्यनुवर्तते। षड्भिर्गायत्रैः पादैः जगतीच्छन्दो[192] भवति। [23] 'अव द्रके अव त्रिका' (RV. X. 59. 9^{a}.) इति, 'असौ योऽवसर्पति नीलग्रीवो विलोहितः' (VS. XVI. 7^{ab}.) इति च।

(169) A : प्रकृत्यानुष्टुबिति (170) A : सूचितम् (171) M : अनुपसृष्टम् (172) A & M : अभिधीयते (173) M : व्याप्यः ; S : व्याख्यः (174-75) M : अनुपसृष्टामधीयते ; A : अनुपसृष्टामधीयन्ते (176) A reads as a sūtra सा च चतुष्पत्त्वक्षरपंक्तिः (177) All the Mss. : पञ्चका (178) A Omits तिस्रः (179) A : अत्रान्ये त्रयः (180 M cites : आभिष्टे अद्य इति, and omits तिस्रः (181) M : विभागेन ; S : विभागात् (182) M : युज्यते ; S : योगः। (183) A : संस्था (184) A : पदपंक्तिविशेषा (185) M : पदपंक्तौ (186) M & S भेदः (186-87) M omits (188) A adds भवति (189) M : इत्यादीनि सूक्तानि (190) M : इत्यादयः (192) A : जगती नाम पंक्तिः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'एजतु दशमास्यो गर्भो जरायुणा सह' (VS. VIII. 28^{ab}.) इति च। 'उभे यदिन्द्र रोदसी' (RV. X. 134. 1^{a}.) इति च सूक्तपंक्त्यन्तम्। तत्र जगत्याम् 'अष्टकौ सप्तकः षट्को दशको नवकश्च वा' (R. Pr. XVI. 76.) सन्ति पादाः। ते द्वे अपि महापंक्तिर्नाम जगतीति[193] बह्वृचाः॥

॥ ३ ॥ एकेन त्रिष्टुव् ज्योतिष्मती ॥ ५० ॥

व्याख्यातास्तिस्रस्त्रिष्टुभः। 'एकद्वित्रिचतुष्पादुक्तपादम् (loc cit. 3/7) इत्यत्र एकपदा द्विपदा त्रिपदा[194] चतुष्पदा चेति। तासां चतुष्पदा त्रिष्टुविति परामृश्यते। 'मध्ये ज्योतिर्मध्यमेन' (P.3/53) इति वाक्यशेषलिङ्गाच्चतुष्पदा त्रिष्टुबेकेन गायत्रेण पादेन स्वैश्च[195] त्रिभिर्ज्योतिष्मती नाम[196] भवति॥

॥ ३ ॥ तथा जगती ॥ ५१ ॥

तथा जगत्यपि[197] चतुष्पदा गायत्रेणैकेनैव स्वैश्च त्रिभिर्ज्योतिष्मती नाम[198]भवति। तत्र विशेषः—

॥ ३ ॥ पुरस्ताज्ज्योतिः प्रथमेन ॥ ५२ ॥

प्रथमेन गायत्रेणो[199]त्तरैश्च स्वैः[200] पुरस्ताज्ज्योति[201]र्नाम त्रिष्टुप् तथा जगती।[202] तत्र त्रिष्टुप्[203] —'आ ते मह इन्द्रोऽत्युग्र' (RV. VII. 25. 1^{a}.), 'क्रीडन्नो रश्म आ भुवः'[204] (RV. V. 19. 5^{a}.) इति च। अथ जगती[205]—

स्तुतं शस्त्रं प्रतिगरं
ग्रहमिडामाशिष आ वृञ्जे सुवः।
पत्नीसंयाजा चानुप ते हुवे
स वाहं समिष्टयजुराददे॥ इति चेति (T. S. VII. 3. 11. 2)॥

(193) A drops नाम जगती (194) M & S drop त्रिपदा (195) A : स्वकीयैश्च (196) A reads : त्रिभिः पादैः ज्योतिष्मती त्रिष्टुबिति (197) A : जगत्यामपि (198) A : ज्योतिष्मती जगतीति (199) A adds पादेन (200) A reads : उत्तरैः स्वकीयैश्च त्रिभिः (201-2) A reads : ज्ज्योतिस्त्रिष्टुब् भवति। तथैव ज्योतिर्जगती भवति। (203) A reads : तत्र पुरस्ताज्ज्योतिस्त्रिष्टुबुदाहरणम् ; S : अथ त्रिष्टुभि (204) M cites the entire ṛk. (205) A cites another ṛk : इमे त इन्द्र ते वयं (RV. I. 57.4) in toto.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ३ ॥ मध्येज्योतिर्मध्यमेन ॥ ५३ ॥

मध्यमेन[206] गायत्रेण[207]मितः स्वैः पादैर्मध्येज्योतिर्नाम त्रिष्टुप् तथा जगती[208]। तत्र त्रिष्टुप्— 'एतत् त्यन्न योजनमचेति सस्वर्ह यत्' (RV. I. 88.5) इति[209]। अथ जगती—

तदश्विना भिषजा रुद्रवर्तनी
सरस्वती वयति पेशो अन्तरम् ।
अस्थिमज्जानं मासरैः
कारोत्तरेण दधतो गवां त्वचि ।[210] (VS. XIX 82) इति ।

यद्वा—'यज्ञं मनवे संमिमिक्षथुः' (RV. VIII. 10. 2^{a}.) इति[211] च। 'ताभिरायातं वृषणोप मे हवम्' (RV. VIII. 22. 12^{a}.) इति च ॥

॥ ३ ॥ उपरिष्टाज्ज्योतिरन्त्येन ॥ ५४ ॥

अन्त्येन गायत्रेण पूर्वैश्च स्वैरुपरिष्टाज्ज्योतिर्नाम त्रिष्टुप् तथा जगती। तत्र तिष्टुप्[212]—'तुभ्यं श्चोतन्त्यध्रिगो शचीवः[213] स्तोकासो अग्ने मेदसो घृतस्य' (RV. III. 21. 4^{ab}.) इति। अथ जगती[214] —ऋतावानं महिषं विश्वदर्शतम्' (RV. X. 140. 6^{a}.), 'अग्निनेन्द्रेण वरुणेन विष्णुना' (RV. VIII. 35. 1.^{a}.) इति सूक्तम्, 'अग्नेर्मन्वे प्रथमस्य प्रचेतसः' (AV. IV. 23. 1^{a}.) इति चानुवाकः।

'प्रायेण त्रिष्टुब् ज्योतिष्मत् विराड्रूपा' (Uvaṭa on R. Pr. XVI. 69.) इत्याहुः बह्वृचाः। तथा—'नवकौ द्वौ वैराजत्रिष्टुभौ च विराट्स्थाना ह नाम' (R. Pr. XVI. 67, adapted) इत्यत्र[215] त्रिष्टुबित्याहुः। यथा—'श्रुधी हवमिन्द्र मा रिषण्यः' (RV. II. 11. 1^{a}) इति सूक्तमृतेऽन्त्यायाः[216]।

एवमेतानि सप्त छन्दांसि व्याख्यातानि। एषामेवान्येऽपि प्रकारा यथासम्भवं द्रष्टव्याः। तद्यथा—जागतेनैकेन[217] चतुर्भिश्चाष्टकैः त्रिष्टुप्[218]। यथा—'नमोवाके प्रस्थिते अध्वरे नराः' (RV. VIII. 35. 23^{a}.) इति। तां महाबृहतीति[219] बह्वृचाः (cf. R. Pr. XVI. 71.)। एवमन्यत्रापि[220] द्रष्टव्यम् ॥

(206) A : मध्यमे ; M : मध्येन (207) A adds पादेन (208) A : त्रिष्टुप् भवति। तथैव जगत्यपि। (209) All the MSS add another illustration which could not be traced, A : प्रतिसूर्यं मे ह्यक्रामं न शितिविति ; M : प्रकुवन्ने हयापंक्रामन्नशस्तरीति ; S : प्र कूर्वन्नेह या पंक्तावन्न शास्तव्यः (210) A reads : तदश्विना भिषजा रूद्रवर्तनी इत्यादिका गवां त्वचित्यन्ता। (211-12) A omits. (213) A omits the second *pāda*. M quotes only half of the second *pāda* (214) None of the MSS. has this sentence. (215) A drops इत्यत्र (216) A : अन्त्याम् (217) A adds पादेन (218) M adds भवति (219) A : ता महतीति (220) A : एवमन्यदपि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ३ ॥ एकस्मिन् पञ्चके छन्दः शङ्कुमती ॥ ५५ ॥

[25] एकस्मिन् पादे पञ्चाक्षरे सति सर्वंछन्दः शङ्कुमती नाम[221] भवति ।[222] सत्यपि छन्दोऽधिकारे पुनश्छन्दोग्रहण'[223] प्रकृते त्रिष्टुब्जगतीव्यावर्तनेन छन्दोमात्रप्रतिपत्त्यर्थम्। 'पितुं नु स्तोषम्' (RV. I. 187. 1^{a}.) इत्यत्राद्यः[224] पञ्चकः। अन्ये त्रयोऽष्टकाः। एषोष्णिग्विशेषः संख्या[225]सन्निकर्षात्। एवमुत्तरत्रापि संख्यासन्निकर्षात् स्वयमेव[226] छन्दो[227] विद्यात्। एतामनुष्टुब्गर्भा (Anu. V. 7.) इति बह्वृचाः। पञ्चकचतुष्कसप्तकत्रैष्टुभैश्च स्यात्। यथा—'शिवा नः सख्या सन्तु भ्रात्रा (RV. IV. 10. 8^{a}) इति[228]।

एकस्मिन्नि[229]ति किम्? 'कृतं चिद्धि ष्मा सनेमि द्वेषः' (RV. IV. 10. 7^{ab}.) इत्येषा ऋग् मा भूदिति[230]। अत्र हि द्वौ पञ्चकौ सप्तको नवकश्च पादाः[231]। पञ्चक इति किम्? 'सनितः सुसनितरुग्र' (RV. VIII. 46. 20^{a}.) इत्येषा[232] मा भूदिति[233]। अत्र हि नवकाष्टकैकादशाष्टकाः पादाः। तामेतां विषमपदा (Anu. VII. 8.) इति बह्वृचाः॥

॥ ३ ॥ षट्के ककुम्मती[234] ॥ ५६ ॥

एकस्मिन् पादे षड्क्षरे सति सर्वं छन्दः ककुम्मती नाम। यथा—

ता मे अश्व्यानां
हरीणां नितोशना।
उतो नु कृत्व्यानां नृवाहसा॥[235] इति। (RV. VIII. 25. 23.) अत्र हि षट्कसप्तकैकादशकाः पादाः[236]। तामेतामुष्णिग्गर्भेति (Anu. IV. 3.) बह्वृचाः। तथा— 'तव स्वादिष्ठाऽग्ने संदृष्टिरिदा चिदह्नः' (RV. IV. 10. 5^{abc}) इत्यत्र पञ्च पञ्चकाः[237] षट्कश्चैकः। तामेतां महापदपंक्तिरिति (R. Pr. XVI. 18.) बह्वृचाः। उभयप्राप्तौ पूर्वप्राबल्याच्छङ्कुमत्येव स्यात्, न[238] ककुम्मती। यथा—

वि योजना मिमीध्वम्
अध्वनः स्कभ्नीत।
काष्ठां गच्छत॥ (T. S. I. 7. 8. 1.) इत्यत्र सप्तकषट्कपञ्चकाः पादाः॥

(221) M & S omit नाम (222) M adds छन्दः (223) M : पुनर्ग्रहणं (224) M : तत्र आद्यः पादः ; A : अत्राद्यः पादः (225) A : संस्था (226) M : सर्वमेव (227) M & S omit छन्दो (228) A adds शङ्कुमती (229) A : एतस्मिन् (230) A reads : इत्यादिका ऋताव इत्यन्ता एषा मा भूदिति (231) A adds भवन्ति (232) A : इत्यादिका (233) M & S drop इति (234) A : ककुदमती ; M ककुद्मली (235) A quotes only the first *pāda*. (236) M : अत्र हि सप्तषट्कसप्तकैकादशाष्टकाः पादाः (237) M : पञ्चाष्टकाः (238) M : सः : S : सा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[26] ॥ ३ ॥ त्रिपादणिष्ठमध्या पिपीलिकमध्या[239] ॥ ५७ ॥

यस्यास्त्रिपादाया मध्यमः पादोऽणिष्ठोऽणुतमः[240] सा पिपीलिकमध्या। यथा—हरी यस्य सुयुजा विव्रता वेरर्वन्तानुशेपा। उभा रज्री न केशिना पतिर्दन्॥ (RV. X. 105. 2.) इति। अत्र पट्को मध्यमोऽभितस्त्रिष्टुभौ।

ननु च पूर्वप्राबल्यात् ककुम्मत्येवैषा[241] स्यात्। नैतदतुल्यबलत्वात्[242]। गुरु हीदं लक्षणं 'त्रिपादणिष्ठमध्ये'ति चतुर्विशेषणत्वात्। ककुम्मतीलक्षणं लघु 'एकस्मिन् पट्क' इति द्वि[243]विशेषणत्वात्। लघुनश्च ग्रहणे गुरुणि[244] उदाहरणानां बहूनामितरलक्षणानामविवक्षा[245] स्यात्। तस्मात् पिपीलिकमध्येत्येषा[246]। तथा—पर्यू षु प्र धन्व वाजसातये' (RV. IX. 110. 1^{ab}.) इति[247] तिसृणामृचां मध्यमा[248] गायत्रा अभितो जागताः। 'अभि वो वीरमन्धसो मदेषु गाय गिरा महा विचेतसम्' (RV. VIII. 46. 14^{ab}.) इत्यत्र मध्ये[249] गायत्रोऽमितस्त्रयोदशाक्षरौ[250] बृहतीविशेषोऽयम् (cf. R. Pr. XVI. 52.)। त्रिपादिति किम्? अवितासि सुन्वतः[251] (RV. VIII. 36. 1^{a}.) इत्येषा मा भूत्।[252] अत्र हि मध्यमो गायत्रोऽमितो द्वौ द्वौ[253] जागतौ।[254] इष्ठनो ग्रहणं किम्[255]? '[256]इदं विष्णुर्विचक्रमे' (RV. I. 22. 17^{a}.) इत्येषा मा भूत्। मध्यग्रहणं किम्[257]? 'प्र या घोषे भृगवाणे न शोभे' (RV. I. 120. 5^{a}.) इत्येषा मा भूत्। अत्र त्रैष्टुभौ द्वौ[258] षट्कश्च। ककुम्मत्येषा। तामेतां तनुशिरा[259] (RPr. XVI. 35.) इति बह्वृचाः॥

॥ ३ ॥ विपरीता यवमध्या ॥ ५८ ॥

पिपीलिकमध्याया विपरीतायास्त्रिपादेव[260] महिष्ठमध्या[261] सा यवमध्या[262]। यथा—'स सुन्वे यो वसूनाम् (RV. IX. 108. 13^{a}.) इत्यत्र मध्यमो[263] दशकोऽभितः सप्तकौ। त्रिपादिति किम्? 'सं मा तपन्त्यभितः' (RV. I. 105. 8^{a}.) इत्येषा मा भूत्। एषा हि पञ्चपदा; अस्या मध्यमो जागतोऽभितो गायत्राः। 'मीढुष्टम शिवतम' (VS. XVI. 51^{a}.) इति च। एते द्वे ऋचौ विषममध्येति बह्वृचाः[264]। [27] इष्ठनो[265] ग्रहणं किम्? 'ता विद्वांसा हवामहे वाम्' (RV. I. 120. 3^{a}.) इत्येषा मा भूत। अत्र हि मध्यमो[266] जागतोऽभितो नवकौ। तामेतां काविराट्[267] (RP. XVI. 40.) इति बह्वृचाः॥

(239) A & M : पिपीलिकामध्या (240) A : अणुतरः (241) M drops एव (242) M : बलवत्त्वात् (243) A omits द्वि (244) A drops गुरुणि (245) M reads : उदाहरणगतानामेव लक्षणानामविवक्षा ; S reads ; उदाहरणलक्षणानामविवक्षा (146) A drops इति (247) M adds अत्र (248) M adds पादाः (249) A : मध्यमः पादः (250) A : त्रयोदशाक्षराः ; M : त्रयो दशाक्षरौ (251) M cites 'अग्निमीळे पुरोहितम् instead (252-54) M omits (253) A omits the second द्वौ (255) A : अणिष्ठमध्येति किम् ? (256-57) A omits (258) A reads पादौ instead of द्वौ (259) A : तुनुशिखा ; M : तनुशिखा (260) A reads : या त्रिपादेव सति (261) A : महिष्ठमध्यमा ; M adds : न सूक्ष्ममध्या (262) M drops सा यवमध्या (263) A adds पादो (264) A : यवन्तिमध्येति बह्वृचाः M : विश्वमध्येति (265) A : इष्ठन्तो (266) A adds पादो ; M : मध्यतो जागतो 267) A : कौ विरानीति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ३ ॥ ऊनाधिकेनैकेन[268] निचृद्भूरिजौ ॥ ५९ ॥

एकेनाक्षरेण न्यूनेन निचृद्विशेषणानि छन्दांसि भवन्ति। निचृद्गायत्री निचृदुष्णिगिति। एकेनाधिकेन भूरिग्विशेषणानि। भूरिग्गायत्री भूरिगुष्णिगिति। नैकाक्षरेण न्यूनेनाधिकेन वा[269] छन्दोऽन्तरं भवतीत्यभिप्रायः। तथा च ब्राह्मणम्—'न वा एकेनाक्षरेण छन्दांसि वियन्ति न द्वाभ्यामिति। न ह्येकस्मादक्षराद्वियन्तीति[270] च' (AiB. I. 6.)। यथा—'इदं विष्णुर्विचक्रमे' (RV. I. 22.17a.) इति निचृद्गायत्री, 'विद्वांसाविद् दुरः पृच्छेत्' (RV. I. 120. 2a.) इति भूरिग्गायत्री। 'पितुं नु स्तोषम्' (RV. I. 187. 1a.) इति भूरिगुष्णिक्[271]। पूर्वमुदाहृतासु सर्वत्रु सन्ति निचृद्भूरिजः[272]॥

॥ ३ ॥ द्वाभ्याम् विराट्स्वराजौ ॥ ६० ॥

द्वाभ्यामूनाभ्यां[273] विराड्विशेषणानि छन्दांसि भवन्ति। विराड्गायत्री, विराडुष्णिगिति। द्वाभ्यामेवाधिकाभ्यां स्वराड् विशेषणानि[274] भवन्ति। स्वराड्गायत्री स्वराडुष्णिगिति। याः[275] खल्वृचः षड्विंशत्यक्षरास्ताः स्वराड्गायत्र्यो भवन्ति विराडुष्णिहो वा। यथा—'कृतं चिद्धि ष्मा सनेमि[276] द्वेषः' (RV. IV. 10. 7ab.) इति। यास्त्रिंशदक्षरास्ताः स्वराडुष्णिहो विराडनुष्टुभो वा। यथा—'ता विद्वांसा हवामहे वाम्' (RV. I. 120. 3a.) इति। एवमन्यत्रापि।[277] द्वयोश्छन्दसोर्मध्यगता ऋचः पूर्वं वा छन्दः स्वराड्विशेषणम्[278] उत्तरं वा विराड्विशेषण[279]मिति विद्यात्।

॥ ३ ॥ आदितः सन्दिग्धे ॥ ६१ ॥

या[280]द्वयो[281]र्मध्यगता[282] ऋचः समा वृत्तपादाभ्यां[283]ताः किं स्वित् पूर्वं छन्द आहो-[28] स्विदुत्तरमिति सन्देहे निर्णय उच्यते।

ननु[284] सन्देह एव नास्ति, द्वयोर्जात्योः साधारण्यस्ता इत्युक्तम्[285]। तथा च ब्राह्मणम्—'साधारणत्वं दर्शयति जागतो वा' (Ai. B.) इत्युक्तम्[286]। सत्यमेव। तथापि यत्रान्यतरन्निर्णेतुं शक्यते[287] छन्दस्तदेव तत्र प्रतिपत्तव्यम्[288]। यत्र विशेषहेतुर्नास्ति तत्र पूर्वोत्तरं[289] विकल्पेनानुचिन्तनीयम्। तत्रायं निर्णयहेतुरुक्तः[290]। आदित इति सूक्तेषु वाऽनुवाकेषु वा सामयोनिषु वा येन छन्दसोपक्रमः, यद्वा छन्दः प्रायिकं[291] भवति तदेव छन्दःसन्देहेषु निश्चेतव्यम्। यथा—'यूपव्रस्का उत ये यूपवाहाः' (RV. I. 162. 6a.)

(268) A : न्यूनाधिकेन (269) A omits वा ; M reads न न्यूनाधिकाक्षरैः। (270) A : विरोधयन्तीत्यर्थः (271-72) A : पूर्वमुदाहृता ॥ वहृष्युष्सुरतो निवृत्भुरिजौ ॥ (273) A & M add अक्षराभ्याम् ; M drops न्यूनाभ्याम् (274) A adds छन्दांसि (275) M adds another याः (276-77 A omits (278) S adds दृश्यते (279) A : विशेषमिति (280) A omits या (281) M adds छन्दसोः (282) M मध्ये ता (283) M : समा वृत्तिपादाक्षरैः ; S : समवृत्तापादाद्यैः। (284) A adds च (285) M drops उक्तम् (286) A reads : साधारणत्वं दर्शयति स जागतो भवति (287) M & S add तत् here. (288) M : प्रतिवक्तब्यम् (289) A : पूर्वं वोत्तरं वापि ; M adds वा (290) A : निर्णयो हेतुरुक्तः (291) M :

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति त्रिष्टुप्छन्दःसमुदाये[292] पाठात्त्रिष्टुबेव। 'ये वाजिनं परिपश्यन्ति पक्वम्' (RV. I. 162. 12^{a}.) इति च। योनिवद्भयोर्जातिः[293] ॥

॥ ३ ॥ देवतादितश्च[294] ॥ ६२ ॥

देवतादितश्च[295] छन्दो[296] हेतुभ्यः सन्दिग्धं निर्णेतव्यम्। आदिशब्देन वृत्तपादसंख्यानां[297] पूर्वोक्तानां ग्रहणम्। कथं पुनर्देवता निर्णयहेतुः? द्विविधो हि निर्णयहेतुः। अव्यभिचारी कश्चिल्लिङ्गतया[298] धूम इवाग्नेः। व्यभिचार्यपि कश्चित्। प्रायिकत्वात्[299]। अपवादाभावे[300] चक्षुरादय इव विषयाणां[301] वृत्त्यादय[302] इव छन्दसाम्। न[303] तावद्देवता निर्व्यभिचारं लिङ्गं नापि प्रायिकम्[304]। कथमिवैषां निर्णयहेतुरिति[305]?

बाढम्। न देवता निर्णयहेतुरित्यु[306]च्यते। किन्तु सन्देहेषु विशिष्टदेवतादर्शने विशिष्टछन्दोऽनुचिन्तनीयमित्यदृष्टार्थोऽयं विधिः। तत्र देवता [29] वक्ष्यते। वृत्तेस्तावन्निर्णय उच्यते। यथा—'त्वमग्ने रुद्रो असुरो महो दिवः' (RV. II. 1. 6^{a}.) इति जगती। न त्रिष्टुप्। अथ पादैः—

ऋषभोऽसि शाक्करः
घृताचीनां सूनुः।
प्रियेन नाम्ना प्रिये सदसि सीद॥ (TB. III. 7.6.10)

इत्यत्र वृत्तिसंस्थाऽभावेऽपि[307] परोष्णिह (cf. P. III. 20.) इव पादा भवन्ति। अथाऽक्षर संख्यया[308]—'यो वाचा विवाचो मृध्रवाचः' (RV. X. 23. 5^{a}.), 'के ते नर इन्द्र ये त इषे' (RV. X. 50. 3^{a}.) इति च द्वे। अत्र द्वौ वैराजौ पादौ द्वौ च जागतौ[309]। ततो विराड्जगत्योः साम्यात् सन्देहो संख्यया[310] त्रिष्टुबिति गम्यते। एतामभिसारिणीम्[311] (RPr. XVI. 66.) इति बह्वृचाः। सर्वेभ्यः संख्या गरीयसी (*vide* RPr. XVIII. 45) इति[312] बह्वृचाः, वृत्तिर्गरीयसीति[313] छन्दोगाः, पूर्वप्राबल्यादादिर्गरीयसी[314] इति पैङ्गलाः।

॥ ३ ॥ अग्निः सविता सोमो बृहस्पतिर्मित्रावरुणाविन्द्रो विश्वेदेवा[315] देवताः ॥ ६३ ॥

गायत्र्यादीनां क्रमादग्न्यादयो देवताः[316]। तथा च मन्त्रवर्णः[317]—'अग्नेर्गायत्र्यभवत् सयुग्वोष्णिहया सविता सम्बभूव' (RV. X. 130. 4^{ab}.)[318] इति द्वे ऋचौ। अत्र मित्रावरुणौ विराजो देवता

प्रायकं (292) A : त्रिष्टुपत्राये (293) A : योनिवयोंनि उत्तायो जातिः ; M : योनिवदुत्तायोर्जातिः (294) M : देवतादिभ्यश्च (295) M drops च (296) A drops छन्दः (297) A : संस्थानां ; M reads : आदिशब्दो न वृत्तिपादशब्दानां (298) A : आभिचारिकश्चेल्लि (299) M : प्रायकत्वात् (300) A : अवयवाभावे (301) A : रूपादीनां (302) A & S : वृत्तादय (303) A drops न (304) A : प्रायिकी (305) A : कथमिव निर्णयहेतुरिति ; M : कथमेषां निर्णय इति हेतुविति। (306) M drops इति (307) M : वृत्तिसंख्याऽभावेऽपि ; A : वृत्तसंस्थादि गानेऽपि (308) M : तथाक्षरसंख्यायाः (309) S : द्वौ वैराजौ जागतौ द्वौ (308-10) M omits (311) A : त एतेऽभिसारिण्याविति (312-13) M drops (314) A : पिङ्गलः ; M : पूर्वप्राबल्यादिर्गरीयसी (315) A drops देवा (316) A adds भवन्ति (317) A : मन्त्रवर्णाः भवन्ति (318) A : सयुग्वेति द्वे ; M adds after सम्बभूव—मनुष्या

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'विराण् मित्रावरुणयोः' (RV. X. 130. 5^{a}.) इति वचनात्। विराट् चत्वारिंशदक्षरा[319] पंक्त्यन्तर्भूता गृह्यते। 'मित्रावरुणौ पंक्त्येन्द्रस्त्रिष्टुभा' (Ai B.) इति ब्राह्मणवचनात्[320]। परिशिष्टायाः[321] पंक्ते[322]-स्त्रिष्टुभश्चेन्द्र एव देवता। वासवी[323] पंक्तिरिन्द्रस्य त्रिष्टुबिति दर्शनात् (cf. RPr. XVII. 8.)।

तत्र या ऋचो गायत्री वोष्णिग् वेति सन्दिह्यन्ते[324] ता यद्याग्नेय्यो गायत्र्य इत्यनुचिन्तनीयाः। यथा—कृतं चिद्धि ष्मा सनेमि द्वेषः[325] (RV. IV. 10.7^{a}.) इति। यदि साविश्य उष्णिह इत्यनुचिन्त्याः। तद्यथा—'अनागसो अदितये देवस्य सवितुः सवे। विश्वा वामानि[326] धीमहि'॥ (RV. V. 82. 6.) इति ऋक्[327]।' यास्ते सोम प्रजावत् सोऽभि सोऽहं दुःस्वप्नहां दुरुष्वह (TA. X. 48. 1.) इत्यनुष्टुप्[328]। 'यस्ते द्रप्सः स्कन्नो यस्ते अंशुः' (RV. X. 17. 13^{a}.) इति बृहती बृहस्पतिसम्बन्धात्[329]। 'अव वेदिं होत्राभिर्यजेत' (RV. VII. 60. 9^{a}.) इति [30] द्वे विराजौ, 'एष स्तोमो वरुण मित्र तुभ्यम्' (RV. VII. 64. 5^{a}.) इति च मैत्रावरुणत्वात्।[330] 'प्रदातारं हवामहे इन्द्रमाह रिषा वयम्'[331] (T. S. I. 7. 13. 4^{ab}.) इति पंक्तिरैन्द्रत्वात्। संक्रन्दनेनानिमिषेण जिष्णुना' (RV. X. 103. 2^{a}.) इति त्रिष्टुबैन्द्रत्वात्। 'शुभ्राः कन्या युवतयः सुपेशसः' (TB. III. 1. 2. 4^{a}.) इति जगती वैश्वदेवत्वादित्यादि द्रष्टव्यम्।

अन्येषामपि छन्दसां श्रुतौ दैवतं व्याख्यातं तदप्यदृष्टार्थायानुचिन्तनीयम्[332]। तद्यथा—'प्राजापत्या अतिच्छन्दसः विच्छन्दसो वायदेवताः पुरुषो द्विपदानां दैवतं ब्राह्मय एकपदाः स्मृताः' (RPr. XVII. 9-12, adapted) इति। विच्छन्दस इति[333] पादैर्वृत्त्या[334] च विरूपाणि[335] विषमाणि छन्दांसि। तथा च ब्राह्मणम्—'ता उ विच्छन्दः[336] सन्ति विराजः' (AiB.) इति॥

॥ ३ ॥ स्वराः[337] षड्जादयः ॥ ६४ ॥

सप्तानांछन्दसां षड्जादयः सप्त[338]स्वराश्चिन्तयितव्याः[339]। षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादाः स्वरा[340] इत्यपर आहुः[341]। देवतावत्[342] स्वरा अपि छन्दोविशेषप्रतिपत्त्यर्थाः। गोत्राणि च तथा[343]

(319) A : विराट् चात्र दशाक्षरपदा; M : विराट् त्रिंशदक्षरा; S : विराट् चात्र त्रिंशदक्षरा (320) M : दर्शनात् (321) A drops the word. (322) M adds च (323) A : सती (324) A संह्यन्ते; M : सन्दिश्यते (325-26) A drops (327) A : इत्युष्णिक् सावित्रत्वात् (327-28) A drops; S drops the illustration (329) A : बार्हस्पत्यत्वात्; M : बृहतीसम्बन्धात्; S : बार्हस्पत्यात् (329-30) A omits (331) A omits the second *pāda*. (332) A : अदृष्टयानुचिन्तनीयम् (333) A drops these two words. (334) M : वृत्या (335) M : विश्वरूपाणि (336) A & M : विच्छन्दसः (337) A runs on with the com. on the previous *sūtra* and drops षड्जादयः (338) A : षड्जादयः instead of सप्त (339) A : वेदयितव्याः; S : अनुचिन्तनीयाः (340) M omits स्वराः and reads : दाः इति। अपर आह (341) M & S : आह (342) A : देवता इव ((343) A adds च

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवतादितश्चेत्यत्रा[344]दिशब्देन संगृह्यन्ते[345]। यस्यां यस्यां[346] खल्वृचि[347] षड्जस्वरो बहुलो भवति तां तां[348] गायत्रीति विद्यात्। स्वरयोगाच्छन्दसां[349] सामनिबन्धनः[350] साम्नां सप्तस्वरत्वात्। अथवा—

उच्चौ निषादगान्धारौ नीचौ ऋषभधैवतौ।
शेषास्तु स्वरिता ज्ञेयाः षड्जमध्यमपञ्चमाः॥

गोत्रयोगस्तु मन्त्रद्रष्टामृषीणां गोत्रयोगेनेति। अत्रादृष्टार्थ एव स्वराद्युपदेश[351] इत्याचार्याः॥

॥ ३ ॥ आग्निवैश्यकाश्यपगौतमाङ्गिरसभारद्वाजकौशिकवासिष्ठानि गोत्राणि ॥ ६५ ॥

[31] सप्तानां छन्दसां सप्तेमानि गोत्राणि चिन्तयेत्[352]।

॥ ३ ॥ सितसारङ्गपिसङ्गकृष्णनीललोहितसुवर्णगौरा[353] वर्णाः ॥ ६६ ॥

सप्तानां छन्दसामष्टावेते[354] वर्णाः। तत्रोष्णिग्विशेषस्य ककुभस्तृतीयो वर्णः। तथा च श्रुतिः—

शुक्लवर्णास्तु गायत्र्यः सारङ्गं रूपमुष्णिहाम्[355]।
पिशङ्गं ककुभां रूपं कृष्णं रूपमनुष्टुभाम्[356]॥
बार्हतं लोहितं ज्ञेयं पाङ्क्तं नीलमुदीरितम्[357]।
सुवर्णं त्रिष्टुभो रूपं[358] गौरं जागतमुच्यते॥ इति॥

॥ ३ ॥ श्यावान्यति[359]च्छन्दांसि ॥ ६७ ॥

[360]श्यावान्यन्यानि छन्दांसि। तथा च श्रुतिः—अतो यान्यन्यच्छन्दांसि[361] श्यावं तेषां ततः पुनः॥ इति तत्र विशेष उक्तः—'नकुलन्त्वेकपदानां द्विपदां बृहदुच्यते। सारङ्गशुक्लकृष्णरूपाणि ऋग्यजुःसामब्राह्मणानि ताः' इति। केचित्तु 'विछन्दसां गौरीमाहुः। भूरिजं वृषलीं विराजं पृश्निं यजुषां साम्नामृचां ब्राह्मणस्य गायत्र्यादिकलादीनि' इति[362]॥

॥ ३ ॥ रोचनाभाः कृतयः[363] ॥ ६८ ॥

[364]कृतयो वक्ष्यमाणा रोचनाभाः॥

(344) M : देवतादिभ्यश्चेदित्यत्रा (345) A & S : गृह्यन्ते (346) A : यस्याः (347) A : खल्वृचः (348) A has one तां (349) A : स्वरयोगच्छन्दसां ; S : स्वरयोगश्च छन्दसां (350) A : सामनिबन्धः (351) A : अदृष्ट एव तु स्वरा उपदेश ; M : अत्र दृष्टार्थ etc. (352) A : अनुचिन्तयेत् (353) M omits सुवर्ण (354) M : एतेऽष्टौ वर्णाः (355) M रूपेण शुक्ला गायत्र्यः ; A : रूपं सारङ्गमुष्णिहाम् (356) A : कृष्णमानुष्टुभं ततः (357) A : लोहितं बृहतीनान्तु नीलं पाङ्क्तं ततः पुनः (358) M: त्रिष्टुभः स्वर्णवर्णाभा (359) A : श्यामान्यति (360-62) M omits (361) A : यान्यन्यानि छन्दांसि (363) M adds इति च ; S adds इति (364) M omits the rest of the *sūtra* and *bhāṣya* to the end of the chapter ;

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ३ ॥ अनुक्तानां कामतो वर्ण इति ॥ ६६ ॥

अनुक्तानां दैवीगायत्र्यादीनां यथाकामं वर्णाः चिन्तनीयाः। देवताज्ञानं छन्दोनिर्णयार्थम्। अदृष्टार्थं वा स्वरादयोऽप्यवश्यं छन्दोवत् प्रतिपत्तव्याः। [365]अथातो निर्वचनम्—गायत्री गायतेः स्तुतिकर्मण इत्यादिना तदपि यथा शून्ये विद्यात् ॥

इति भगवतो यादवप्रकाशस्य कृतौ पिङ्गलनागच्छन्दोविचितिभाष्ये तृतीयोऽध्यायः ॥

(365) A adds : तथा निर्वचनमपि श्रुतावुक्तम्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थोऽध्यायः

॥ ४ ॥ चतुःशतमुत्कृतिः[1] ॥ १ ॥

[2] अथ चतुर्दश छन्दांसि व्याख्यायन्ते। चतुरधिकं शतं चतुःशतम्। शतमक्षराणि चत्वारि चोत्कृतिर्नाम छन्दः ॥[3]

॥ ४ ॥ चतुरश्चतुरस्त्यजेदुत्कृतेः[4] ॥ २ ॥

उत्कृतेर्वर्णांश्चतुरश्चतुरस्त्यजेदन्या[5]नि छन्दांसि सम्पद्यन्ते ॥

॥ ४ ॥ तान्यभिसंव्याप्रेभ्यः कृतिः ॥ ३ ॥

तानि छन्दांसि अभि सम् वि आ प्र इत्येतेभ्य उपसर्गेभ्यः परः कृतिशब्दः।[6] स एषां[7] वाचकः।[8] अभिकृतिः संकृति[9]र्विकृतिराकृतिः प्रकृतिरिति।[10] तत्रोत्कृतेश्चतुर्वर्णानां[11] त्यागादभिकृतिः शताक्षरा।[12] संकृतिः षण्णवत्यक्षरा। विकृतिर्द्विनवत्यक्षरा।[13] आकृतिरष्टाशीत्यक्षरा[14]। प्रकृतिश्चतुरशीत्यक्षरा ॥

॥ ४ ॥ प्रकृत्या च ॥ ४ ॥

प्रकृति[15]शब्दोऽयं प्रकृत्या[16] निरुपसर्ग एव[17] परस्य[18] छन्दसो वाचकः। 'कृतिरिति।[19] कृतिरशीत्य-[32] क्षरा[20]। ता एताः सप्त कृतय एकोऽतिच्छन्दसां वर्गः[21] ॥

अथ[22] सामान्यसप्तको [23]वर्गः —

॥ ४ ॥ धृत्यष्टिशक्करीजगत्यः ॥ ५ ॥

कृतिमधोऽधो[24] धृत्यष्टिशक्करीजगत्यः स्युः ॥ तत्र विशेषः —

(1) A : कृति ; M कृतेः (2-3) M omits (4) A omits this *sūtra* : M reads : स्तृचेदुत्कृतेः (5) S adds चेत् (4-6) A drops (7) A : स च तेषां (8) M : adds अभिसङ्गतिः (9) M : सङ्गतिः (10) A drops इति (11) A : चतुर्णां वर्णानां (12) A adds सम्पद्यन्ते (13) A drops the sentence (14) M drops the sentence (15) M & S कृति (16) M : प्रकृतिः (17) A : निरुपसर्गस्य एव M : निरुपसर्गश्च : S : निरुपसर्गश्चैव (18) M drops परस्य (19) A & S omit this sentence (20) A reads this as a *sūtra* (21) A एतावत् सप्त कृतयः एकोऽपि छन्दसां वर्गः (22) M : अधः (23) A : सामान्यः सप्तको (24) A : कृतेरधो या

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ४ ॥ पृथक् पृथक् पूर्वत एतान्येवैषाम् ॥ ६ ॥

एतान्येव[25] धृत्यादीनि नामान्येषामेव धृत्यादीनां पूर्वतः[26] पुरस्ताद्भवन्ति । तानि च न सर्वेभ्यः पुरस्ताद्भवन्ति किन्तु मध्ये मध्य[27] एव पृथक् पृथगेकैकस्य पुरस्तादेकैकं भवति[28]—[29]धृति[30]रष्टिः[31] शक्करी[32] जगती इति ॥

॥ ४ ॥ द्वितीयं द्वितीयमतितः[33] ॥ ७ ॥

यदेषां[34] पुरस्ताद्द्वितीयं द्वितीयं नाम कृतं तदतिशब्दात्[35]परं भवति । अतिधृतिर्धृतिरत्यष्टिरष्टिरतिशक्करी शक्कर्यतिजगती जगती[36] । तत्रातिधृतिः षट्सप्तत्यक्षरा[37] । धृतिर्द्विसप्तत्यक्षरा[38] । अत्यष्टिरष्टषष्ट्यक्षरा । अष्टिश्चतुःषष्ट्यक्षरा । अतिशक्करी षष्ट्यक्षरा । शक्करी षट्पञ्चाशदक्षरा । अतिजगती द्विपञ्चाशदक्षरा । जगती पूर्वमेवोक्ता । नेयमतिच्छन्दः ।[39] अतिजगत्यर्थं पुनरिहोक्ता ।[40] एताश्चतुर्दशातिजगत्यादयोऽतिच्छन्दसः ।

तत्रातिजगती—'तमिन्द्रं जोहवीमि मघवानमुग्रम्' (RV. VIII. 97. 13^{a}.) इति । 'दृष्ट्वा परिस्रुतो रसम्' (VS. XIX. 79.ª) इति च[41] । शक्करी वा । 'अयं सहस्रमानवः'[42] (Pañ. B. IV. 9. 1^{a}.) इति शक्कर्यतिशक्करी वा शाखान्तरे । 'प्र वो महे मतयो यन्तु विष्णवे' (RV. V. 87.1^{a}) इति च[43] सूक्तम् ।

अथ शक्करी—'प्रो ष्वस्मै पुरोरथम्' (RV. X. 133. 1^{a}) इति ।[44] 'तच्छंयोरावृणीमहे' (TS. II. 6. 10.2) इति च । 'अवितासि सुन्वतो वृक्तबर्हिषः' (RV. VIII. 36. 1^{a}.) इति च सूक्तं महापंक्त्यन्तम् ।

तथाऽतिशक्करी—'या ते अग्ने यज्ञिया तनूस्तयेहि[45]' (TS. III. 4. 10. 5.) इति । अन्यथा शाखान्तरे 'सुषुमा [33] यातमद्रिभिः' (RV. I. 137. 1^{a}.) इति च सूक्तम् । 'अध त्विषी मामभ्योजसा क्रिविम्' (RV. II. 22. 2^{a}) इत्यादयश्च बह्वृचानाम् । 'अभि त्यं देवं सवितारमोण्योः' (SV. I. 464^{a}.) इति छन्दोगानाम् । 'रेतो मूत्रं विजहाति' (VS. XIX. 76^{a}.) इति च 'दृष्ट्वा रूपे व्याकरोत्' (VS. XIX. 77^{a}.) इति च । द्वे इमे अष्टी वा ।

(25) M drops एव (26) M drops पूर्वतः (27) A drops one मध्य (28) A reads एकैकस्य पुरस्तात् ...... भवति as a *sūtra* (29-32) M adds the अति varieties too. (33) A reads this *sūtra* as a continuation of the *bhāṣya* (34) M : यदेतदेषां (35) A : ततिशब्दात् ; M : तदिति शब्दात् (36) A reads this as a *sūtra* (37) A अष्टसप्तत्यक्षरा (38) A : द्वासप्तत्यक्षरा (39) A : नेयमतिच्छन्द अतिजगत्यर्थं ; M : नेयमतिच्छन्दा अतिजगत्यर्थं (40) A adds ता (41) A drops च and runs on (42) A : अयं ह समानवः ; S : अयं सहस्व मानवः (43) M drops च (44) A reads here the illustration : होता यक्षद्व्या... (45) M reads : या ते अग्ने यः स्वया तनुस्तये व्यूहनेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथाष्टिः—त्रिकद्रुकेषु महिषो यवाशिरम्' (RV. II. 22. 1ª.) इति। 'त्वां ह्यग्ने सदमित् समन्यवः' (RV. IV. 1. 1ª.) इति चात्यष्टिर्वा[46]। 'तव त्यं नर्यं नृतोऽप इन्द्र प्रथमम्' (RV. II. 22. 4ª.) इत्यादि अतिशक्करी वा[47]। 'अभि त्यं देवम्' (AV. VII. 14. 1ª) इति च। 'होता यक्षद्दैव्या होतारा भिषजाऽश्विना' (VS. XXI.36ª.) इति[48], इदं हविः प्रजननं मे अस्तु' (VS. XIX. 48ª) इति च वाजसनेयिनाम्[49]।

अथात्यष्टिः—'यच्चा साम्ना यजुषेति युवन्तमिन्द्रा पर्वता पुरोयुधा' (TB. III. 7. 14. 1.) इति, 'अया रुचा हरिण्या पुनानः' (RV. IX. III. 1ª.) इति च सूक्तम्। 'अग्निं होतारं मन्ये दास्वन्तम्' (RV. I. 127. 1ª.) इति पारुच्छेपम्। 'पार्थिवान् ध्रुवं ध्रुवेण हविषाऽव सोमं नयामसि'[50] (TS. III. 2. 8. 6ᵇ.) इति च। 'इमं समुद्रं शतधारमुत्सम् (TS. IV. 2. 10. 2ª.) इति, 'इमामूर्णायुं वरुणस्य मायाम्' (TS. IV. 2. 10. 3ª.) इति, 'अजा ह्यग्नेरजनिष्ट गर्भात्' (TS. IV. 2. 10. 4ª.) इति च[51]।

अथ धृतिः—'देवी ऊर्जाहुती दुघे सुदुघे पयसेन्द्रमवर्धताम्'[52] (VS. XXVIII. 16ª.) इति, 'सखे सखायमभ्या ववृत्स्वाशुं' न' (RV. IV. 1. 3ª.) इति, 'अवर्मह इन्द्र दादृहि श्रुधी नः' (RV. I. 133. 6ª.) इति, 'येन ब्रह्म येन क्षत्रम्' (TB. III. 7. 14. 2ª). इति च।

अथातिधृतिः—'सुपर्णोऽसि गरुत्मान्' इत्यादि 'सुवः पते' इत्यन्तम् (VS. XII. 4.)। कृतिर्वा शाखान्तरे।

होता यक्षद् दुरो दिशः कवष्यो न व्यचस्वतीरश्विभ्यां
न दुरो दिश इन्द्रो न रोदसी दुघे दुहे धेनुः[53] सरः-
स्वत्यश्विनेन्द्राय भेषजं शुक्रं न ज्योतिरिन्द्रियं पयः
सोमः परिस्रुता घृतं मधु व्य[34]न्त्वाज्यस्य होतर्यज॥ (VS. XXI. 34) इति।

'स हि शर्धो न मारुतं तुविष्वणिः' (RV. I. 127. 6ª.) इति। 'व्यूहेन शकुन्तिका मेऽब्रवीद्विषपुष्टं धयन्तिका' इति च शाखान्तरे। 'देवा देवेषु पराक्रमध्वम्' (KS. XXXVIII. 12ª.) इति च।

अथ कृतिः—
त्रिश्रुद् घर्मो विभातु मे आकूत्या मनसा सह विराजा
ज्योतिषा सह यज्ञेन पयसा सह क्षत्रेण यशसा।

(46) A drops चात्यष्टिर्वा and adds: ऐन्द्रया ह्युपनः परावत इति। (47) A drops अतिशक्करी वा (48) A drops the illustration : होता यक्षद्दैव्या... (49) A drops च; M reads : वाजसनेयिकाः (50) A : प्रायेण ध्रुवेण हविषो्ऽवसोममिति ; M : प्रायेण ध्रुवं ध्रुवेण हविषेति ; S : प्रायं ध्रुवं ध्रुवेण हविषे वसोमं इति। (51) M reads these three illustrations as one, omitting the इति (52) M cites the whole *yajus* with corrupt readings. (53) A omits this illustration ; M reads कामान् in place of धेनुः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सह सत्येन तपसा सह तस्य दोहमशीमहि

तस्य सुम्नमशीमहि तस्य भक्ष्यमशीमहि ॥[54] (Ā. Śr. V. 13. 6^{c}.) इति ।

अथ प्रकृतिः[55]—'भगो अनुप्रयुङ्क्तामिन्द्रो एतु पुरोगवः' (AV. XII. 1. 40^{b}.) 'यस्यां सदो हविर्धाने यूपो यस्यां निमीयते ब्रह्माणो यस्यामर्चन्त्यृग्भिः साम्ना यजुर्विदः युज्यन्ते[56] यस्यामृत्विजः सोममिन्द्राय पातवे' (AV. XII. 1. 38.) 'सा नो भूमिर्दक्षिणायां सुशेवो' 'देवी[57] दधातु सुमनस्यमाना' ॥ (AV. XII. 1. 44^{d}) इति पञ्चावसानेति ।

अथाकृतिः—'तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतं नन्दाम शरदः शतं शृणवाम शरदः शतं प्रब्रवाम शरदः शतमजीताः स्याम शरदः शतं ज्योक् च सूर्यं दृशे ॥ (TA. IV. 42. 32.) इति[58] ।

अथ विकृतिः—'इमे सोमाः सुरामाणश्छागैः । न मेषैश्च षभैः सुताः शष्पैः । न तोक्मभिर्लाजैर्महस्वन्तः । मदा मासरेण परिष्कृताः । शुक्राः पयस्वन्तोऽमृताः प्रस्थिता । वो मधुश्चुतस्तानश्विना । सरस्वतीन्द्रः सुत्रामा वृत्रहा । जुषन्तां सौम्यं मधु पिबन्तु । मदन्तु व्यन्तु होतर्यज' ॥[59] (VS. XXI. 42$^{b\ et\ seq}$) अत्र दशाक्षराः पादा द्वा एकादशाक्षरौ ।[60] 'अग्निष्टे हस्तमग्रभीत्' (Āp. MB. II. 3. 3^{a}.) इति च ।

अथ संकृतिः—'देवो अग्निः स्विष्टकृत् । देवान्यक्षद्यथायथम् । होताराविन्द्रमश्विना । वाचा वाचं सरस्वतीम् । अग्निं सोमं स्विष्टकृत् । स्विष्ट इन्द्रः सुत्रामा । सविता वरुणो भिषक् । इष्टो देवो वनस्पतिः । स्विष्टा देवा आज्यपाः । स्विष्टो अग्निरग्निना । होता होत्रे [35] स्विष्टकृत् । यशो न दधदिन्द्रियम् । ऊर्जमपचितिं स्वधाम् ॥ (VS. XXI. 58.) इति । अत्र त्रयोदश गायत्राः पादाः । उत्कृतिर्वाऽप्यूहेना[61]ष्टाक्षरैः पादैः ।

अथाभिकृतिः—'अपूपवान् घृतवानपूपवांश्चरुरेहेदं सीदतु' ... — 'अपूपवान् घृतवानपूपवांच्छृतवानपूपवान् क्षीरवानपूपवान्दधिमानपूपवान् मधुमान्' (TA. VI. 8. 1.) इत्याद्यभिकृतयः ।[62]

अथोत्कृतिः—'छागस्य हविष आत्तामद्य मध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घस्तां नूनं घासे अज्राणां यवसप्रथमानां सुमत्क्षराणां शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामत उत्सादतोऽङ्गादङ्गादवत्तानां करत एवाश्विना जुषेतां हविः' (VS. XXI. 43.) इति । एवं 'सुभेषजम्'[63] (TS. I. 8. 6. 1^{d}.) इति[64] सूक्ते सन्त्युत्कृतयः[65] ॥ (*vide* Ṛ. Pr. XVI. 88.)

(54) A quotes only half of the first *pāda*. (55) A: आभानो अनुप्रयुङ्क्तामित्यादि । जे दधातु सुमनस्यमानं (56) M : युध्यन्ते । (57) M : यज्ञे । (58) A : तच्चक्षुर्देवहितमित्यादि सूक्तं दृश इत्यन्तः ; M : तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरन्ति पश्येमेत्यादि... ज्योक् च सूर्यं दृशे इति ; S : तच्चक्षुर्देवहितमिति । (59) A & M : सोमम् in place of होतर्यज । (60) A : दशाक्षराः पादाः एको दशाक्षराः ; M : अत्र दशाक्षराः पादाः । एक एकादशाक्षर ; S : अत्र नव दशाक्षराः पादाः एकादशाक्षरः । (61) A : वा व्यूहेन । (62) A adds : संकृती वाद्ये द्वे । (63) A & M : सुभेषजे । (64) A M & S : अपि । (65) A: कृतयः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ४ ॥ उक्तं साति मध्यं प्रतिष्ठा सु च ॥ ८ ॥

इमान्यन्यानि पञ्च[66] छन्दांसि। उक्तं नामैकं छन्दः। उक्तमेव साति अतिशब्दसहितमत्युक्तमिति यावत्। द्वितीयं छन्दः। मध्यं[67] नाम तृतीयं छन्दः। प्रतिष्ठा नाम चतुर्थम्। प्रतिष्ठा सुशब्दसहिता[68] सुप्रतिष्ठेति। तत् पञ्चमं छन्दः।

क्व[69] पुनरिमानि छन्दांसि प्रतिपत्तव्यानि[70]? न[71] तावदुत्कृतिमुपर्युपरि। प्रतिरोमारम्भविरोधात्[72]। तथा हि[73] प्रातिलोम्येनातिच्छन्दसामारम्भः कृतः। परस्तात् स्थितामुत्[74] कृतिमारभ्याधःस्थस्य छन्दस उक्तत्वात्। स चारम्भः[75] परस्तादिमानि छन्दांसि मा भुवन्निति सूचयितुम्। नापि जगतीमधोऽधः स्युः। तत्र त्रिष्टुबादीनामुक्तत्वात्। नापि गायत्रीमधोऽधः।[76] तत्रापि संख्याऽनभिज्ञानात्।

अत्राह[77]। ज्ञायत एव संख्या। तथा हि गायत्री चतुर्विंशत्यक्षरोक्ता।[78] तस्याश्चतुर्णां[79] त्यागात्[80] विंशत्यक्षरमुक्तम्।[81] तस्य चतुस्त्यागात्[82] षोडशाक्षरमत्युक्तम्। एवं द्वादशाक्षरमष्टाक्षरं चतुरक्षरमिति।

नैतद् युक्तम्। [36] यतोऽस्मिन्[83] तन्त्रे पूर्वापरपदार्थसंख्यया संख्यानियमो नाश्रीयते इति षष्ठाध्याये वक्ष्यते। ततो न गायत्र्याः संख्याश्रयणं[84] युक्तम्। अभिकृत्यादीनां तु 'चतुरश्चतुरस्त्यजेदुत्कृतेः' (P.4/2) इत्यस्मात् संख्याग्रहः। नोत्कृतिसंख्यामात्रात्।[85] न चैतद्वचनं त्रिष्टुबादीन्यतिलङ्घ्य[86] गायत्र्या अधस्ताद्वृत्तिमर्हति।[87] तस्मादज्ञातसंख्यानीमानि छन्दांसीति।

उच्यते।[88] एवं तर्हि प्रथमातिक्रमे कारणाभावादादावेवेमानि[89] छन्दांसि स्युः। तेनोक्तं चतुरक्षरमत्युक्तमष्टाक्षरं मध्यं[90] द्वादशाक्षरं प्रतिष्ठा षोडशाक्षरा सुप्रतिष्ठा विंशत्यक्षरेति।[91]

नन्वेवं सति[92] उक्तमेकाक्षरमत्युक्तं द्व्यक्षरं मध्यं त्र्यक्षरं[93] प्रतिष्ठा चतुरक्षरा सुप्रतिष्ठा पञ्चाक्षरेति[94] किं न स्यात्?

उच्यते। 'पादश्चतुर्भागः' (P.4/11) इति वक्ष्यमाणात् विशेषणादिमानि[95] छन्दांसि प्रायेण गायत्रीशब्देनैव[96] व्यवह्रियन्ते।[97] क्वचित् 'मा प्रमा प्रतिमोपमा[98] संमा'[99] (Ṛ Pr. XVII. 19.)

(66) A drops पञ्च। (67) M : मध्यमं। (68) A : प्रतिष्ठाशब्दश्च समस्तो। (69) A drops क्व। (70) A : अप्रपत्तव्यानि (71) A drops न। (72) A : प्रतिपत्तव्यानि विरोधात्। (73) A : तर्हि ; S : तावत्। (74) A : परस्तात् स्थाम्। (75) M & S : समारम्भः। (76) M adds स्यु : (77) M : तत्राह। (78) A : चतुर्विंशत्यक्षरैत्युक्ता। (79) A adds अक्षराणां। (80-82) M drops (81) A adds स्यात्। (83) A : यदस्मिन्। (84) M : संख्याश्रवणं। (85) A : संख्याग्रहणेनोत्कृतिसंख्यामात्रां (86) A : त्रिष्टुभादिष्वनिलङ्घ्य। (87) M : व्यनक्ति ; S : वक्ति। (88) M drops (89) A : एतानि। (90) M : मध्यमं। (91) M : विंशाक्षरा इति। (92) A drops सति ; M : नन्वेवमपि। (93) M : त्र्यक्षरं मध्यं। (94) M adds एवं। (95) M : वक्ष्यमाणत्वात् तानीमानि ; S : वक्ष्यमाणविशेषणत्वादिमानि। (96) M drops एव (97) A : व्यवहीयन्ते ; M : व्यवह्रियते। (98) M : उन्मा। (99) M & S : समा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्युक्तानि। क्वचित् 'एवः वरिवः शम्भुः परिभूराच्छः'[100] (VS. XV. 4, adapted) इति। कैश्चित् कृतिः प्रकृतिः संकृति[101] रभिकृतिरुत्कृतिरित्युक्तानि।

तत्रोक्तम्—'नूनमथ' (RV. VIII. 46. 15ᵈ.) इत्येकपदेयम्। अथात्युक्तम्—'अग्निर्ज्योतिर्ज्योतिरग्निः' (TB. II. 1. 9. 2.) इति द्विपदा।[102] 'सूर्यो ज्योतिः ज्योतिः सूर्यः' (TB. II. 1. 9. 2.) इति, 'इन्द्रो ज्योतिः ज्योतिरिन्द्रः' (KS. XL. 6.) इति च।[103] अथ मध्यम्—'अग्निर्ज्योतिः सूर्यो ज्योतिः प्रजा ज्योतिः' (TB. II. 1. 2. 11.) इति त्रिपदा। अथ प्रतिष्ठा—'अग्ने पत्नीरिहा वह देवानामुशतीरूप। त्वष्टारं सोमपीतये'[104] (RV. I. 22. 9.) इत्यत्र त्रिपात्।[105] अथ सुप्रतिष्ठा—'पुरूतमं पुरूणां स्तोतॄणां विवाचि। वाजेभिर्वाजयताम्॥' (RV. VI. 45. 29.) इति त्रिपदा[106]। 'य ऊर्मिर्हविष्य इन्द्रियावान् मदिन्तमस्तं व ऋध्यासम्' (KS. XXXV. 3.) इति, 'अग्ने हंसि न्यत्रिणम्' (RV. X. 118. 1ᵃ.) इति च।

एषामपि मध्यगतानि [37] द्व्यक्षरप्रभृतीनि चतुरुत्तराणि 'राट्[107] विराट् स्वराडणामानि' (cf. ṚPr. XVII. 5. ; NS. I. 5.) छन्दांसि भवन्ति। तथातिच्छन्दसामपि। तत्र द्व्यक्षरं छन्दो बृहदित्ये[108]कपदेयम्।

अथ षडक्षरम्—'जुम्बकाय स्वाहा' (VS. XXV. 9ᵈ.) इति।[109] एवमन्यत्रापि द्रष्टव्यानि[110]। केचिद् द्व्यक्षरादीनां चतुरुत्तराणां द्विशताक्षरान्तानां मध्यगतानां[111] छन्दसां 'हर्षीका, सर्पीका, मर्षीका सर्वमात्रा[112]' (cf. ṚPr. XVII. 20.) इत्यादीनि नामानि वर्णयन्ति। तथाऽतिच्छन्दसामपि 'विधृतिः, शक्वरी, अष्टिः, हाना' (cf. NS. I. 5.) इत्यादीनि पृथङ्नामानि[113] वदन्ति॥[114]

॥ ४ ॥ अथ लौकिकम् ॥ ६ ॥

एवं तावज्जगत्यतिजगतीशक्वर्यतिशक्वर्यष्ट्यत्यष्टिधृतिरतिधृतिः कृतिः प्रकृतिराकृतिर्विकृतिः संकृतिरभिकृतिरुत्कृतिरिति पञ्चदश वैदिकानि[115] छन्दांसि भवन्ति।[116] अष्टाचत्वारिंशदक्षरादि[117] चतुरुत्तराणि चतुःशतान्तानि उक्तानि। तथा उक्तमत्युक्तम्मध्यं प्रतिष्ठा सुप्रतिष्ठेति च पञ्च चतुरक्षरादीनि चतुरुत्तराणि विंशत्यक्षरान्तानि उक्तानि।[118] एषु विंशतिषु छन्दःसु लौकिकमपि रूपमस्ति। तच्च पञ्चमाध्यायादौ वक्ष्यते॥

(100) A : क्वचिदेत्रो परिवः शम्भूरादिति ; M : क्वचिदेत्रो वरिवः शम्भुः परिभूः परिभूराछदिति ; S : क्वचिद्देवो परिवशम्भूराछन्निति। (101) A drops प्रकृति ; M drops संकृति। (102) A adds तथा। (103) A & M drop च। (104) A reads : अग्ना ई पतीवासूसजोर्देवेन त्वष्टा सोमं पिब ; M reads ; अग्मायो पत्नी वासूसजूर्देवेन त्वष्टा सोमं पिबा ; S : अग्ने पत्नीव हद्देवानां देवेन त्वष्टा रसमपि वयः। (105) इति त्रिपदा in all the MSS (106) A adds एव। (107) A drops राट्। (108) A : बृहती। (109) A adds द्विपदेयम्। (110) A : एवमन्यान्यपि... ; M adds इति। (111) M reads षड्विंशतेः in place of मध्यगतानां। (112) A omits the last two names ; M : धर्ममात्रा। (113) M drops. (114) M & S : वर्णयन्ति। (115) A : वै कृतानि (116) A drops भवन्ति। (117) A & S : क्षरादीनि। (118) A drops उक्तानि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ४ ॥ आ त्रैष्टुभात् यदार्षम्[119] ॥ १० ॥

यानि चार्षाणि छन्दांसि चतुर्विंशत्यक्षरादीनि चतुरुत्तराणि चतुश्चत्वारिंशदक्षरान्तानि आ त्रैष्टुभाच्छन्दांस्युक्तानि गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुबिति, तेष्वपि षट्सु लौकिकमपि रूपमस्ति। इत ऊर्ध्वमपि सर्वत्र लौकिकमित्यधिक्रियते।

[38] ॥ ४ ॥ पादश्चतुर्भागः ॥ ११ ॥

उक्तादिषूत्कृत्यन्तेषु षड्विंशतौ छन्दःसु [120]वक्ष्यमाणेषु च मात्राछन्दःसु[121] समप्रविभक्तेषु[122] च चतुर्थो भागः पाद इति ज्ञेयः। तेनोक्तस्यैकमक्षरं पादः गायत्रस्य षडक्षराणि जागतस्य द्वादश[123] उत्कृतेः षड्विंशतिः।[124] अत एवोक्तादीनि एकाक्षरं द्व्यक्षरं दशाक्षरमिति व्यवह्रियन्ते। प्रयोजनं चास्य सूत्रस्य मात्रासमकतनुमध्यादिषु। पादमात्रस्य लक्षणे कथितेऽन्येषामपि तादृशानां पादानां त्रयाणां ग्रहणम्॥

॥ ४ ॥ यथावृत्तसमाप्तिर्वा ॥ १२ ॥

अथवा समप्रविभागासम्भवे[125] न्यूनाधिकैरपि पादैर्यथा वृत्तस्य चतुष्पाद एव समाप्तिः सम्भवति तत्र तादृश एव चतुर्थो भागः पादः। तेन वैतालीयादिषु द्वयो[126]र्न्यूनाधिकयोः पादयोर्लक्षणे कथिते तादृशौ द्वावन्यावपि पादौ द्रष्टव्यौ।

पदचतूरूर्ध्वे चतुर्वृद्ध्या चत्वार एव पादाः। द्वयानि खलु छन्दांसि वर्णजातयो मात्राजातयश्चेति। तत्रोक्तादय उत्कृत्यन्ता वर्णजातय उक्ताः। वक्ष्यन्ते च। मात्राजातयः पुनरार्यादय इदानीं प्रक्रियन्ते। तासु च काचित् वेदेऽपि दृश्यते। तथा चाथर्वणिकाः श्लोकमार्याजातीयमामनन्ति—

घृतमिव पयसि निगूढं
भूते भूते च वसति विज्ञानम्।
सततं मन्थयितव्यं[127]
मनसा मन्थानभूतेन॥[128] (Br. Bind. Up. 20) इति।

मात्राजातयोऽपि द्वयम्—गणजातिर्निर्गणजातिश्चेति।
गणजातिमार्यां प्रस्तोष्यन् गणसंज्ञां[129] कथयति—

[39] ॥ ४ ॥ लः समुद्रा गणः ॥ १३ ॥

'लः' लघवः समुद्राश्चत्वारश्चतस्रो मात्रा इति यावत्। ता गणसंज्ञा भवन्ति।
स च गणः पञ्चधा प्रयोक्तव्य इत्याह—

(119) A : त्रैष्टुभाच्च यथार्षम्। A drops the words between 120 & 121 (122) M : सम्प्रति भक्तेषु। (123-124) A drops. (125-126) A drops due to haplology. (127) A : मन्धयितव्यम् ; M : सन्धयितव्यम्। (128) M : मना मन्थानभतेन ; A : कं ध्यानभूतेन (129) M : संख्यां।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ४ ॥ गौ गन्तमध्यादिर्लश्च ॥ १४ ॥

गौ गन्तो गमध्यो गादिर्लश्च। गौ गुरू द्वौ कदाचिद् गणोऽसौ भवति। गुर्वन्तो वा त्रिकः 'स'-गणः। गुरुमध्यो वा 'ज'-गणः। गुर्वादिर्वा 'भ'-गणः। चत्वारो[130] लघवो वाऽसौ भवति। पञ्चधाऽपि चतुर्मात्र एव गुरोर्द्विमात्रत्वात्। 'लौ स' इति द्वयोर्मात्रयोः स्थाने एकस्य गुरोरुक्तत्वात्। ननु 'लश्च' इति पुनर्ग्रहणमनर्थकं 'लः- समुद्रा गण' इत्युक्तत्वात्। नानर्थकं तस्य मात्राविधानार्थत्वात् अस्य च लघुप्रयोगार्थत्वात्। एतेन पञ्चप्रकारेण[131] गणेन आर्याः कर्तव्याः[132]।

अथार्यालक्षणमुच्यते। तत्र[133] गाथाजातयश्चतस्र[134] इति।

तत्र गाथा तावत्—

॥ ४ ॥ स्वरा अर्धञ्चार्यार्धम् ॥ १५ ॥

'गण' इति वर्तते। वचनं विपरिवर्तते। स्वराः सप्तगणा अर्धञ्च गणस्यार्धं श्लोकस्यार्धं स्यात्। साऽऽर्या नाम जातिर्भवति। 'गाथा' नामैपार्या शास्त्रान्तरेपूक्ता। गणानां सप्तानां प्रत्येकं पूर्वोक्तैः पञ्चभिः प्रकारैः प्रयोगे प्राप्ते इदमाह—

॥ ४ ॥ अत्रायुङ् न ज् ॥ १६ ॥

अत्रार्यायामयुक् अयुजो[135] गणाः प्रथमस्तृतीयः पञ्चमः सप्तमश्च जो मध्ये गुरुर्न कर्तव्यः। ततश्चैते गणाश्चतुष्प्रकाराः[136] शेपाश्च पञ्चप्रकाराः[137]।

[40] ॥ ४ ॥ षष्ठो ज्[138] ॥ १७ ॥

पष्ठो गणो 'जो' मध्ये गुरुरेव नियमेन भवति। प्राप्तस्य वचनं नियमार्थम्।

॥ ४ ॥ न्लौ वा ॥ १८ ॥

नगणस्त्रिलघुः लघुश्चैक इति चतुर्लघुर्वा[139] पष्ठो गणः।

॥ ४ ॥ न्लौ चेत् पदं द्वितीयादि ॥ १९ ॥

षष्ठो गणो न्लौ चेत् चतुर्लघुश्चेत् पदं द्वितीयाक्षरादि पृथक्[140] प्रवर्तयेत्। षष्ठगणस्य द्वितीयमक्षरं प्रथमञ्च एकः शब्दो न स्यात्। द्वितीयमक्षरमन्यस्य शब्दस्या[141]दिरेव स्यादित्यर्थः॥

॥ ४ ॥ सप्तमः प्रथमादि ॥ २० ॥

सप्तमो गणो न्लौ चेत्[142] प्रथमाक्षरादि प्रवर्तयेत्। प्रथमाक्षरं शब्दस्यादिरेव स्यादित्यर्थः॥

(130) A drops चत्वारो। (131) A drops पञ्च। (132) A : कार्या। (133) M : ताश्च ; S : ता च ; M adds पञ्चतय्य। (134) M & S : गाथागीतयश्चतस्र। (135) A : अयुग्मो। (136-37) A omits. (138) M & S : जः। (139) A : त्र्लौ। (140) A drops पृथक्। (141) A drops शब्दस्य। (142) A adds चतुर्लघुश्चेत् पदं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ४ ॥ अन्त्ये पञ्चमः ॥ २१ ॥

'अर्धम्' इत्यनुवर्तते। विभक्तिर्विपरिवर्तते। अन्त्येऽर्धे पञ्चमो गणो न्लौ चेत् पदं प्रथमाक्षराद्येव स्यात्॥

॥ ४ ॥ षष्ठश्च ल् ॥ २२ ॥

चकारादन्त्य इत्यनुवर्तते। अन्त्येऽर्धे पष्ठो गणो लघुरेवैकः स्यात् न चतुर्मात्रः। इत्थं गाथालक्षणमुक्तम्। तत्रोदाहरणम्—

वन्दे मातरमार्यां वाणीं वर्णाभिमानिनीं देवीम्।
यामेव विदुरुपास्यां परासु[143] गाथासु पथ्यासु॥

न्लौ वा नौ चेत् पदं द्वितीयादीत्युक्तम्[144]। तद्यथा—

निजमुखविपुलप्रतिबिम्बवति तमिव[145] हारतरलतारेषु[146]।
[41] वीक्षितुमासीनोरसि भर्तुर्जगदखिलमवतु रमा॥

॥ ४ ॥ त्रिषु गणेषु पादः पथ्याद्ये च ॥ २३ ॥

त्रिषु गणेषु आद्येषु पादः क्रियते। आद्ये प्रथमेऽर्धे, चकारादन्त्ये च। सा गाथा 'पथ्या' नाम भवति। पूर्वमर्धस्य लक्षणविधानात् पादसद्भावाभावौ नोक्ताविति वचनम्। तेनात्राप्याद्य एव श्लोक उदाहरणम्।

॥ ४ ॥ विपुलाऽन्या ॥ २४ ॥

अन्या गाथा 'विपुला' यस्यास्त्रिषु गणेषु पादो न क्रियते। सा च 'पूर्वे मुखपूर्वे'त्यादिना वक्ष्यमाणन्यायेन मुखादिविशेषणत्रयस्यात्रापि सम्बन्धसद्भावात् त्रिधा विपुला। मुखविपुला, जघनविपुला, महाविपुला चेति।[147] तत्र 'मुखविपुला' सा यस्या न पूर्वार्धे पादव्यवस्था। यथा—निजमुखविपुलप्रतिबिम्बेत्यादि (loc. cit) श्लोकः। यस्या नोत्तरार्धे सा 'जघनविपुला'—

सा जयति जघनविपुला गौरी यस्या जितस्मरोऽपि हरः।
दिक्सङ्गतो[148] द्वितीयात्वमपि न सहतेऽद्वितीयायाः॥

यस्या नोभयोरर्धयोः सा 'महाविपुला'। यथा—

विभजन् वेदांश्चतस्रः ककुभ इवास्यैश्चतुरः स विजयते।
यस्माल्लब्धवरस्यैव जनस्यैते[149] महाविपुलाः॥

॥ ४ ॥ चपला द्वितीयचतुर्थौ गुमध्यौ जौ ॥ २५ ॥

द्वितीयचतुर्थौ गणौ जौ मध्यगुरू स्याताम्। तदा गाथा 'चपला' नाम भवति। तौ च मध्ये गुरू गणौ मध्यौ गुरोर्मध्यगतौ स्तः। ततश्च प्रथमो गणो गुर्वन्त एव स्यात्। तृतीयो गुरुरेव द्विः। पञ्चमो गुर्वादिरेव। इत्येवं गुर्वोर्मध्यगतौ जौ भवतः॥

(143) A : ऋषयो। (144) A : द्वितीयादीत्याद्युक्तम्; M : द्वितीयादीक्तम्। (145) A : प्रतिबिम्बपङ्क्तिमिव (146) M : तारतरलं भारेषु; S : तारतरलभावेषु। (147) A adds केचित्। (148) A : ऐक्यं गतो (149) M : जनस्य ते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[42] ॥ ४ ॥ पूर्वे मुखपूर्वा ॥ २६ ॥

पूर्वार्धे चेदिदं चपलालक्षणं तदा मुखशब्दपूर्वा चपला भवति। मुखचपलेति यावत् ॥

॥ ४ ॥ जघनपूर्वेतरत्र ॥ २७ ॥

इतरत्र द्वितीयार्धे चेदिदं चपलालक्षणं तदा 'जघनपूर्वा' चपला भवति। जघनचपलेति यावत् ॥

॥ ४ ॥ उभयोर्महाचपला ॥ २८ ॥

उभयोरप्यर्धयोश्चेदिदं चपलालक्षणं तदा महाचपला। एतास्तिस्रोऽपि पथ्यया विपुलाभिश्च सहैव भवन्ति। ताश्च प्रत्येकं चतसृभिः सम्पर्काच्चतुर्धा चतुर्धेति द्वादशचपलाः। केवला[150]श्चतस्र इति षोड़शचपलाः। तत्र पथ्यामुखचपला—

देवाधिनाथ नाथं हरिं पुराणं विनैव भगवन्तम्।
या स्तौत्यन्यजन्मतः सा नष्टा सैव[151] मुखचपला ॥

अथ मुखविपुला जघनचपला—

भगवति भवव्याधिभिषजि निष्ठां[152] विनाऽस्ति का दयिताः।
यदमी जना विना तामुपासते जघनचपलां स्त्रीम् ॥

अथ जघनविपुला महाचपला—

आस्तां विमुक्तिरेताः स्त्रियोऽपि रक्ष्याः कथं महाचपलाः।
सेवां विना गिरीशस्य बालरामा इव श्वश्रूम् ॥
एवमन्या अपि द्रष्टव्याः।

इदानीं गीतयोऽधिक्रियन्ते।

॥ ४ ॥ आद्यर्धसमा गीतिः ॥ २९ ॥

आद्येनार्धेन समा यदि सर्वा स्यात् तदा गीतिः। आद्येनार्धेन साम्यं चार्याया आद्येनार्धेन अन्त्यस्य साम्यम्। आद्यार्धे षष्ठो गणो 'जो' वा 'न्लौ' वा स्यादित्युक्तम्। [43] अन्त्येऽर्धे षष्ठश्च 'ल्' इति लघुमात्रत्वं विहायान्त्येऽपि[153] षष्ठो 'जो' वा 'न्लौ' वा स्यात् सा गीतिः। [154]पञ्चमे च लघुशब्दस्य प्रथमादित्वनियमो न स्यात्, सप्तमे सर्वलघुश्च स्यात् ॥[155]

॥ ४ ॥ अन्त्येनोपगीतिः ॥ ३० ॥

अन्त्येनार्धेन यद्यस्य समः स्यात्। आद्येऽप्यर्धे षष्ठो गणो लघुमात्र एव। पञ्चमे च सर्वलघौ शब्दस्य प्रथमादित्वनियमः[156] स्यात् तदा उपगीतिः ॥

(150) A adds च पथ्यादयः। (151) M: सा कष्टा सैव; A: सा कष्टायैव। (152) A drops निष्ठां M: विषभुजि निष्ठां। (153) A: लघुमात्र उक्तः। तद्यदि लघुमात्रत्वं विहाय (154-55) A drops; S drops सप्तमे सर्वलघुश्च स्यात्। (156) A: प्रथमादि पदं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

 Digitized by Madhuban Trust, Delhi

॥ ४ ॥ व्युत्क्रमेणोद्गीतिः ॥ ३१ ॥

व्युत्क्रमेण पूर्वार्धे षष्ठो गणो लघुमात्र उत्तरार्धे षष्ठो 'जो' वा 'न्लौ' वा स्यात् तदा[157] उद्गीतिः। एतास्तिस्रो गीतयो[158]ऽपि पथ्यया विपुलादिभिश्च संयुज्यन्ते। ततः षोड़शभिः सम्बन्धात् प्रत्येकं षोड़शधा इत्येता अष्टचत्वारिंशत्। गाथाश्च षोडशेति चतुःषष्टिरार्याः। तत्र 'पथ्यागीतिः'—

गायति गीतं काचित् कलकण्ठी[159] वीणया समं सलयम्।
एकाधिपतिर्धात्र्या वीरो रामो बभूव राजेति ॥

मुखविपुलोपगीतिः —

अन्योपगीतिमाकर्ण्य कृतेर्ष्या गायति वयस्या।
एकाधिपतिर्धात्र्या दिवश्च[160] कृष्णो बभूवेति ॥

जघनविपुलोद्गीतिः—

उद्गातर्युद्गीतिं कृतवति शस्त्रे सुशस्ते[161] च।
हुत्वा ग्रहचमसान् सदसि भक्षयन्तोऽर्चयन्ति हरिमार्याः ॥

एवं चपलाभिरपि गीतीनां योगः स्यात्। तत्र पथ्यामुखचपलादिभिर्गीतिः —

अन्ये समग्रमर्थं समर्ज्य दानेन[162] तोषयन्ति हरिम्।
भगवत्समचपला मुखचपला गीतिं वितन्वते पथ्याम् ॥

(जघनविपुला मुखचपला गीतिः)

अन्ये कुचमुखविपुलासु गीतिकुशलासु जघनचपलासु।
सक्ता हरावसक्तास्त्वधोमुखा[163] यान्ति दुर्गतिं मूढाः ॥

(महाविपुला गीतिः)

अन्ये तु गीतिरम्याः विना महाचपलजघनविपुला स्त्रीः।
[44] भगवन्तमेव संसाररोगवैद्यं व्रजन्ति शरणमिव ॥[164]

(जघनविपुला महाचपला गीतिः)

एवमन्या[165] द्रष्टव्याः।

॥ ४ ॥ अर्धे वसुगणा आर्यागीतिः ॥ ३२ ॥

गाथायाः गीतीनां चार्धे वसुगणे वसवोऽष्टौ गणा यस्मिन् सा त्वार्यागीतिर्नामार्या भवति। तत्रापि गाथादीनां पूर्वार्धे अष्टगणे मुखार्यागीतिः, उत्तरेऽर्धे जघनार्यागीतिः, उभयोर्महार्यागीतिरिति सङ्केतः। शास्त्रान्तरे पुनरासां पृथक् संज्ञा उक्ताः[166]। उक्तया गीत्या सहार्यागीतिः सा महार्यागीतिः। स च स्कन्धः।[167] एषैव वा गाथया सह साऽवस्कन्धा उपगीत्या सह सोपस्कन्धा योद्गीत्या सह उत्स्कन्धा। या मुखार्यागीतयो जघनार्यागीतयश्च, ताः सङ्कीर्णा इति। एवं गाथादीनां

(157) A : सा च। (158) A drops गीतयः। (159) A : क्रतुकर्णी। (160) M : दीपश्च। (161) M : सुशान्ते। (162) A : सभाज्य मानेन ; S : सभाजयमाने। (163) A : स्मरातुरा। (164) M & S शरणमिमं। (165) A adds अपि। (166) A drops उक्ताः। (167) M & S drop the sentence.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भेदैश्चतुःषष्ट्या पूर्वापरोभयार्धभेदेन अन्वयात्[168] प्रत्येकं त्रिधा इति अष्टोनशतद्वयमार्यागीतिप्रकाराणाम् । गाथाभेदाश्चतुःषष्टिरिति द्वे शते षट्पञ्चाशच्चार्या[169]भेदाः। एते च महाप्रभेदा एतेषामेकैकस्मिन्नपि प्रस्तीर्यमाणे[170] एकैका कोटिः सम्पद्यते। तत्र पथ्यागीतिर्महार्या[171] गीतिः —

कुर्वन्नार्यागीतिं सदात्मनि सनातनं हरिं भगवन्तम् ।
पश्येद्दान्तः शान्तः क्षान्त उपरतः समाहितो भूत्वेति ॥

मुखविपुला मुखचपला[172] गाथामुखार्यागीतिः —

भगवन्तमेव साधिष्ठ[173]वंशजं स्तोष्यतां[174] पथि विपन्मा भूत् ।
इति खल्वार्यागीतिं कुर्वन्ति मनोरथमापन्नाः ॥

जघनविपुला जघनचपलोद्गीतिः जघनार्यागीतिः—

एवञ्चार्यागीतिं कुर्वन्तीव[175] महामनोराज्ये ।
धर्मार्थकाममोक्षेषु वर्तिनीं महिषीमन्यतमस्मिन्निति ॥[176]

महाविपुला महाचपलोद्गीतिर्महार्यागीतिः —

वक्ष्यामि तेन धर्मार्थकाममोक्षानि ह्योदाहरणे ।
[45] वाचं ममोपशृण्वन्तु पुत्रकस्येव वल्गुमार्यागीतिम् ॥

एवमन्येऽपि प्रकारा द्रष्टव्याः । इत्यार्याजातिः ।

अथ निर्गणजातयोऽत्राधिक्रियन्ते—

॥ ४ ॥ वैतालीयं द्विः स्वरा अयुजो युग्वसवो र्ल्गः ॥ ३३ ॥

'ल' इत्यनुवर्तते 'पाद' इति च। द्विः स्वराः द्विःष्कृताः सप्तलघवः चतुर्दशमात्रा इति यावत् । अयुक्पादः प्रथमस्तृतीयश्च । युक्पादः द्वितीयश्चतुर्थश्च द्विर्वसवः षोडशमात्राः स्युः। सा वैतालीयं नाम जातिः। आस्वेव चतुर्दशसु च मात्रासु कश्चिन्नियममाह। 'अन्त र्ल्गं' इति ।

अन्ते पादानां 'रलगा'[177] एव नियमेन कार्याः।[178] र-गणो मध्यलघुः।[179] अत्र ग्लावित्यधिकाराद्गुरवो लघवश्च यथाक्रमं प्रयोक्तव्याः। तत्रापि 'लौ स' इत्युपतिष्ठते। तत्रापि द्वयोर्मात्रयोः स्थाने एको गुरुः स्यात्—

महति तपसि सक्तचेतसो-
ऽतिधन्याः सन्त्यनेकसम्पदः ।
शुक्लाः प्रकटास्थिपञ्जरा
वैतालीयतनुं वितन्वते ॥

(168-69) A drops the lines. (170) A प्रस्तार्यमाणे। (171) A : मुखार्या। (172) M drops मुखचपला (173) M : यविष्ठ। (174) A M & S : नो सतां। (175) A : कुर्वन्ति न। (176) A : सदान्यतमस्मिन् ; M : सदान्यस्मिन् स्तुर्यादिति ; S : महिषीं मतस्थिरा। (177) A : लघुर्गुरुश्च। (178-79) A drops the words.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ४ ॥ गौपच्छन्दसिकम् ॥ ३४ ॥

अन्त इत्यनुवर्तते।[180] एषामेव वैतालीयपादानामन्तेऽन्योऽपि गुरुरेको भवेत् सा चौपच्छन्दसिकं नाम जातिः—

पश्यत्सु परेषु मीलिताक्षाः
निभृताङ्गाश्च रहस्यमीष्टचेष्टाः।
चरितं परिमोहनं परेषा-
मौपच्छन्दसिकं खलाश्चरन्ति॥

॥ ४ ॥ आपातलिका भौ गौ ॥ ३५ ॥

आस्वेव चतुर्दशसु षोड़शसु च मात्रासु अन्ते भो गुरू च द्वौ नियतौ स्युः। सा आपातलिका नाम जातिः—

अधन[181] व्रतिनोर्दिवमेको
यास्यति चरितैर्दुर्गतिमन्यः।
सम्प्रति भैक्षं चरतो द्वा-
वापातलिका निष्कसितान्ता॥
आपातलिका स्थालीत्यर्थः॥

[46] ॥ ४ ॥ शेषे परेण युङ् न साकम् ॥ ३६ ॥

वैतालीयादीनां पादान्ते 'लगौ' इत्यादि नियमः कृतः। अयुक्पादस्यादौ षण्णां मात्राणां युक्पादस्य चाष्टानां नियमो न कृत इत्यारम्भः। शेषे पदादौ परेण लघुना परया मात्रया युग्लघु द्वितीयश्चतुर्थः षष्ठश्च। न साकं न सहैकीभवति। नैकेन गुरुणा युग्मां मात्रां परया मात्रया युञ्ज्यात्। तयोः स्थाने नैको गुरुः स्यादित्यर्थः। पूर्वया[182] तु युञ्ज्यादेव। तथा च—निधिन्नस्यन्त्यथ नैक्यसम्पदः[183] इत्यादि कृते—

॥ ४ ॥ षट् चामिश्रा युजि ॥ ३७ ॥

चकारो नेत्यनुकर्षणार्थः। युक्पादे द्वितीये चतुर्थे चाद्यास्वष्टसु मात्रासु षण्मात्रा अमिश्रा गुरुणैकीभूता[184] न कर्तव्याः। निरन्तराः न षट् लघवो कर्तव्याः। अयुजि तु[185] क्रियन्ते एव। तथा च 'महति तपसि' इत्युक्तम्।

॥ ४ ॥ पञ्चमेन पूर्वः साकं प्राच्यवृत्तिः ॥ ३८ ॥

युजीत्यनुवर्तते। पञ्चमेन लघुना पूर्वो लघुश्चतुर्थः सहैकीभवेत्। युजि पादे चतुर्थपञ्चम्यौ मात्रे एकेन गुरुणाऽधिक्रियेयाताम्। प्राच्यवृत्तिर्भवति। 'शेषे परेण युङ् न साकम्' (IV.36) इत्यस्यायमपवादः॥

(180) A omits the sentence. (181) M: अयनं। (182) M: पूर्वाया (183) A: धन्याः सन्त्य -सनैकसम्पदः (184-85) A drops the words.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ४ ॥ अयुक् तृतीयेनोदीच्यवृत्तिः ॥ ३६ ॥

अयुजः पादस्य तृतीयेन लघुना पूर्वो द्वितीयः सहैकीभवेत् उदीच्यवृत्तिः ॥[186]

॥ ४ ॥ आभ्यां युगपत् प्रवृत्तकम्[187] ॥ ४० ॥

आभ्यां लक्षणाभ्यां युगपदेकत्र कृताभ्यां प्रवृत्तकं भवति। युजोः पादयोर्प्राग्वद्ग्रहणमिति।[188] आभ्यां प्रवृत्तकमित्येतावद्वक्तव्यमिति। पुनर्युगपद्ग्रहणं [47] क्वचिदयुक्पादविलक्षणानां प्रवृत्तिं सूचयितुम्। तेन विपुला[189] आर्यागीतिचारुहासिन्यादिषु अयुक्पादविलक्षणप्रवृत्तिसिद्धिः। एतानि प्राच्योदीच्यवृत्तिप्रवृत्तकानि वैतालीयादिभिः सहैव भवन्ति। तेन तानि नव वैतालीयाद्यास्तिस्र[190] इति द्वादश। तत्र वैतालीयप्राच्यवृत्तिः—

न विपन्ने च लोकगर्हणीयप्राच्यवृत्तिमुपजीवता नृणाम्।
अविवादमगर्हितां बुधैः पितृपैतामहपरम्परागताम्॥

औपच्छन्दसिकोदीच्यवृत्तिः —

उदीच्यविषयेषु मानवानामेतेनैव निरूप्यते प्रवृत्तिः।[191]
यदेष सविताऽप्युदीच्यवृत्तिः मीनं मेषवृषौ मृगञ्च भुङ्क्ते॥

आपातलिकाप्रवृत्तकम्—

स हास्यमुपयास्यति लोके यो रमेत वनितासु तपस्वी।
प्रवृत्तकमसद्वर्गयोग्यं चापलादिव चरन् पलिताङ्गः॥

आपातलिकाप्राच्यवृत्तिः —

जातह्रीका बहुरागां[192] प्राच्यवृत्तिमनुचिन्त्य बुधाः स्वाम्।
बाल्ये यत् सत्स्ववहेलं[193] ग्राम्यवागनुचितं च कुवृत्तिम्॥

कैश्चिदुपपातलिकेत्यस्याः संज्ञोक्ता॥

॥ ४ ॥ अयुक् चारुहासिनी ॥ ४१ ॥

वैतालीयादीनामयुक्पादलक्षणं श्लोकस्य चतुर्ष्वपि पादेषु स्यात्। सा चारुहासिनी जातिः। अयुजश्च पादस्य लक्षणद्वयमुक्तम्—मात्राद्वयस्यासत्त्व[194]मुदीच्यवृत्तित्वञ्च। तद्यदि चत्वारोऽपि पादा न्यूनमात्रा वोदीच्यवृत्तिलक्षणा वा उभयात्मका वा स्युः चारुहासिनी सा स्यात्। सा च वैतालीयादिषु प्रत्येकं त्रिधा त्रिधेति नवधा स्यात्। वैतालीयादयश्च द्वादशेत्येकविंशति प्रकाराः। तत्र वैतालीयादिपादैर्न्यूनमात्रैर्यथा—

दशनद्युतिचारुहासिनी स्तनविनतवलग्नमन्थरा।
विघ्नस्तपसः सुराङ्गना [48] तेनानुमिता[195] फलोन्नतिः॥

(186) A adds भवति। (187) M: प्रवर्तकम्। (188) A: प्राच्यवृत्तिलक्षणमिति। (189) A omits विपुला। (190) M: चतस्र (191) A; वृत्तिः। (192) A: धुन्वन्ति हि या मुहुरङ्ग। (193) M & S: अवतेयं। (194) A: मात्राद्वयन्यूनत्वं। (195) A & S: तेनानमिता।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एतामुत्तरान्तिकेति केचित्। अथ सोदीच्यवृत्तिलक्षणैः—

बभूव जनकोऽपि यां वधूं निरीक्षितुमनुदिशं चतुर्मुखम्।

न साऽपि शशि[196] चारुहासिनी निरीक्ष्यते मुनिभिस्तपस्विभिः॥

दक्षिणान्तिकेत्येके। अथोभयात्मकैः पादैः —

तपोविपरिणाम[197] एष यद्वनानि विपुलानि बान्धवाः।[198]

वधूश्च मदचारुहासिनी परञ्च कुशलं विपश्चिताम्॥

एवमौपच्छन्दसिकापातलिकयोर्द्रष्टव्यम्। अथापातलिकापादैर्न्यूनमात्रैः —

हा तात हे भ्रातः पुत्रावित्युक्तगिरां नरकेषु।

स्मरत नराणामघभाजां चरत च[199] धर्मं दुरितारिम्॥

अवपातलिकेत्येके। चारुहासिनी नाम युग्मलक्षणत्वात् युग्मेष्वपि पादेषु निरन्तराः पल्लघवः प्राप्यम्॥

॥ ४ ॥ युगपरान्तिका ॥ ४२ ॥

वैतालीयादीनां युक्पादलक्षणं सर्वेषु पादेषु स्यात्। सा चापरान्तिका। युक्पादलक्षणं द्विविधम्—मात्राद्वयस्याधिक्यं प्राच्यवृत्तित्वञ्चेति। तद्यदि मात्राधिका वा सा प्राच्यवृत्तिलक्षणा वोभयात्मिका वा पादाः, तदाऽपरान्तिका। एषा पूर्ववन्नवधेति त्रिंशत्प्रकारा वैतालीयादीनाम्। तत्र वैतालीयपादैर्मात्राधिकैर्यथा—

न मुनिर्लोचनगोचरो वसेद्वनितानां मदलोलचक्षुषाम्।

भूत्वा ता हि[200] किलापरान्तिकाः तच्चित्तं लघूकर्तुमीशते॥[201]

एषाऽपि दक्षिणान्तिकेत्येके। अथ सा प्राच्यवृत्तिलक्षणैः —

न परिदृष्टजीवितक्षया नोपलब्धविभवाऽपरान्तिका।

कामुकीव[202] दृष्टगर्हणा किन्तु मोहयति केवलं जनम्॥

पूर्वान्तिकेति केचित्। अथोभयात्मकैः —

या परान्तिका सा परकान्ता सा न तस्य तप एव रुणद्धि।

अपि तु कीर्तिमपमार्ष्टि मतिञ्च प्राणमप्यवरुणद्धि कदाचित्॥

उत्पातलिकेति केचिदिति।

[49] अथ मात्राधिकैः पादैः —

क्व मुनिर्भवनेष्वाप्तवासः[203] क्व च वनितास्तनतारविहारः।

जहिहि वरारोहास्व[204] नुषङ्गं यदि तपसे स्पृहयेत्तव चित्तम्॥

नलिनमिति केचित्। शेषाश्च द्रष्टव्याः।

(196) A drops न सापि शशि। (197) M: तयोर्विपरिणाम। (198) S: चाधिपाः। (199) M: विचरत। (200) M: तर्हि। (201) M: लघुमुख्या चित्तान्यपहर्तुमीशते। (202) A: कामुकी स; M: कामुकी न। (203) A: मुनिवनेषु प्रस्तरवासः; M: भवनेष्वास्तरवासः। (204) A: परासु स्त्रीषु।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अयुग्मेष्वपि पादेषु यथायोगं 'षट् चामिश्रा युजी'ति द्रष्टव्यम्। युग्मपादलक्षणत्वात् अपरान्तिका-नामपि च—

स तपस्यति[205] यस्य योषितां नयनश्रीर्न करोति कौतुकम्।
अपि तापघना[206] सुवर्चला कुसुमश्रीरिव सुप्रबोधिता॥

इतीदमर्धसमाधिकारे सुवर्चलेति केचित्। अन्ये तु प्रबोधितेति नामेति। अस्मिंस्तु शास्त्रे वैतालीय-प्रकार एवार्धसमाधिकारः स्यात् सूत्राभावात्। तथा—

अलका बहुका वराङ्गनानां कुहनालीनतमा[207] मुहुर्विमुक्ताः।
विमलद्युतिमेदुराः पुमांसः हृदयस्थास्तपसो निवर्तयन्ति॥

इदमपि तत्रैवार्धसमं विमलद्युतिरिति नाम वृत्तमिति केचित्। अस्मिन् शास्त्रे औपच्छन्दसिकमेव। इति वैतालीयजातिः॥

॥ ४ ॥ गन्ता द्विर्वसवो मात्रासमकं लनवमः ॥ ४३ ॥

लः, पादः, शेषे परेण युङ्नेति चानुवर्तते। गन्ता गुर्वन्ता द्विर्वसवः द्विष्कृता अष्टौ लघवः षोडशमात्रा इति यावत्। ता एकपादे स्युर्मात्रासमकं नाम जातिः। तत्र नवमो लघुरेव। नवमी मात्रा लघुनैव क्रियते न गुरुणा। अत्र तुल्या एव चत्वारोऽपि पादाः—

तिष्ठतु तावद्द्विपतां सुकृतं
सुकृतकृतं लघुचपलं[208] प्रेत्य।
यशोऽप्यधुनाऽपि मुहुरुज्ज्वलतः
का वा मात्रासमकं किं वा॥

यद्यपि 'गन्त' इति युग्मयोर्गुर्वन्त [50]-त्वं सिद्धमेव, तथाप्ययुग्मयोर्न सिद्धम्। उक्तम्। तेन चतुर्णां पादानामन्ते द्वयोर्मात्रयोः स्थाने गुरुरेकोऽवश्यं कर्तव्यः। अत्र गणैर्विधानाभावेऽपि चतसृभिर्मात्राभिरार्याणामिव गणमभ्युपगम्य विवेक उच्यते। 'शेषे परेण युङ् न साक'मित्यधिकारात् सर्वत्र जगणो न कर्तव्यः। तत्र पादानामाद्यो गणश्चतुर्धैव भवति। द्विगो गान्तो गादिश्चतुर्लघुश्चेति। द्वितीयश्चेति चित्रा-नवमश्चेति चतुर्लघुत्वे संज्ञान्तरस्य वक्ष्यमाणत्वात् त्रिधैव भवति। नवमस्य लघुत्वनियमात् गान्त एव चतुर्थो गन्ता इत्युक्तत्वात्। 'द्विगो गान्तश्चे'ति॥

॥ ४ ॥ द्वादशश्च वानवासिका ॥ ४४ ॥

एतास्वेव लघुनियमासु द्वादश्यपि मात्रा लघुरेव स्यात्। सा वानवासिका नाम—

वास्यत एव स्वयमपि दूरा-
द्वातेन मही विकचसुमनसाम्।
एवं यशसा भुवि सुकृतानां[209]
व्याप्यत एव स्वयमपि नभः[210]॥

(205) A : स च पश्यति। (206) M & S : अस्त्रीति घना। (207) A : कुटिला नीलतमा। (208) M : लघुमचलं। (209) A : सुकृतरत नां। (210) A : स्वयमखिला भूः ; M : स्वयमपि लाभः।

7

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अस्यास्तृतीयः सर्वलघुरेव। केचित्तु गुरुमध्यमपीच्छन्ति। तथाऽपि विश्लोके गुरुमध्यं द्वितीयं चित्रायां तृतीयश्च। नैतदाचार्यस्य पिङ्गलनागस्य मतं, यतः शेषे परेण युङ् न साकमित्यनुवर्तते। तच्चात्रायुङ् न जित्यत्र (IV. 36) ग्रहणेन सिद्धम्। तद्धि परस्तादनुवृत्तिं वारयदितरेषामनुवृत्तिं सूचयति। तस्मादेते प्रकाराः यदि कथञ्चित् साध्याअत्रासिद्धं गाथेति (VIII.1) द्रष्टव्यः॥

॥ ४ ॥ विश्लोकः पञ्चमाष्टमौ ॥ ४५ ॥

'ल' इत्यनुवर्तते। पञ्चम्यष्टमी च मात्रे लघुरेव स्याताम्। सा च जातिर्विश्लोको नाम। शेषं यथाप्राप्तम्—

जीवति न स भुवि नापि परतो न
च यः [51] सुखयति न स सुखी वा स्यात्।[211]
विद्याधनबललक्ष्म्यादिमतां
स्तवने विजहति यं विश्लोकम्॥

अत्र द्वितीयः सर्वलघुरेव तृतीयो त्रिधा द्विगो गान्तो गादिश्चेति[212]॥

॥ ४ ॥ चित्रा नवमश्च ॥ ४६ ॥

नवमी पञ्चम्यष्टमी च मात्रा लघुरेव स्यात्। सा चित्रा नाम। द्वादश्या मात्राया लघुत्वेऽपि चित्रैव स्यात् न वानवासिका, लक्षणगौरवात्—

इन्दुमणिरिव भवतु तपसि रुचिः
रुचिमपि यश इव विसृजतु विशदाम्।
अथ च स्फुट इव शशिनि कलङ्किनि
चित्रा रुचिरपि विटपच्छायैः॥

अस्या द्वितीयः सर्वलघुरेव तृतीयो द्विधा गन्तः सर्वलघुश्चेति॥

॥ ४ ॥ परयुक्तेनोपचित्रा ॥ ४७ ॥

नवमेन परयुक्तेन नवमीदशमीमात्रयोरेकेन गुरुणा करणे उपचित्रा—

असमं सुषमं कुर्वन्ति खलाः
सन्तमसन्तं युक्तमयुक्तम्।
दिग्धा यशसा धर्मरताना-
मुपचित्रा इव भित्तिकवर्णाः[213]॥

अस्या द्वितीयस्त्रिधा—द्विगो गन्तो गादिश्च। तृतीयो द्विधा—द्विगो गादिश्चेति॥

(211) A : न स्वात् सुखयति न स्वसुखभाक्। (212) A & M : द्विधा द्विगो गादिश्च। (213) A : भित्तिषु वर्णाः ; M : भित्तिवर्णाः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ४ ॥ एभिः पादाकुलकम् ॥ ४८ ॥

एभिर्मात्रासमकानां पादैर्मिलितैः पादाकुलकं नाम जातिः—

अनिशं मीलितशुभदशदिक्कः[214]
सुकृतौ दोषोऽभ्युदिततमो घ्नन्।
लोकं भुवि निजपादाकुलकं
नमयति रविरिव यशसोद्गच्छन् ॥

मात्रासमवानवासिकाविश्लोकचित्रापादैरिदम्।

गुरुभिर्लघुभिश्चोदितरूपान्
साहस्रीभिः कविवाग्भिश्च।
सुकृतौ सुकृतैः कुरुते श्लोकान्
कविरिव पादाकुलकाद्यर्घम्[215] ॥

तत्रोपचित्राया आद्यः पादः। अन्ये [52] मात्रासमकस्य। एवमन्यान्यपि द्रष्टव्यानि। शतानि विंशतिश्च पादाकुलकानि ॥

॥ ४ ॥ गीत्यार्या लः ॥ ४९ ॥

एता एव षोड़शमात्रा लघव एव स्युः। न गुरुभिः क्रियेरन्। गीत्यार्या नाम स्यात्।

सुत इह सति भुवि पितृगुणगणभृति
मृतमपि जनमभिदधति न मृत इति।
यशसि च शमदमलघुनिततमिति च
तदचलधृतिरिह तप उपचिनु पुरु ॥

ननु तद्येषा किमिति मात्राभिर्लक्ष्यते। नियताक्षरसंख्यत्वादक्षरैरपि लक्षयितुं शक्यते। वृत्तप्रकरणे पठितव्येति। सत्यम्। 'शिखा विपर्यस्तार्धा' (IV.50) इत्यत्र षोड़शमात्रास्थाने अष्टानामेव ग्रहणं यथा स्यादिति। अन्यथा षोड़शाक्षरस्थाने षोड़शैव गुरवः स्युः ॥

॥ ४ ॥ शिखा विपर्यस्तार्धा ॥ ५० ॥

गीत्यार्याया एवार्धं विपर्यस्येत। गुरुभिः करणं लघुभिर्विहितायाः। सा शिखा नाम* पुनर्विशेषमाह—

॥ ४ ॥ लः पूर्वश्चेज्ज्योतिः ॥ ५१ ॥

विपर्यासश्च।[216] पूर्वो भागः पूर्वमर्धं लघव उत्तरमर्धं गुरवश्च। सा ज्योतिर्नाम शिखा—

तृणमिव दहदघफलमुरुशिखमिह
दिशि दिशि ततयश उपचितमपि कुरु।[217]
दीपज्योतिर्हस्ते कुर्या-
न्नेतु'[218] लोकान् प्रत्यक्षेऽपि ॥

(214) A: दर्शनकः ; M: दशनकः। (215) A: पादाकुलकाभिज्ञः। (216) A: विपर्यासे च पूर्वो।
(217) A: उरुरुचि तत उरु।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ४ ॥ गश्चेत् सौम्या ॥ ५२ ॥

[53] पूर्वो भागो गुरवः अपरो भागो लघवश्चेत् सौम्या नाम शिखा—

कीर्तिश्चैषा सेर्ष्येऽक्रूरे
भाति क्रूरा सौम्ये सौम्या ।
सुखयति शशिरुचिरवनतजनमपि
परमतिहृदिशयद्वमपि दहति च ॥[219]

यद्यपि आर्यादिषु[220] सर्वत्र पादान्त एव यतिस्तथापि मात्रासमकादिषु मात्रास्वष्टासु क्रियमाणास्वपि कासुचिद्भवति[221] । तदिदं द्विर्वसव इति सूचितम् । अन्यथा षोडशेति ब्रूयात् । इति मात्रासमकादिजातिः ॥

॥ ४ ॥ चूलिकार्धमेकोनत्रिंशदन्ते ग् ॥ ५३ ॥

अर्धमेकोनत्रिंशन्मात्राः स्युः चूलिका नाम स्यात् । अन्ते द्वयोर्मात्रयोः स्थाने एको गुरुः स्यात् । अन्ते गुरुत्वस्य नित्यप्राप्तस्य पुनर्वचनं परिसंख्यार्थम् । अन्त एवैकस्मिन् गुरुत्वमन्यत्र लघुत्वञ्चेत्यवधारणम् । अर्धस्य विधानात् नात्र पादव्यवस्था । तत एवैषाऽक्षरैर्लक्षयितुं शक्यापि न लक्षिता । अक्षरलक्ष्येषु हि वृत्तेषु पादव्यवस्था नियता । अनुक्तविशेषाणामार्याप्रकृतित्वादुपगीतिमार्यागीतित्वेन कार्येति ।[222] केचिदेतामतिरुचिरेति—

फलमपि सुकृतिजनमभिहितमुरुसुखमि-
ह यवति भुवि पृथुयशः ।
पुनरपि फलदुरु भगवति मधुमथि
घटयति सुमतिमतिरुचिराम् ॥

चित्रजातिर्नामैषा । अस्यामेव द्विपदीप्रकाराः[223] ।

॥ ४ ॥ सा ग्येन न समा लां ग्ल इति ॥ ५४ ॥

अथ यदि कश्चिद्वदेदार्यां वैतालीयादिकं वोदाहृत्य— अस्मिन् श्लोके कति गुरवः कति लघव इति—तत्र-स्थितान् वर्णांस्तेनैव संख्यापयेत् । ते यावन्तः संख्यया आर्यादीनां विहिताभ्यो मात्राभ्यो हीयन्ते, तावन्तो गुरवः शिष्टा लघवः । तद्यथा—वन्दे मातरमार्याम् इत्यत्र चतुस्त्रिं-[54]-शद्वर्णाः सन्ति । अस्याश्चार्याया विहिताः सप्तपञ्चाशन्मात्राः । ताभ्य एते शोधितास्त्रयोविंशत्या हीनाः । ततस्त्रयोविंशति गुरवोऽत्र शिष्टा एकादश लघवः । तदाह—सा ग् गुर्वी संख्या गुरूणां संख्येति यावत् । काऽसौ ? येन येन प्रमाणेन न समाः । के ? ग्लः गुरवो लघवश्च । श्लोके स्थिता वर्णाः । केषां न समाः ? लां मात्राणामार्यादीनां विहिताभिर्मात्राभिरित्यर्थः । शोध्यन्ते चैतेन गुरुलघुज्ञानेनार्यादयः ॥

इति भगवतो यादवप्रकाशस्य कृतौ पिङ्गलनागच्छन्दोविचितिभाष्ये चतुर्थोऽध्यायः ॥

(218) A & S : जेतुं । (219) The second half of the verse is corrupt in A, M, T & S. Hence the emendation. (220) M & S : शिखादिषु (221) A : क्रियमाणास्वधिकां शोभामावहति । (222) A drops the sentence. (223) M drops the two sentences.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[55] अथ पञ्चमोऽध्यायः

॥ ५ ॥ वृत्तम् ॥ १ ॥

अथ वृत्तच्छन्दांस्यधिक्रियन्ते ।[1]

यानित ऊर्ध्वमनुशिष्यामः श्लोकांस्ते वृत्तानीति वेदितव्याः। वृत्तशब्दोऽयं वर्णनियमेन लक्ष्येषु श्लोकेषु प्रसिद्धः ।[2] वर्णनियमश्च द्विधा—संख्या, गुरुलघुविन्यासश्चेति। पूर्वं श्लोकाः मात्रानियमेन लक्षिततत्वान्मात्राच्छन्दांसि। लक्षणञ्च वहूनां गुरुलघुविन्यासप्रकाराणां सामान्येन प्रवृत्तमिति जातिच्छन्दांसीत्युच्यन्ते ।[3] [4]यत्रापि वर्णविन्यासनियमः—यथा गीत्यार्याचूलिकार्यादीनाञ्च प्रस्तारे क्रियमाणे एकैको विशेषस्तत्र वृत्तशब्दो मुख्योऽन्यत्र गौण एव। परे पुनः श्लोकाः वर्णविन्यासनियमेन लक्षिततत्वाद् वृत्तानि। इतरेष्वपि यत्र लक्षणं सामान्येन प्रवृत्तं, यथा पदचतुरूर्ध्वं गायत्रीत्यादयश्च, तत्रापि जातिशब्दो युक्त एव। यस्माद[5]त्र वर्णसंख्या नियता, तत इह 'लः समुद्रा गण' इति नाश्रीयते ॥

॥ ५ ॥ सममर्धसमं विषमञ्च ॥ २ ॥

तत्र वृत्तं सममर्धसमं विषमञ्चेति त्रिधा भवति। यत्र श्लोके चत्वारोऽपि पादा वर्णसंख्यया गुरुलघुविन्यासेन च समानाः तत् समं वृत्तम्। यत्रार्धमर्धेन समं प्रथमतृतीयौ पादौ परस्परसमौ द्वितीयचतुर्थौ परस्परसमौ तदर्धसमम्। आभ्यां विपरीतं विषमम्। द्विधा च विषमार्धसमे भवतः, महाविषमं वितानविषमं, महार्धसमं वितानार्धसमञ्चेति। तत्र पादानामक्षरसंख्यया न्यूनाधिकभावान्महाविषममहार्धसमे भवतः। समाक्षरसंख्यानां तु पादानां [56] गुरुलघुमात्रवैषम्येन[6] विन्यासः—वितानविषमवितानार्धसमे।

तत्र वितानाभिप्रायेणाह—

॥ ५ ॥ समं तावत्कृत्वः कृतमर्धसमम् ॥ ३ ॥

समवृत्तानां संख्यां तावत्कृत्वः कुर्यात्। समवृत्तसंख्ययैव गुणयेत् साऽर्धसमवृत्तानां संख्या।

तद्यथा—एकाक्षरस्य छन्दसः द्वे समवृत्ते इति स्थितमष्टमेऽध्याये। द्वयोस्तावत् कृत्वःकरणात् चत्वारि भवन्ति ॥

॥ ५ ॥ विषमञ्च ॥ ४ ॥

पुनस्तान्यपि तावत्कृत्वः कुर्यात्। तावन्ति विषमवृत्तानि। चत्वार्यपि तावत्कृत्वः कृतानि चतुर्गुणितानि षोड़श भवन्ति ॥

(1) M omits this *sūtra* and the following sentence of the Commentary. (2) A : प्रवृत्तः। (3) A & M : चोच्यन्ते। (4) A & M : तत्रापि। (5) M : तस्मात्। (6) M : वैषम्यमात्रेण।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ५ ॥ राश्यूनः ॥ ५ ॥

तावत्कृत्वः कृतञ्च सर्वं राशिना 'एकेन' हीनमेव संख्या भवति, न सर्वम्। तेन द्वयोर्द्विष्करणात् यानि चत्वारि तेभ्योऽधिकं राशिमपनयेत्। द्वे अवशिष्येते। तेनैकाक्षरस्य छन्दसो द्वे अर्धसमे। तथा चतुर्णां चतुष्करणाद् यानि षोडश तेभ्यश्चतुष्कं राशिमपनयेत्। द्वादशावशिष्यन्ते। तेनैकाक्षरस्य विषमानि द्वादश। एवमन्येष्वपि छन्दःसु समवृत्तानि। समवृत्तानि तावत्कृत्वः कृत्वैकं राशिमपनयेत्। तावन्त्यर्धसमानि। अर्धसमवृत्तान्येव तावत्कृत्वः कृत्वैकं राशिमपनयेत्। तावन्ति विषमाणि। यदा पुनः समानि तावत्कृत्वः कृत्वा राशिना नापनीयते तदा समार्धसमानां सर्वेषां मिलितानां संख्या। अत्रैव पूर्वस्यैव राशेस्त्यागे उत्तरस्य चात्यागे विषमार्धसमानां संख्या।[7] यथा पादाकुलकानाम्॥

[57] ॥ ५ ॥ ग्लिति समानी ॥ ६ ॥

इदानीं समवृत्तान्युच्यन्ते। सर्वेषु छन्दःसु युग्मसंख्येषु चतुरक्षरषडक्षरप्रभृतिषु गुरुर्लघुः पुनर्गुरुः पुनर्लघुरित्यादि छन्दसोऽक्षरसंख्याऽऽसमाप्तेरावृत्तौ समानी नाम वृत्तं भवति। सा लघू गौ ववापीति केचित्। इतिशब्दः प्रकारावृत्त्यर्थः। 'पादश्चतुर्भाग' इति न विस्मर्तव्यम्। तत्र गायत्री समानी—अर्थ-[8] सम्पदोऽत्र सन्ति किं समा न। धर्मकाममोक्षसिद्धयोऽर्थजा हि॥ अत्र समानीति सामान्यायां सत्यामपि संज्ञायां क्वचिद्विशेषसंज्ञाऽप्यस्ति। तद्यथा—उष्णिहि समानी विभूतिः। जगत्यां विभावरी वसन्तकवरी चामरी च। अतिजगत्यां हयप्लुता, अतिशक्कर्यां शुभमित्येका। अभिकृतौ दीपमालिकेति॥

॥ ५ ॥ ल्गिति प्रमाणी ॥ ७ ॥

लघुर्गुरुः पुनर्लघुः पुनर्गुरुरिति लघूपक्रमा चेदावृत्तिः प्रमाणी नाम वृत्तं भवति। अत्र गायत्री प्रमाणी[9] —गुणावरा च वा कुलप्रमाणयसौ। क्रियैव साध्यते गुणा हि साधवः॥ अत्रापि क्वचित् संज्ञान्तरम्। गमस्तिमालिकेति॥

॥ ५ ॥ वितानमन्यत् ॥ ८ ॥

आभ्यां समानीप्रमाणीभ्यामन्यत् सर्वं वृत्तजातं वितानसंज्ञं वेदितव्यम्। अन्यत्र महाविषममहार्धसमेभ्यो वितानमिति सामान्यायां सत्यामपि संज्ञायां, केषाञ्चिद्विशेषसंज्ञाऽप्यस्ति। तया सहैवोक्तेषु छन्दःसु समवृत्तानि वितानोदाहरणान्युच्यन्ते। अत्रोक्ते श्रीर्नामाद्यं वृत्तम्—या श्रीः। सा स्तात्॥ अथात्युक्ते स्त्री नामाद्यं वृत्तं पद्मं वा—स्त्रीणां मुख्या। पद्मा पायात्॥ द्वितीयं सुखं—सदा रमा। क्रियात् सुखम्॥ अथ मध्ये आद्यानि चत्वारि वृत्तानि क्रमा-[58]-न्नारी मदोद्यन्मृगी प्रवरश्च—का नारी लोकेऽस्ति। श्रीतुल्या रूपाद्यैः॥ रमायाः प्रसादे। न किं स्यान्मदोद्यम्॥ श्रीर्मृगी चञ्चला। बध्यते सद्गुणैः॥ कमलास्तवनात्। किमिहाप्रवरम्॥ जननीति केचित्।

अथ प्रतिष्ठायामाद्यानि सप्तवृत्तानि। कन्या व्रीड़ा समृद्धिः सुमतिः श्रीमल्लिका जया सुमुखी च—नीतिं हित्वा[10] प्राप्ता लक्ष्मीः। काले भोग्या कस्यैवान्यैः॥ अपि व्रीड़ां कुरुतेऽपि। विना नित्या कृता

(7) M : संख्यायाम्। (8) M : अन्य। (9) M omits this sentence. (10) S : भित्वा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लक्ष्मीः ॥ श्रीसमृद्धिः केरलादौ । केरलब्धा[11] नीतिमार्गाः ॥ सततं श्रीरचला स्यात् । सुमतिश्चेत्त-दुपाये ॥ श्रीमल्लिकामालां गले । बद्धां गुणैः कुर्यात् सदा ॥ नयाच्छ्रियो जया मताः । नयात् क्रिया फलोचिताः ॥ प्रभाणयेषा प्रसङ्गादुक्ता[12] । किं बहुना यस्य नयाः । तस्य सदा श्रीः सुमुखी ॥

अथ सुप्रतिष्ठायां त्रयोदश वृत्तम् । उदाहरणानि—वारेण भृगोः नन्दा सह चेत् । सर्वेष्वपि सा कार्येषु शुभा ॥ तृतीयं प्रीतिः —सौम्यवारेण स्याद्यदा भद्रा । सर्वकार्येषु प्रीतिरेव स्यात् ॥ चतुर्थं घनपंक्तिः —जयया सार्धं कुजवारश्चेत् । अतिसौख्यानां घनपङ्क्तिः सा ॥ षष्ठं—सदा तु रिक्ता दिनेशसूनौ । निहन्ति दोषाननुक्रमेण ॥ सप्तमम्—या खलु पूर्णा स्याद् गुरुवारे । सा फलपङ्क्तिं कर्मसु सूते । दशमम्— अभिजिति यश्चरति शुभम् । शुभनियतिस्तदभिमुखी ॥ एकादशम्—एवमादिके सूक्ष्णक्रिया । यातना श्रियो वागुरेव सा ॥

एवमुक्तादिषु समवृत्तानि । तान्येवैकैकोदाहरणानि च विशेषाभिः[13] संज्ञाभिः सहोक्तानि । गायत्र्यादिषु वक्ष्यन्ते विषमार्धसमानि च । अत्राद्यद्वितीयतृतीयचतुर्थपञ्चमादि प्रस्तारापेक्षया नष्टप्रत्ययेन बोद्धव्यम् । अथेदानीं वितानसंज्ञानामेव केषाञ्चित्तदा-[59]-नुष्टुभानां समविषमार्धसमानां साधारणैर्लक्षणैः साधारणः संज्ञाः प्रक्रियन्ते । तानि च सङ्कीर्णान्युच्यन्ते ॥

॥ ५ ॥ पादस्यानुष्टुब्वक्त्रम् ॥ ९ ॥

पादस्येति चानुष्टुबिति च वक्त्रमिति चाधिकारः । तेन वक्ष्यमाणलक्षणं पादस्य ।[14] छन्दश्चानुष्टुप् वक्त्रं वक्त्रसंज्ञकं वेदितव्यम् ॥

॥ ५ ॥ न प्रथमात् स्नौ ॥ १० ॥

अस्मिन्ननुष्टुबधिकारे सर्वस्य पादस्य प्रथमाक्षरादूर्ध्वं स्नौ गणौ न कर्तव्यौ ॥

॥ ५ ॥ वाऽन्यत् ॥ ११ ॥

स्नाभ्यामन्यन्मयरतजभादि[15] षट्कं प्रथमाक्षरादूर्ध्वं विकल्पेन भवतीति । किमर्थमिदम् ? सिद्ध एव विकल्पः । अन्यस्याप्रतिषेधात् युगपत् प्रयोगस्यासम्भवाच्च । क्व तर्हि व्यवस्थयाऽयं विकल्पः स्यात् ? तथाहि यस्य पादस्य चतुर्थादक्षरादूर्ध्वं[16] यगणः कृतः तस्य प्रथमाक्षरादूर्ध्वं षड्पि गणा भवन्ति । यस्य चतुर्थान्मगणस्तगणो वा तस्य प्रथमाद्रगण एव नान्ये । यस्य जगण[17]स्तस्य प्रथमाद्रगणो नित्यं न भवति । यस्य परिशिष्टा[18]श्चत्वारः रसभनाः प्रथमात्त एव गणाः प्रयोक्तव्याः । यैश्चतुर्थमक्षरं गुरुः स्यात् तैः सगणस्य निषिद्धत्वात् मयरा एव । तदेष श्लोकः —

मगणो तगणो न स्याज्जगणो सर्वदा न रः ।
यगणे षड्पि ज्ञेयाः शिष्टेषु मयरास्त्रयः ॥

प्राक् पदचतुरूर्ध्वादियं न्यायः सर्वत्रोन्नेयः ॥

(11) M : केरलाद्या । (12) A omits प्रसङ्गादुक्ता । (13) A : विशेषाभिसंज्ञाभिः (14) A : पादश्च । (15) A adds गण । (16) A : ज य । (17) A : ज य । (18) M : उपदिष्टाः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ५ ॥ यश्चतुर्थात् ॥ १२ ॥

वक्त्रमित्यनुवर्तते। पादस्य चतुर्थादक्षरादूर्ध्वं यगणः कर्तव्यः। तद्वृत्तं [60] वक्त्रम्। तत्र समवृत्तम्—वक्त्रं प्रधानमङ्गानां नेत्रं प्रधानमस्यापि। सामुद्रवीक्षणे तस्मात् मुख्यं मुखं च नेत्रञ्च ॥

अथार्धसमम्—त्रिगम्भीरस्त्रिविस्तीर्णः सूक्ष्मः पञ्चसु षड्दीर्घः। चतुर्ह्रस्वो दशोत्सेधो[19]रक्तश्चाष्टसु राजा स्यात् ॥

अथ विषमवक्त्रम्—नाभिः स्वरश्च[20] सत्त्वञ्च गम्भीराणि यथायोगम्। प्रशस्तञ्च विशालत्वं वक्त्रवक्षोललाटेषु ।[21]

॥ ५ ॥ पथ्या युजो ज् ॥ १३ ॥

पादस्य द्वितीयस्य चतुर्थस्य चतुर्थादक्षराज्जगणश्चेत् तदनुष्टुप् पथ्या नाम भवति। अयुग्मयोस्तु पादयोरविशेषादष्टावपि गणाश्चतुर्थाद्भवन्ति। तेषु मयरसाश्चत्वारो गुर्वन्तास्तजभनाश्चत्वारो लघ्वन्ताः। न ते युगपदयुग्मयोर्भवन्ति। तथात्वे 'सर्वतः सैतवस्य' (V.17) इति संज्ञान्तरस्य वक्ष्यमाणत्वात्। तेन यदि प्रथमे पादे लघ्वन्ताः कृतास्तृतीये गुर्वन्ताः स्युः। अथ तृतीये लघ्वन्ताः प्रथमे गुर्वन्ताः स्युः। गुर्वन्तास्तु युगपदेव उभयत्र भवन्ति। तत्र य-गणेन तावदुच्यते। तत्र विषमवृत्तत्वासम्भवादर्धसमा पथ्या यथा—नखान्यङ्गुलिपर्वाणि त्वग्दन्ता मूर्धजास्तथा। इयं पञ्चशरीराङ्गी सूक्ष्मा[22] पथ्याऽर्थदायिनी ॥

चतुर्थान्मगणे कृते षष्ठाक्षरादि पृथक्पदं कर्तव्यम्। त-गणे[23] तु पञ्चमाक्षरादि। आभ्यां विषमा पथ्या—दीर्घाणि जिह्वानासाक्षिहनु[24]बाहुस्तनान्तरम्। ह्रस्वं विदुर्जङ्घाद्वयं पृष्ठलिङ्गं शिरोऽस्थि च ॥

चतुर्थाद्रगणे भगणे वा[25] कृते पञ्चमाक्षरादि पृथक्पदं स्यात्। आभ्यां विषमा यथा—उन्नतानि घ्राण-वक्त्रगुह्यमध्यं कृकाटिका। वक्षः कक्षौ जत्रुनखाः पादपृष्ठं तथोदरम् ॥

चतुर्थाद्भगणे कृतेऽपि पञ्चमाक्षरादि पृथक्पदं न स्यादपि[26] [61] प्रथमाद्गणः कृतः। तद्यथा—तलेषु तालुन्यधरे जिह्वायां नयनान्तयोः इति।

चतुर्थात् सगणे कृते पदं पञ्चमाक्षरादि पृथगेव स्यात्। तद्यथा—पाणयोस्तले पदयोश्च गुह्ये चेच्छन्ति रक्तताम्। इति च।

तदेष श्लोकः —

षष्ठाक्षरादि मगणे कृते कार्यं पृथक् पदम्।
शेषे पञ्चमवर्णादि विहाय नजयान् गणान् ॥

इति। एषः पृथक्पदकरणन्यायो विपुलास्वपि चारयितव्यः। अयञ्च न्यायो 'धीः श्रीस्त्रीम्' (I.1) इत्यत्र धीरिति पृथक्करणादेव सिद्धः। तस्यान्यत्रोपयोगाभावात्।

(19) A : दशोत्सेध। (20) A : विवरश्च ; S : सतश्च। (21) A : ललाटञ्च। (22) A drops सूक्ष्मा। (23) M : र-गण। (24) M : जानु। (25) M omits भगणे वा। (26) M adds यदि ; A reads यदि in place of अपि।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ५ ॥ विपरीतैकीयम् ॥ १४ ॥

विपरीतैव पथ्यैत्यैकीयं मतम्। तेन पूर्वोक्तमयुक्पादलक्षणं युजोरयुजोर्युक्पादलक्षणं, संज्ञाऽपि विपरीतेति।

अर्धसमं यथा—अङ्गं रुक्षममांसलं चिपिटं वा शिरालं वा। यत्तद्दुष्टमतस्तनुर्विपरीतोत्तरा पथ्या॥

अथ विषमं—त्वक्स्नेहे शयनं सुखं सौभाग्यं नयनस्नेहे। अंसस्नेहे सुभोजनं स्वरः सौख्यं शिरःस्नेहे॥

॥ ५ ॥ चपलाऽयुजो न् ॥ १५ ॥

अयुग्मयोः पादयोश्चतुर्थान्नगणः स्यात्। चपला नाम वृत्तम्।

अर्धसमं यथा—'शङ्ख[27]तपत्रशिविकाहयहस्तिसमा रेखाः। हस्त्याः श्रियं दृढतरं चपलामपि बध्नन्ति॥

अथ विषमं—मणिबन्धादुदयते यन्मध्यमा[28]ङ्गुलिरेखा। न तं जहाति पुरुषं स्त्रियं वा चपलाऽपि श्रीः॥

अत्र युजो युगपल्लध्वन्ता न कार्याः। तथात्वे 'सर्वतः सैतवस्य' (V.17) इति संज्ञान्तरस्य वक्ष्यमाणत्वात्॥

[62] ॥ ५ ॥ विपुला युग् लसप्तमः ॥ १६ ॥

युक्पादो लघुसप्तमश्चेत् विपुला नाम स्यात्। अयुक् तु वक्त्रस्यैव[29]।

अर्धसमं यथा—अस्वेदकौ मृदू सोष्णावूर्ध्वरेखाङ्किततलौ[30]। पादौ नरस्य नार्या वा लक्ष्मीं विधत्तो विपुलाम्॥

अथ विषमं यथा—हस्त्याः पद्माश्च शस्त्राभाः रेखाः कुर्वन्ति धनिनम्। नारीं नरं तु सेनान्यं मीनपुच्छनिभाः यतिम्॥

॥ ५ ॥ सर्वतः सैतवस्य ॥ १७ ॥

सर्वेषु पादेषु सप्तमाक्षरं लघु भवति विपुलायाः सैतवस्याचार्यस्य मतेन। तत्र समं यथा—सैतवस्य पदस्थली स्त्री च पूजितलक्षणा। गन्तृ[31]वर्गमिमं सदा रक्षतो विपुलापदः॥

अर्धसमं—यल्लक्षणं पुंसि शुभं प्रायशो योषिताञ्च तत्। यत्राकृतिस्तत्र गुणाः सन्ति दोषा दुराकृतौ॥

अथ विषमं—शस्तं गात्रमरोमशं नाणु न स्थूलसक्थकम्। पीनौ वृत्तौ[32]स्तनौ घनावूरू च सनितम्बकौ॥ लसप्तम इत्युक्तत्वात् सर्वेऽपि लध्वन्ताः सर्वेष्वपि तत्र[33] चतुर्थाद्भवन्ति॥

॥ ५ ॥ भ्रौ न्तौ च ॥ १८ ॥

चतुर्थादित्येव। चकारात् 'सर्वत' इत्यनुकृष्यते। चतुर्थाद्भरनताश्च गणाः सर्वेषु पादेषु भवन्ति विपुलायाः। यथागणञ्च संज्ञा—भश्चेद्भविपुला, रश्चेद्रविपुला, नश्चेन्नविपुला, तश्चेत्तविपुला।[34]

(27) A : संख्या। (28) A : मध्यगा। (29) A omits अयुक् तु वक्त्रस्यैव, and reads : युक्पथ्यायामेव in its place. (30) A : कृतलौ ; M : करतलौ ; S : विवलौ। (31) A : गन्तु ; M : गन्त्र। (32) M omits वृत्तौ। (33) M adds here : भविपुलाः। (34) M omits the last two names.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत्र भविपुला समा—प्रदक्षिणावर्तविला[35] गभीरमध्या विपुला। सरोमराजी त्रिवली बधूपु नाभिः शुभदा ॥

अर्धसमं—उपैति मध्यं करभाद् या तर्जनीमध्यमयोः। महद्ददन्त्यायुरसौ रेखान्तमालम्बि च यत् ॥

[63] अथ विषमं—अङ्गुष्ठमूले प्रतता रेखाः स्थविष्ठास्तनयान्। दिशन्त्यणिष्ठा दुहितृः स्त्रीणां नराणाञ्च करे ॥

अथ रविपुला समा—पदयुग्मे गूढगुल्फे करयुग्मे गूढसन्धौ। घनदीर्घे स्वङ्गुलिके विपुला श्रीर्देहिनां स्यात् ॥

अथार्धसमं—मूलजन्या वाऽऽयता वा रेखाऽङ्गुष्ठे पर्वजा वा। धान्यवासो भक्ष्यभोज्यं स्त्रीपुंसाभ्यां ददाति च ॥

अथ विषमं[36]—रोमैकैकं कूपकेषु राज्ञां द्वे द्वे पण्डितानाम्। त्र्याद्यैर्निस्वा स्त्रीपुमांश्च तथा केशैश्चैतदाहुः ॥

अथ नविपुला समा—श्यामा मुखेन विपुला घोणेन किंचननता। स्निग्धच्छविश्च[37] वपुषा लावण्यभाक् च सुभगा ॥

अथार्धसमं—स्त्री याऽह्रीका कलहकृत् पृथ्वी दीर्घा कुलरिपुः। धनं ह्रस्वा हरति सा कुम्भाकारञ्च जठरम् ॥

अथ विषमं—लम्बः कुक्षिः श्वशुरहृत् ललाटं देवरे रिपुः। स्त्रीणां स्फिजौ पतिरिपू दीर्घा स्त्री भर्तृशुभहृत् ॥[38]

अथ तविपुला समा—उत्सेधवानूर्ध्वोष्ठको[39]यस्याः कचाः रुक्षाग्रकाः। सा वर्धयेन्नित्यं कलिं स्यात्तस्करी स्थूलैः रदैः ॥

अथार्धसमं—चलेऽक्षिणी श्यावप्रभे दौःशीलभाक् पिङ्गेऽपि च। बधूस्तथा स्यात् केकये शुष्के करे दुःखाधिका ॥

अथ विषमं—या स्त्री वने[40] क्रीडारता मार्गे कटेः संसक्तदृक्। नतांसका याति द्रुतं मयूरयोन्युग्रा च सा ॥

अस्मिन् सङ्कीर्णप्रकरणे सर्वत्र ग्लावित्यनुवर्तते। तेन पादानामाद्यमन्त्यञ्चाक्षरं गुरु वा लघु वा यथाकामं स्यान्मध्ये तु यथानियममिति सङ्कीर्णप्रकरणम् ॥

[64] अथ महाविषमाणि[41]—

(35) M reads शिखा in place of °विला। (36) M omits the following illustrative verse except for the last word, obviously due to haplology in the word स्त्रीपुमांश्च। (37) M adds here विपुला। (38) A : °भाक्; M : °भृत्। (39) M : °र्ध्वकायः। (40) A : जने। (41) A drops this sentence.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ५ ॥ प्रतिपादञ्चतुर्वृद्धया पदचतुरूर्ध्वम् ॥ १९ ॥

अनुष्टुबित्यनुवर्तते। प्रतिपादं चतुर्भिरक्षरैर्वृद्धया पदचतुरूर्ध्वं नाम। आद्यः पादोऽष्टाक्षर[42]श्चतुर्वृद्धया द्वितीयो द्वादशाक्षरस्तृतीयः षोडशाक्षरश्चतुर्थो विंशत्यक्षरः। अत्र विशेषवचनाभावाद् ग्लावित्यधिकारेण गुरूलघुवर्णावुपतिष्ठेते[43]। तयोश्च यथाकामं[44] विन्यासः।

केचित्तु आर्यायामिव गणरूपविन्यासमाहुः। अनुक्तविशेषाणामार्याप्रकृतिरनुक्तसंख्यानां समाक्षरता[45], अनुक्तयतीनां पादान्ते यतिर्मध्ये च यथाशोभमिति हि छन्दसो न्यायः —

करपदतलं पीनं
मध्या नता भ्रूर्वलिषु विषमा वा।
छिन्ना[46] ललाटरेखा छिन्नाभा नासिका यदि वा
यस्यासौ पदचतुरूर्ध्वमपि न हित्वा[47] चलत्यगम्यां स्त्रीम् ॥

अत्र पादानां व्यत्यासोऽपीष्यते। तेनेदं चतुर्विंशतिधा भवति। न्यासः—

अद्वपवि, अद्वविप, अपद्वि, अपविद्व, अविद्वप, अविपद्व एवं षट्। द्वअपवि, द्वअविप, द्वपअवि, द्वपविअ, द्वविअप द्वविपअ एवं षट्। पअद्वि, पअविद्व, पद्वअवि. पद्वविअ, पविअद्व, पविद्वअ, एवं षट्। विअद्वप, विअपद्व, विद्वअप विद्वपअ विपअद्व, विपद्वअ, एवं षट्। एवं चतुर्विंशतिधा भेदोऽस्य ॥[48]

॥ ५ ॥ गावन्त आपीडः ॥ २० ॥

एषामेव पादानामन्ते गुरू द्वौ चेदापीडो नाम [65] वृत्तं पदचतुरूर्ध्वं भवति। गावन्त इति वचनमन्येषां लघुत्वार्थं गावन्त एवेत्येतत् पदं व्याख्येयम्—

उपपति परिमृश्याऽपरकुलयुवतिरपि वतंसे। यदि हनुतलभुवि चुबुकभुवि विमलं[49] प्रभवति वसनजमथ[50] यदि करतलमपि पीतम् ॥

इदमपि चतुर्विंशतिधा ॥

॥ ५ ॥ गावादौ चेत् प्रत्यापीडः ॥ २१ ॥

आदौ चेत् पादानां गुरू द्वौ प्रत्यापीडः —

अङ्गुष्ठमतिचरति तर्जन्यपि-[हित][51]-मिव यदि वत[52]। ताः स्वस्त्रिय इव पतिजनमभिरमयितुमापीडमुपनिदधति[53] युवतय उपपतिशिरसि ॥

इदमपि चतुर्विंशतिधा ॥

(42) A adds तस्य। (43) M : गुरुलघुवर्णा उपतिष्ठन्ते। (44) M : यथाक्रमं। (45) A : सहस्राक्षरा। (46) A adds ततश्च before this ; M : भिन्ना। (47) M : वाचा ; S : भित्वा। (48) A & S both omit these permutations. We have rearranged the order found in M and T according to mathematical convention. (49) A : निमनं ; S : विमानं। (50) A : वासनज॰ ; (51) A : lacuna [ ] (52) A : पति ; S : यति। (53) A : आपीडकमुपनिदधाति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ५ ॥ प्रत्यापीड़ो गावादौ च ॥ २२ ॥

गावादावन्ते च यदा तदाऽपि प्रत्यापीड़ एव—यासां न भुवमनामा[54]पद्या स्पृशति न च पदकनिष्ठा। ताश्चानवरतमु[55]पपतिजनमनु[56]प्रत्यापीड़ं वरमुपनिदधति[57] युवतय उपकचबन्धाः॥ इदमपि तथा॥

अथ पदचतुरुर्ध्वपादव्यत्यासजानामेव वृत्तानां वृत्तत्रयस्य संज्ञान्तरम्—

॥ ५ ॥ प्रथमविपर्यासे मञ्जरीलवल्यमृतधाराः ॥ २३ ॥

प्रथमस्य पादस्य विपर्यासे अन्यैः पादैः मञ्जरी लवल्यमृतधारा च पदचतुरूर्ध्वं भवति। द्वितीयेन व्यत्यासे मञ्जरी। तृतीयेन व्यत्यासे लवली। चतुर्थेन व्यत्यासेऽमृतधारा—

यदि पतिरतिजड़म[58]तिरिह रामा रम्यविदग्धा च। वल्लभकुलात्[59] सा स्त्री संप्रच्यवते धवं स्वस्माच्छद[60]नैव्रं ताऽप्यनेकैर्कदलिकां[61] मञ्जरीव कोशदलात्॥

अथापीड़े—प्रकटयति रदतति[62]मनुहसनहेतावपि फलततिमिह[63] लवली या।[64] भवति जगति सा स्त्री पथि परिमितजल[65]सरिदिव बहुविट[66]जनलङ्घ्या॥

मुखमनत[67]दशनमतिकृशहनु हलमिव दीर्घं
यदि भवति कलहनिरता स्त्री।
पतिमतिचरति च वचनममृतधारा-
सममपि न शृणोति॥

इति पदचतुरूर्ध्व -[66]- प्रकरणम्॥

॥ ५ ॥ उदगतामेकतः स्जौ स्लौ न्सौ ज्गौ भ्नौ ज्लौ ग् स्जौ स्जौ ग् ॥ २४ ॥

सजसा लघुश्च नसजा गुरुश्चैकतः। एकतोऽर्धमिदमथ भनजा लघुर्गुरुश्च सजौ द्विकौ गुरुश्चार्धमित्थमर्धशो विभज्योद्गतां पठतीत्यन्वयः। अर्धशो विभागादयुग्मयोः पादयोरविश्रम्यैकत्वेनैव द्रुतं पठितव्यम्। तत्र स्जौ स्लावित्याद्यः पादः। न्सौ ज्गाविति द्वितीयः। भ्नौ ज्लौ गिति तृतीयः पादः। स्जौ स्जौ गिति चतुर्थः पादः। लघोर्गुरोश्च सूत्रे पृथक्करणात् पादसमाप्तिः। अन्यत्राप्येवं सूत्रमध्ये लघुगुरुदर्शने पादसमाप्तिर्ज्ञेया।

नन्वेकत्वेन[68]चेत् पाठः किं पादव्यवस्थया? उच्यते—एकेन शब्देन मा पादौ[69] सन्धयिपतामिति। एतेनान्यत्र पादान्ते विश्रम्य पाठ उक्तः—

धनिनां भवन्ति सुकृतानि धनविरहिता [67] सदाऽस्थिरा।
मुक्तिरपि धनिषु किं बहुना सकलं धनेन[70] किमु कीर्तिरुद्गता॥

(54) A : न भवभनामा। (55) A : आवरत। (56) A : ⁰मनुक। (57) A : प्रत्यापीडं कमुपनिदधाति। (58) A : जल। (59) A : वलित्रकुलात्। (60) A : छन्दनै⁰; S : ⁰च्छादनै। (61) A : कदलितां। (62) A : रदतिमनु⁰। (63) A : ⁰मित्र; S : ⁰मिह च। (64) A : लवलीलया। (65) A : जलज⁰। (66) A : विश्व⁰। (67) A : मुखमनभ⁰। (68) A : ननु च एकत्वेन। (69) A : मापौ instead of मा पादौ। (70) A : सकलव्ययेन; S : सफलधनेन।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ५ ॥ तृतीयस्स सौरभकं र्नौ भ्गौ ॥ २५ ॥

उद्गताया एव तृतीयस्य पादस्य स्थाने रनभगाः स्युः सौरभकं नाम वृत्तम्—पवनाः किरन्ति कुसुमानि समयविकचानि शाखिनाम्। तन्वते च दिवि सौरभकं धनिनां यशांसि[71] विविधाऽर्हणास्तथा[72] ॥

॥ ५ ॥ ललितं नौ सौ ॥ २६ ॥

तृतीयस्यैव पादस्य स्थाने नौ सौ च स्युर्ललितं नाम वृत्तम्—ललितध्वनिः पिकरुतेन नवमधुरसैर्नगो मधु। सुरभिरपि[73] सुरभिभिः कुसुमैरलिभि[74]स्तथैव विधिनोपजीवति॥[75]

॥ ५ ॥ उपस्थितप्रचुपितं पृथगाद्यं म्सौ ज्भौ गौ स्नौ ज्रौ ग् नौ स् नौ न्जौ य् ॥ २७ ॥

मसजभा गुरू च द्वौ प्रथमः पादः। सनजरा गुरुश्च द्वितीयः। नौ द्वौ सश्च तृतीयः। स इति सूत्रे पृथक्करणात् पादसमाप्तिः[76]। नास्त्रायो जयौ च चतुर्थः। तदेतदुपस्थितप्रचुपितं नाम वृत्तम्। अत्राद्यं पादं पृथक् पठन्त्यन्यत् पादत्रयं सहैव—

कामो यातु धनं व्यपैतु तिष्ठतु कीर्तिः
धनिनां धनमपि तैः समेति भूयः।
श्रयति हि पुनरपि तत्
प्रचुपितपदमुदकमुपस्थितपूर्वम्॥

॥ ५ ॥ वर्धमानां तृतीये नौ स्नौ न्सौ ॥ २८ ॥

अस्यैव तृतीये पादे नौ द्वौ सश्च पुनर्नौ द्वौ सश्च[77] वर्धमानं नाम वृत्तम्। अन्यत् पूर्ववत्—

उद्भूतं प्रथमं यशोङ्कुरं[78] धनबीजात्
वितनोति धनफलानि वर्धमानम्।
धनमपि घटयति ढौकितमबहु बहुधनं[79]
[68] गृहशकुनिरिव शकुनिसंघमगृह्यम्॥

॥ ५ ॥ शुद्धविराडृषभं त्जूः ॥ २९ ॥

तृतीय एव पादे तजराः स्युः शुद्धविराडृषभं नाम वृत्तम्—

इष्ट्वा त्यक्तधनैर्मखैर्हरिं भगवन्तं
तपसा ऋषभम[80]वाप्य वृत्तमग्र्यम्[81]।

(71) A : धनानि। (72) A : विश्वजना जनास्तथा; M & S : विविधान्नाहार्यस्तथा। (73) M : शिशुभिरपि। (74) A : धनिभिः। (75) A : विधनोऽपि जीवति। (76) A omits this sentence. (77) A adds स्युः। (78) M : उद्भूतं क्रियया पुराङ्कुरं; S : क्रियादलाङ्कुरं। (79) M : लघ्वपि बहुधननिचयं। (80) M : वृषभ। (81) M & S : अग्रम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तच्छुब्धविराट्पदात् परं[82]

व्रजति पदमजममृतमुज्झितसङ्गः[83] ॥

इति महाविषमप्रकरणम्[84]। अथार्धसमान्यारभ्यन्ते—

॥ ५ ॥ अर्धे ॥ ३० ॥

अधिकारोऽयमाऽध्यायपरिसमाप्तेः। अर्धे लक्षणमधिकृतं वेदितव्यम्। तत्र विधानात्तदर्धसमं[85] तावत् ॥

॥ ५ ॥ उपचित्रकं सौ स्लौ ग् भौ भ्गौ ग् ॥ ३१ ॥

सास्त्रयो लघुगुरू चाद्यः पादः भास्त्रयो गुरू च द्वावन्यः।[86] तदेतदाद्यमर्धम्।[87] द्वितीयमप्यर्धमीदृशमेव।[88] तदेतदुपचित्रकं नाम वृत्तम्—

चतुरन्तमहीपतिना पतिः[89]

नीतमना[90] मृगयाव्यसनाय।

उपचित्रकमेत्य गिरेर्वनं[91]

चिन्तयति स्म नृपः किल कश्चित् ॥[92]

एतौ त्रैष्टुभयोर्द्वयोः समवृत्तयोः पादौ संहतावेकमर्धसमवृत्तम्। अयं न्यायोऽन्यत्रापि स्यात्। तेनान्येऽपि त्रैष्टुभानां वाऽन्यवृत्तानां समाक्षरसंख्याः पादाः द्वौ द्वावेकभूयं भूत्वा बह्न्यर्धसमानि सम्पद्यन्ते। तेषां समं तावत्कृत्वः कृतमर्धसममिति संख्योक्ता। अथार्धसमानि[93]—

॥ ५ ॥ द्रुतमध्या भौ भ्गो ग् न्जौ ज्यौ ॥ ३२ ॥

भास्त्रयो गौ चाद्यः पादः नो जौ द्वौ यश्चान्यः द्रुतमध्या—

प्रान्तगतस्य विपक्षकदम्बं प्रतिपदमन्तरुप[94]व्रजतो मे।

चित्तमियं हरति द्रुमराजी[95] [69] विधुरिव पूर्णनदी द्रुतमध्या ॥

नलिनञ्च। एषां संज्ञान्तरार्थं पुनरुपादानम् ॥

॥ ५ ॥ वेगवती सौ स्गौ भौ भ्गौ ग् ॥ ३३ ॥

सास्त्रयो गुरुश्चाद्यः पादः भास्त्रयो गौ च द्वावन्यः वेगवती[96]—

अपराध्यति किं नगरश्रीः संयमिनामियमप्यदृढाणाम्।

नियमं विभिनत्ति[97] वनश्रीर्वेगवतीव नदी मृदुसेतुम् ॥

आपातलिका वा ॥

(82) M : पदं। (83) M : पदमजमवृतमु······तसङ्गः। (84) A omits the sentence ; M reads this after V. 30. (85) A : तत्र वितानार्धसमं। (86) A : द्वावन्त्यः। (87) M : तदेतदर्धसममस्य ; S : तदेतदर्धसमम्। अस्य (88) M : तादृशमेव। (89) M : चतुरन्तमभीवनिताप ; S : चतुरन्तमहीपतिनिपातं। (90) A : दत्तमनो। (91) A : वसन्। (92) A : कञ्चित्। (93) A : अथ महाविषमार्धसमानि ; M : अर्धसममहार्धसमानि। (94) M : प्रतिमन्तरूप। (95) A : धृतराजी। (96) M adds नाम। (97) M : नियमाद्विहिनस्ति ; S : नियमं विहिनस्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ५ ॥ भद्रविराट् तृजौ गौ मूसौ ज्गौ ग् ॥ ३४ ॥

तजरा गुरुश्चाद्यः पादः मसजा गौ च द्वावन्यो भद्रविराट्—

वेश्मानि[98] समानि नो गुहाभिरुद्यानानि वनैरुपत्यकानाम् ।[99]

कस्तिष्ठति खर्वटेऽरिमग्नो राजा भद्रविराट् कुलाभिजातः ॥[100]

औपच्छन्दसिकं वा ॥[101]

॥ ५ ॥ केतुमती स्जौ स्गौ भ्रौ न्गौ ग् ॥ ३५ ॥

सजसा गुरुश्चाद्यो भरना गौ च द्वावन्यः केतुमती—

धनुषां शतैर्मकरकेतोः संग्रथिता शिलीमुखनतानाम् ।

अटवी निरस्यति धृतिर्वा केतुमती चमूरिव भटस्य ॥[102]

॥ ५ ॥ आख्यानकी[103] तौ ज्गौ ग् ज्तौ ज्गौ ग् ॥ ३६ ॥

मध्यत्वात् तौ जो गौ च द्वावाद्यो जतजा गौ च द्वावन्य आख्यानकी । व्यत्यस्तैवेयमाख्यानकी[104]—

एषा मयूरावलिरुच्चकेका ततैः[105] कलापैर्विपिनस्य लक्ष्मीम् ।

आख्यानकी चाह्वयति[106] प्रवक्तुं निजेषु सर्वोऽपि हि पक्षपाती ॥

॥ ५ ॥ विपरीताख्यानकी ज्तौ ज्गौ ग् तौ ज्गौ ग् ॥ ३७ ॥

जतजा गौ च द्वावाद्यस्तौ जो गौ च द्वावन्यः विपरीताख्यानकी—

वदत्यशेषन्न[107]वदत्यपीषत् कामप्रसङ्गेषु विकामभावा ।

सुवासिताऽपि प्रमदा विजातिराख्यानकी सा[108] विपरीतपूर्वा ॥

अनयोर्वितानसंज्ञयो[109] -[70]- रूपचित्रकन्यायेन सिद्धयोरपि पुनर्वचनं संज्ञान्तरार्थम् ॥

॥ ५ ॥ हरिणप्लुता सौ स्लौ ग् न्भौ भ्रौ ॥ ३८ ॥

सास्त्रयो लघुर्गुरुश्चाद्यः[110] नो भौ रश्चान्यो हरिणप्लुता—

इयमुन्नतिरत्र निवासिनामिह भवान् पुरि वा वसतु स्वयम् ।[111]

इति भूमिरसौ वदतीव मां खगरुतेन महाहरिणप्लुता ॥

(98) A : वर्मणि ; M : भद्राणि । (99) M : खलैरुपत्यकायाम् । (100) M omits कुलाभिजातः । (101) M omits this name ; A reads च in place of वा । (102) A : चमूरिव परस्य ; M : रामभद्रस्य (103) A & M : आख्यानिकी (104) A omits this sentence (105) M : एषां मयूरावतीरुच्चकेकान्तकैः (106) M : वाचयति (107) M :° शेषभवदन्यविष्टम् (108) M reads : साख्यानकीयं (109) M : °संख्ययोः (110) A reads अन्यः in place of आद्यः here, as also in all other similar places. (111) M : पुरि वस्वयम्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ अपरवक्त्रं नौ लौं ग् न्जौ ज्रौ ॥ ३९ ॥[112]

नौ द्वौ रो लघुर्गुरुश्चाद्यः नो जौ द्वौ रश्चान्योऽपरवक्त्रम्—

सततसकलकामसम्पदं परमचलं जन ते ममाश्रिता ।
न पुनरपरवक्त्रमीक्षते कूलजवधूरिव राजकामया ॥

वैतालीयं वा ॥

॥ ५ ॥ पुष्पिताग्रा नौ यौं ञ्जौ ज्रौ ग् ॥ ४० ॥

नौ द्वौ रयौ चाद्यः पादः । मध्यस्थानीयत्वात् पादसमाप्तिः । नो जौ द्वौ रो गुरुश्चान्यः पुष्पिताग्रा—

कुसुमितशिरसं समाश्रयन्ती धव[113]मतिपल्लवधर्मकं विभाति ।
ऋतुसमयगृहीतपुष्पधर्मा व्रततिरियं वनितेव पुष्पिताग्रा ॥

औपच्छन्दसिकं वा । अत्र[114] पुष्पिताग्रेत्येतावतैव लक्षणं सिध्यति, शेषस्यापरवक्त्रलक्षणाधिकारादेव सिद्धेः । यथा 'गौपच्छन्दसिकमि'त्यत्र (IV.34) तथाऽप्यक्षरविन्यासो नाधिक्रियत[115] इति दर्शयितुं तथा न कृतम् । तेन शिखायां पूर्वविन्यासो नाश्रीयते[116] ॥

॥ ५ ॥ यवमती जौं जों ज्रौ ज्रौ ग् ॥ ४१ ॥

रजौ द्विकावाद्यः । मध्यस्थानत्वात् पादसमाप्तिः । जरौ द्विकौ गुरुश्चान्यो[117] यवमती—

व्रीहिणः पुरेषु के नरा[118] यथैव यवान्विताः फलान्विताश्च तद्वदत्र ।
सन्तु वा पुरेषु सम्पदस्तथापि तपस्यया वनेषु सन्त्यमुत्र लोकाः ॥

॥ ५ ॥ शिखैकान्नत्रिंशदेक[119] त्रिंशदन्ते ग् ॥ ४२ ॥

एकान्नत्रिंशदक्षराण्याद्यः पाद एकत्रिंशदक्षराण्यन्त्यः शिखा । अन्ते द्वयोर्गुरुः स्यात् । गुरोरयं नियमो नान्त्यस्य । किमनेन विभागेन ? अस्यैव यदि समस्तस्य[120] स्यात् योऽन्त्यस्तत्र गुरुरेवेति । तदा पूर्वत्र लघुर्वा गुरुर्वा स्यात् । [71] न नियमः । यदा तु ग्लावित्यधिकाराद्गुरौ च लघौ च प्राप्ते यो गुरुः सोऽन्त्य एवेति गुरोर्नियमः, तदा[121] पूर्वत्र लघुरेव स्यात् । अन्त्यस्य नियमेऽत्र पादान्त अर्थवत्वेऽ[122] प्यर्धान्ते वैयर्थ्यं स्यात् । गन्त इत्येव सिद्धत्वात् । गुरोस्तु नियमः पादद्वयेऽप्यर्थवान् । तस्माद्गुरोरयं नियमः[123] । अनुक्तविशेषाणामार्याप्रकृतित्वात् । गीतेरार्यागीतेश्चार्धेन प्रयोग इति केचित्—

(112) M drops the *bhāṣya* and the following *sūtra* (V. 40) (113) M : यवम् (114) A omits (115) M : नाश्रीयते। (116) M & S omit these words beginning from इति (117) A omits अन्यः (118) A & M : केदारा ; S : ये नरा ; T: केनरा (119) M : शिखैकोनत्रिंशत् (120) M : समस्य ; A : °ह्ययमस्य (121) M: यदा (122) M: तु (123) A drops the two succeeding sentences and reads, in its stead : गन्ता द्विर्वसवो मात्रासमकमित्यत्र नवमादीनां पुनर्लघुत्वनियमादेतस्यैव नियम आश्रितः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति किलनरपतिररुणमणिगण[124] इव न भुवि तपसि स मतिमकरोद्
अशमयदपि सुतयुवतिसपरिकरधनचयविनिहितखलमतिमखिलाम्[125] ।
पुनरपि पुनरपि धनरुचिमतिशयमतिखलमतिमभिवदति जनं[126]
न तु जनमधिकगुण[127]मुपचितशुभममिभवति न दहति मदनदवशिखा ॥

॥ ५ ॥ खञ्जा महत्ययुजीति[128] ॥ ४३ ॥

महत्येकत्रिंशत्के पादेऽयुजि प्रथमे तृतीये च कृते, एकान्नत्रिंशत्के च युजि खञ्जा नाम। एवं पूर्वश्लोक एव पादविपर्यासेनोदाहार्यः ॥

इति भगवतो यादवप्रकाशस्य कृतौ पिङ्गलनागच्छन्दोविचितिभाष्ये पञ्चमोऽध्यायः ॥

(124) M drops गण (125) M : °सुपरिकर धननिचय नियत खलु मितिमखिलां (126) M : धनरुचिमतिशयमति भवति पुरुषमुपनसं (127) A : अधिगुण° (128) M reads the *sūtra* in a different version in addition to the conventional one : खञ्जा विनियम्य यदि, and drops the *bhāṣya* on it.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षष्ठोऽध्यायः

।। ६ ।। यतिर्विच्छेदः ।। १ ।।

वितानमन्यदिति वृत्तानां संज्ञोक्ता। लक्षणञ्च प्रस्तारादि वक्ष्यते। किं पुनरिदानीमारभ्यते? सत्यामपि वितानमिति सामान्यायां[1] संज्ञायां वैशेपिकसंज्ञा यतिश्चेति। केषाञ्चिद्वक्तु' प्रस्तारादिलक्षिता-नामपि पुनर्लक्षणमारभ्यते। प्रथमं तावत् यतेर्लक्षणं कथयति। यतिर्विच्छेद इति। विच्छेदः पाठवेगस्य यतिः। पठतो[2] मध्येऽन्ते वा यो विलम्वः[3] सा यतिः।

अत्र यत्युपनिषदो नाम भवन्ति। तद्यथा—

यतिः पठद्विलम्वो[4]ऽसौ त्यागोऽर्धे सन्धिपाठयोः।
पादान्ते पादमध्ये वा न त्यागः सन्धिपाठयोः[5]।।
द्रुतं[6] पठन् यथाशास्त्रं [72] मध्येऽन्त्ये यद् विलम्वते[7]।।

सा यतिः। स च विलम्वोऽर्धान्ते सन्धिपाठत्यागा[8]त्मकः। तेन पूर्वार्धस्यान्ते पाठसन्तानो विच्छेत्तव्यो नाऽन्यत्र। संहिता च न पूर्वार्धान्तस्य शब्दस्योत्तरार्धेन कार्या। यथा—दृष्ट्वा तु पाण्डवानीकं व्युढं दुर्योधनस्तदा। आचार्यमुपसङ्गम्य राजा वचनमब्रवीत्॥ इत्यत्र तदाऽऽचार्यमित्यनयोः संहिता न कार्या[9]। तथा—चण्डीप्रचण्डदोर्दण्डमण्डलाखण्डलार्चिता। अव्याद्वश्चण्डमुण्डादिमुण्डकुण्डलमण्डिता॥ इत्यत्रार्चिताऽव्यादित्यनयोः संहिता न कार्या। अन्यत्र कार्यैव।

अर्धे पादेऽस्य भागे च ह्यन्ते[10] च स्याद्यतिस्त्रिषु।
त्रिधा यतिश्च शब्दान्तसमासपदमध्यजा॥

अर्धे अर्धान्ते पादे पादान्ते पादभागे च क्वचित् क्वचित्त्रिकचतुष्कादौ यतिः। सा च त्रिधा—शब्दान्तजा, समासमध्यजा पादमध्यजा[11] चेति।

आद्ये स्थाने यतिश्चाद्यो[12] मध्यमे त्वाद्यमध्यमे।
अन्त्ये तिस्रो यणा[13] सन्धिः पादयोः स्यात् परादिवत्[14]॥

अर्धान्ते शब्दान्ते चैव यतिः[15]। नार्धे द्वे एकेन शब्देन समासेन वा[16] सन्दध्यात्। पादान्ते शब्दान्तजा समासमध्यजा स्यात्। नाऽन्या। नैकेन शब्देन द्वौ सन्दध्यात्।

(1) A : साधारण्यां (2) A : पाठञ्च लस्य गस्य च पठन्तो (3) A : वा लम्वो (4) M : पाठविलम्वः (5) A omits this line. (6) M & S : ततः (7) A reads the last foot : यद्विलम्वति सा यतिः (8) M omits त्यागः (9) A omits this verse of the *Gītā* and the comments thereon. 10) A : स्थानेषु (11) A : शब्दजा (12) M & S : आद्या (13) A : वर्ण° (14) A : पराजिवृत् 15) A : अर्धशब्दान्तजैव यतिः; M : दधन्ति शब्दान्त चैव यतिः (16) A omits समासेन वा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समासमध्यजा यथा—नमो लोकतमोजालच्छिदे परमतेजसे इति। पादभागे तिस्रोऽपि यतयः। पादान्त्यस्य शब्दस्योत्तरपादाद्येन[17] यणादेशसन्धिः स्यात्। स च परस्य पादस्यादिः स्यात्। न पूर्वस्यान्तः। तद्यथा—तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही इति। तथा—स पल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि' (*Raghu.* II. 17^{ab}) इति।

पादमध्येऽपि परादिरेव यथा—गाढोत्कण्ठां गुरुषु दिवसे-[73]-ष्वेषु गच्छत्सु बाला (*Meghadūta.* II. 23^{c}) इति। यणादेशसदृशेऽ[18]पि क्वचिद्यतिः परादित्वञ्च। यथा—मातङ्गस्य स्रुतमदजलस्येव भृङ्गाः कपोलमिति।

पूर्वान्तिस्त्वन्यसन्धिः स्यात् भाग एकाक्षरो न चेत्। अन्तस्तु सन्धिपादान्तशब्दस्योत्तरपादाद्यो न भवति। पूर्वस्य पादस्यान्त्यः स्यान्नोत्तरस्यादिः। सन्धिना च विभक्तस्य शब्दस्य परो भाग एकाक्षरो न स्यात्। यथा—विनायकाय मातङ्गाननाय महते नमः। ब्रह्मादिकीटपर्यन्तं यत्प्रसादवशाः क्रियाः॥ इति।

भागौ पूर्वापरान्तैकवर्णौ[19] चेत् पादमध्यजा यतिः। विभक्तस्य[20] पूर्वापरौ भागौ नैकवर्णौ चेत् पदम[21]ध्येऽपि यतिः स्यात्। यथा—पर्याप्तं तत्र पुत्रीयति महति जन इति।

> उपसर्गेऽपि कुर्वीत पादान्तार्धान्तयोर्यतिम्।
> यथाशोभं यतिः कार्या[22] सर्ववृत्तेष्वपि स्वयम्[23]॥

उपसर्गेऽपि पद[24]मध्येऽपि क्रियत एव यतिः। यथा—एवं तावद्विरोधादिदमपि तु परिच्छिद्यते देहमात्रम्। इति॥

सर्वत्र यथाशोभं यतिः कर्तव्या। क्वचित् क्वचिदुपदेशः शोभाप्रदर्शनार्थः। क्वचित् संज्ञान्तरार्थः। यथा—मालतुंनवकौ चेदिति। क्वचिदस्फुटत्वात्। यथा—ऋषभगजविलसित इति। इति यत्युपनिषदः॥

अथ गायत्र्यादीनां समवृत्तान्युच्यन्ते। उक्तादीनामप्रसिद्धत्वात् प्रस्तारादिभिश्च सिद्धत्वान्नोक्तानि। तत्र गायत्र्याम्—

॥ ६ ॥ तनुमध्या त्यौ[25] ॥ २ ॥

पादस्येत्यनुवर्त्तते। तयौ गणौ यदि[26] क्रमात् पादस्यावयवौ तद्वृत्तं तनुमध्या[27] नाम। अन्ये तादृशास्त्रयः पादा द्रष्टव्याः—

> रामां तनुमध्यां गच्छेदनुवृत्ताम्[28]।
> यो जीवितुमिच्छेद्भर्ता शतमायुः[29]॥

(17) M : ०पादान्त्येन (18) A : यणादेशदृशे० (19) A : पूर्वापरौ नैकवर्णौ (20) A adds शब्दस्य (21) All the MSS पाद० (22) A adds : कर्तव्या क्वचित् क्वचित् (23) M reads the fourth foot : सर्वत्र ह्ययमेव तु॥ (24) All the MSS : पाद० (25) M : तनुमध्यान्त्यौ (26) A : यतिः (27) M : तनुमध्यमा (28) A : अनुरक्ताम् (29) A reads the fourth foot : नो जातु विरक्ताम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अपि च। शास्त्रान्तरेष्वन्यान्यपि बहूनि [74] वृत्तान्युक्तानि। तान्यप्रसिद्धत्वात् प्रस्तारादिभिः सिद्धत्वाच्चा[30]चार्येण नोक्तानि।[31] तेषु कानिचिल्लक्षणेनोदाहरणेन च स्थाने स्थाने प्रदर्श्यन्ते। तत्र सौ द्वौ रमणी नाम वृत्तम्—

अनुरागवती रमणीह कृता[32]।
स्मितपूर्ववचो विकृतावयवैः॥

यौ द्वौ विचित्रम्—

विचित्रञ्च दृष्ट्या करोतीक्षितं या[33]।
कटाक्षं क्षिपन्ती बधूः सानुरक्ता॥

रमौ मालिनी—

तिष्ठते पत्ये या मालिनी सद्वस्त्रा।
गायति च्छन्ना वा साऽङ्गनाऽतिस्नेहा[34]॥

अथोष्णिहि—

॥ ६ ॥ कुमारललिता ज्सौ ग् ॥ ३ ॥

जसौ गुरुश्च कुमारललिता। सूत्रमेवोदाहरणम्। केचिद्द्वयोः पञ्चसु यतिमाहुः। तद्यथा—

भुजावपविभूषाः[35] कुचावपि च नाभिम्।
पतीं सहजरागा[36] स्त्रियः प्रकटयन्ति॥

अपि च। मसौ गश्च मदलेखा—

भ्रुक्षेपेण ललाटेनोत्कम्पा[37] मदलेखाम्।
या दृष्टया[38] पुरुषं स्त्री धत्ते साऽप्यनुरक्ता॥[39]

रसौ गश्चोद्धता—

अंशुकं विनमन्ती विक्रियाः सहसैति।
उदगमापगमाद्धीरुद्धताऽप्यनुरक्ता॥

रयौ गश्च शान्तिः—

या विमुच्य केशान् स्वान् सन्निधौ निबध्नाति।
याति शान्तिमुद्वीक्ष्य क्रोधनेऽपि सा स्निग्धा॥

30) M drops च (31) M adds तथा ; S : तेष्वेव (32) A : कथिता (33) A reads the first hemistich : विचित्रञ्च दृष्ट्या भूयः करोति क्षितीशम्। M reads दृष्टा करोदीक्षितं (34) A : साऽङ्गना इ स्नेहा ; M : साऽङ्गनाभिः स्नेहा (35) M : भूजा विभूषाः ; S : भुजावपि विभूषाः (36) A, M, T & S : सरागा ; M has a lacuna mark after स, A, T & S have none. (37) M : °नोत्कण्ठी (38) M : दृष्ट्वा (39) M : पुरुषं स्त्रीयन्ते सा पुनरुक्ता॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मौ गश्च कमला—

या चरमस्वपना[40] जागरिणी प्रथमम् ।
सा च धवे सरसा स्त्री कमलेव हरौ ॥[41]

एवं[42] यदि मगणास्त्रयो गुरुश्च पंक्तौ चित्रपदा नाम वृत्तम् ।[43] यदि भाश्चत्वारोऽतिजगत्यामङ्गरुचिर्यदि पञ्चाष्ट्यां पद्ममुखी संगताऽवसथो[44] वा, यदि षडतिधृत्यां कुसुमं यदि सप्ताकृत्यां मदिराऽतुला[45] वा। यद्यष्टौ भा गुरुश्चाभिकृतौ वितानमेव ।

अथानुष्टुभि—

[75] ॥ ६ ॥ माणवकक्रीड़ितकं[46] भ्तौ ल्गौ ॥ ४ ॥

भतलगा माणवकक्रीड़ितकं नाम वृत्तम्—

माणवकक्रीड़ितकं ग्राम्यवचो[47] गर्ह्यतमम् ।[48]
शाठ्यमिति स्त्री कुरुते पुंसि न या रागवती ॥

॥ ६ ॥ चित्रपदा भौ गौ ॥ ५ ॥

भौ द्वौ गौ च चित्रपदा—

एकतमाभ्यनुरक्त[49] व्युज्झति तं सकुलं स्त्री ।
अन्यजने यदि सक्ता चित्रपदा विकृतिर्हि ॥

तथा च यदि षड् भगणा गुरू च द्वौ कृतौ सरोरुहनेत्रा, यदि सप्त विकृतौ मयूरगतिः, यद्यष्टावुत्कृतौ प्रविराजितम् ॥

॥ ६ ॥ विद्युन्माला मौ गौ ॥ ६ ॥

मौ द्वौ गौ च विद्युन्माला—

शय्याद्वेषो गात्रस्फोटो जृम्भा चोच्चैः कोपश्चाग्रे ।
यस्याः सान्तर्निःस्नेहा स्त्री दृश्या विद्युन्मालेवाद्दणा ॥

उपचित्रा च । इदमनुष्टुभि सर्वगुरुकम् ।[50] एवं यद् गायत्र्यां तत् सावित्री, यदुष्णिहि तद् गान्धर्वी, यद्बृहत्यां तद्रूपमाला[51] यदतिधृतौ तदैरावती ।[52] आनुष्टुभानां[53] चतुर्षु चतुर्षु[54] यतिः। अपि च—मनौ गौ च द्वौ हंसरुतम्—

स्पृष्टा कम्पयति गात्रं दृष्टा[55] वा श्वसिति[56] चाग्रे ।
निःस्नेहा वदति रुक्षं प्रोक्ता हंसरुतवाचा ॥

(40) A : च हीन स्वपना (41) M : मता । (42) M omits एवं (43) A & M add स्यात् (44) A : सुरताधः ; M : सरसावसथः (45) A : अतुलनामा (46) M : माणवकाक्रीड़ितकं (47) A : ग्राम॰ (48) M : गण्यतमम् (49) M : सत्यपि पत्यनुरक्ते (50) M adds वृत्तम् ; A adds एवं (51) M omits यद्बृहत्यां तद्रूपमाला ; S omits रूप॰ (52) All the MSS. except T read a word माला here. (53) A adds : उक्तानाञ्च (54) A : त्रिषु (once) (55) M : दृष्ट्वा (56) A : स्वपिति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यौ द्वौ लगौ च मनोज्ञम्—

विरक्तामिमानोद्धता न यान्तं[57] रुणद्धि प्रियम् ।
मनोज्ञश्च[58] धत्ते मुखं मुदा प्रोषिते भर्तरि ॥

नौ द्वौ लौ चालिः—

अपमधु सुमनसमलिरिव पतिरपि ।
विरसयुवतिमयमफलमभिसरति ॥

इदमेव द्विगुणमष्ट्यां लघुपदं[59] नाम वृत्तम् । अथ बृहत्यां—

॥ ६ ॥ भुजगशिशुसृता नौ म् ॥ ७ ॥

नौ द्वौ मश्च भुजगशिशुसृता[60]—

[76] युवतिरसुहरा[61] स्पर्शे मुखचपलतया[62]क्रूरा ।
कुटिलगतिदुराक्रान्ति[63]र्भुजगशिशुसृतां द्वेष्टि ॥

॥ ६ ॥ हलमुखी नौं स् ॥ ८ ॥

रनसा हलमुखी[64]—

योषितं त्यज[65]हतरसां[66] घर्घरध्वनिमभि[67] नरम् ।[68]
घस्मरामति[69]कृशहनुं[70] सूकरीमिव हलमुखीम् ॥

त्रिभिः षड्भिश्च यतिः । अपि च । भो मौ च द्वावच्छि—

अच्छिविरुद्धं वाग[71]श्लक्ष्णा दोल[72] इवाङ्गे स्पर्शो[73]ऽनिष्टः ।[74]
वञ्चितुमेवं न्यस्ता बुद्धिर्मुह्यसि[75] कस्यां[76] निःस्नेहायाम् ॥

पञ्चसु चतुर्षु च यतिः । उपचित्रा च । सजसा[77] ललितम्—

ललितं वचो बहुधनं कुलमङ्गिता च वपुषः ।
सकलं वृथैव विरसां ललनामवाप्य विमुखीम् ॥

मौ द्वौ रश्चोत्सुकम् —

योषिति यत्र[78] नरो नु को न्यस्यति जीवितमप्यसौ ।
उत्सुकमेव विहाय तं याति परं विरसा निजैः ॥

अथ पंक्त्याम्—

(57) A : यां तु (58) A drops च (59) A : लपदं (60) M omits this sentence ; S : शिशुभृता (61) A : युवती सुखकरी (62) A : मुखफलतया (63) A : मुधा कीर्तिः (64) M drops the line. (65) M & S : त्यजति (66) M : हरसाद् (67) M drops ध्वनि (68) A : अभिकरात् (69) A : घर्घरध्वनिमती० (70) M : तनुं (71) M : वाम० (72) M : सर्प (73) A : अङ्गस्पर्शो (74) A : अश्लिष्टः (75) M drops the third foot and मुह्यसि (76) M : कस्मात् (77) M adds अङ्किता ; S adds च (78) S : यस्तु ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ६ ॥ शुद्धविराण् मसौ जगौ ॥ ९ ॥

मसजगाः शुद्धविराट्—

य[79]ज्जेता कुसुमायुधोऽप्ययं कामः शुद्धविराट् कुलान्यपि ।[80]

तत् स्नेहेन[81] दृढां वराङ्गनां तां कृत्वा न विरक्तकास्त्रियम् ॥[82]

अपरान्तिका च ।

॥ ६ ॥ रुक्मवती भ्मौ स्गौ भूतेन्द्रियार्णि ॥ १० ॥

ममसगा रुक्मवती । पञ्चवर्णान् पठित्वा यतिः स्मृता[83]—

यत् सुभगत्वं गर्वनिरासादन्यगुणोक्त्या[84] वाञ्छति लोकः ।[85]

तस्य विपाको[86] रुक्मवती श्रीः[87] प्रेमवती वा[88] स्त्री न तु रुद्धा ॥

उपचित्रा च । पादान्ते प्राप्ता यतिः । पुनरुपदेशस्तु[89] क्वचित् पादान्तेऽपि न यतिरिति सूचयितुम् तेन यदाहुर्गायत्रस्याधस्तान्न पादान्ते नार्धान्ते यतिरिति, तत् सिद्धम् ॥

॥ ६ ॥ पणवो[90]म्नौ य्गौ ॥ ११ ॥

[77] मनयगाः पणवः—

यत्कामो[91] जयपणवध्मानं[92] लोकेषु[93] त्रिषु तनुते तच्च ।

स्त्रीणां भ्रूयुगधनुषो[94] वीर्यं स्निग्धानां किल[95] न विरुद्धाणाम् ॥

पञ्चसु पञ्चसु यतिः । मात्रासमकञ्च ॥

॥ ६ ॥ मयूरसारिणी र्जौ र्गौ ॥ १२ ॥

रजरगा मयूरसारिणी—

स्त्रीर्मयूरसारिणीमुखाः[96] यत वर्जयन्ति लक्षणैरभव्यैः ।

तच्च ता विरक्तचेतसश्चेन्नानुरक्त[97]चेतसां निषेधः ॥

(79) A : ये (80) A : कुलादपि (81) A : स्नेहो (82) M : विरक्तकस्त्रिम् (83) A omits this sentence (84) M : गुणोक्त (85) M : तोकः ; S : शोकः (86) M : विपाके (87) M : स्त्री (88) A : चा (89) M : °रुपदिष्टत्वात् (90) M : पटवा (91) A : °कामा (92) A : ध्वाल्लो ; M : धन्यं ; S ध्वनिं (93) A : लोकेऽस्मिन् ; M : केषु (94) M : °धनुषे (95) A : तृषु च in place of किल (96) M reads : स्त्रीं मयूरसारिणीं यत् (97) A : °चानुरक्त°

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ६ ॥ मत्ता म्भौ सगौ समुद्ररसाः ॥ १३ ॥

ममसगा मत्ता। चत्वारः षट् च यतिस्थानम्[98]—

यद्वामत्वं[99] युवतिषु मत्ता वृत्त[100] वित्तं जहति तनुश्च ।[101]
तत्तत्[102] प्रेम प्रियमधुपाना[103]न्निःस्नेहाभि[104]र्जयति न[105] सङ्गम् ॥

वानवासिका[106] च।

॥ ६ ॥ उपस्थिता त्जौ ज्गौ ॥ १४ ॥

तो जौ द्वौ गुरुश्चोपस्थिता—

यद्वा दुरवापतपश्चयं हित्वा मुनयोऽप्यभवंश्चलाः ।[107]
स्निग्धां प्रसममुपस्थितां[108] दृष्ट्वा तपसोऽपि[109] विरागिणः ॥[110]

अपि च। सास्त्रयो गुरुश्च[111] मेघवितानम्[112]—

यदमी अपि[113] मेघवितानं[114] सरसाः समवेक्ष्य रमन्ते।
तदपि प्रियया रसवत्या विरसा गृहसंघटनायै ॥[115]

आपातलिका च। रः सौ गश्च मणिरागः[116]—

यज्जनः कुरुते मणिरागैरंशुकैश्च परिष्कृतिमङ्गे ।
तद्धि वीक्ष्य वधूमनुरक्तां देहदोष[117]दृशेव विरक्ताम् ॥

भतयगाश्चम्पकमाला—

यत्त्यजति स्वं विरहग्लानं[118] चम्पकमालामृदुलं देहम् ।[119]
तच्च सरागप्रमदाहेतोस्तर्हि[120]विरक्ता वनितास्त्याज्याः ॥

पञ्चभिः पञ्चभिश्च यतिर्मात्रासमकञ्च। मरयगास्तडिन्माला [78]—

यद्दृष्टान्तं[121] विदुर्दृढं[122] प्रीत्यामे[123]वं धन्या न मोक्षशास्त्रेषु।
सोऽपि स्नेहे सरागरामाणां[124] मानोऽभ्राणां पुनस्तडिन्माला ॥

अथ त्रिष्टुभि—

(98 M : चतुरः षट् पठित्वा यतिस्थाने ; S : चतुरः षट् च पठित्वा यतिस्थानं (99) A : मत्वा ; M : यद्वामत्यं (100) A : वुपत्रिषु मन्त्रावृत्तम् (101) A : तनुं तच्च (102) A : lacuna ; S : उद्यत् (103) A & M प्रियमधुपानां (104) M : निःसङ्गाभिः (105) A : तु (106) M : वानवासिकं (107) M : खलाः (108) A : ⁰प्यजातुपस्थिता ; M : उपजातमुपस्थितं (109) A : तपसे ; M : तमसो (110) A : त्वरमाणः ; M : विरागिणी (111) A adds आदि ; M & S : गुरुश्चाधि (112) A : मेषुवितायमि ; M : मेघुलितानम् ; S : मेघतितानम् (113) A : आदिमेषु ; M : अपि (114) A : ⁰वितानम् ; M : मे)घुलितानम् (115) A : विरसा गृहसंकटनायै M : विरसाग्रहासंकटनायै (116) M adds : रः सौ द्वौ गुरूश्च मणिरागः (117) M : साभिलाष⁰ (118) A : विरहग्लानिः ; M : विरहग्लावां (119) M : चम्पकमालां मृदुमत्तभम् (120) A : ⁰श्चास्तु ; M : स्वामि⁰ (121) A : य दृष्टान्तं ; M : यद्दृष्टाष्टं (122) A : विदुर्द्ढां ; M : विजयं (123) A : पात्याम् ; M : पश्याम ; S : पत्याम् (124) M : सापि स्नेहे विरागिरायाणां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ६ ॥ एकरूपं म्सौ ज्गौ ग् ॥ १५ ॥

मसजा गौ च द्वावेकरूपम्—

भ्रूचापा[125]द् घन[126]पक्ष्मराजिसज्ज्याद्[127] यस्त्र[128]स्यत्यबलाकटाक्षकाण्डात् ।[129]

नासौ त्रुट्यति[130] नैकरूपमास्ते चित्रं हेलनया[131]ऽन्यमेति भावम् ॥[132]

दक्षिणान्तिका च ॥

॥ ६ ॥ इन्द्रवज्रा तौ ज्गौ ग् ॥ १६ ॥

तौ द्वौ जो गौ च द्वाविन्द्रवज्रा[133]—

यस्येन्द्रवज्राधिक[134]गोत्र[135]गर्वो विद्यार्थवंशैर्यदि चास्य[136]धार्ष्ट्यम् ।[137]

नश्यत्यदो[138] मन्मथमन्थराणां[139] स्त्रीणां कटाक्षैर्गमितस्य[140] दास्यम् ॥

॥ ६ ॥ उपेन्द्रवज्रा ज्तौ ज्गौ ग् ॥ १७ ॥

जतजा गौ चो[141]पेन्द्रवज्रा—

तदैव[142] सिद्धो[143] विजयो वधूनां धवेष्वनङ्गास्त्रखलूरिकाणाम् ।[144]

यदा[145] विलासंगमिताऽङ्गनानामु[146]पेन्द्रवज्रायुधयोरपि श्रीः ॥

॥ ६ ॥ आद्यन्तावुपजातयः ॥ १८ ॥

इह प्रसङ्गाद्विषमवृत्तानीन्द्रवज्रोपेन्द्रवज्रयोः पादसङ्करेणोच्यन्ते। एतयोः[147] पादावर्धस्यादिरन्तो[148] यदि स्यातामेकस्मिन्नेव[149] श्लोके तदुपजातयो[150] नाम वृत्तानि ।

आभ्यामुपजातय इति वक्तव्ये आद्यन्तावुपजातय[151] इति ब्रुवन्नाचार्य[152] इमा विपरीताख्यानक्याख्यानकया व्यावर्त्तयति ।[153] यदि हीन्द्रवज्रापाद उभयोरर्धयोरादिरेव स्यादुपेन्द्रवज्रापादोऽन्त्य आख्यानकी ।[154] अथोपेन्द्रवज्रापाद आदिरितरोऽन्त्यो विपरीताख्यानकी। तस्मादिन्द्रवज्रापाद एव

125) M भ्रूज्वापला (126) A : ⁰ह्वन ; M : घृन⁰ (127) A : पक्ष्मराजिसज्या ; M : पक्षराजि सज्जा (128) A : धत्रा ; M : त्र्रा ; S : धात्र (129) M :...बलाः कटाक्षकाण्डम् (130) A : त्रोट्यति ; M : कुड्यति (131) A : सिक्तमिया ; M : हेलकया (132) A : द्रवत्वमेति (133) A : इन्द्रवज्रौ (134) A : अपित⁰ ; S : अधित⁰ (135) M : गात्र (136) A : विन्यर्थवंशश्च यदस्य (137) M : धार्ष्यम् (138) A : शाम्यत्तधो ; M : नश्यदात्यदो ; S : नश्यत्यथो (139) M : मन्मध्वमन्धराणां (140) A : नमितस्य ; S : कमितस्य (141) A adds द्वौ (142) A : तदैष (143) M : सिद्ध (144) A : खला-रिकाणाम् ; M : खलु······ ; S : खलुरिणाम् (145) A : यथा (146) A : विलासाङ्गमिहाङ्गनानां ; M : विलासङ्गम हाङ्गनानां (147) A adds वृत्तयोः ; M reads : यदा पूर्वोक्तयोस्तयोः (148) A : आदिश्चान्तश्च (149) M : स्यात्तामेक···कस्मिन्ने (150) A : तदेत्रोपजातयो ; M : तदोपजातयो (151) A drops उपजातयः (152) M drops आचार्यः (153) M : इमे विपरीताख्यान नय्या रव्यानक्या वृत्तय इति ; A : वावर्तयति ; S : वरीवर्ति (154) M : पादश्चान्ते आख्यानकी स्यात्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूर्वार्धस्य परस्य वाऽ[155]ऽदिरन्तश्च स्यात्। पूर्वस्यादिः परस्यान्त इति वा परस्यादिः पूर्वस्यान्त इति वा पूर्वादिः परादिरितिवा पूर्वान्तः परान्त इति वा।[156] [79] तथोपेन्द्रवज्रापादोऽपि—

यद्वाऽपराधोऽत्र न कामिनीनां ताश्चापि पुंसां[157] नयनैः स्खलन्ति।
स्त्रियः पुमांसश्च तथैव सृष्टा[158] यथा मिथो यान्तुऽपजात[159]योऽपि॥
लज्जा गता क्वापि[160] च लज्जितेव[161] श्रुतं क्वचिच्छ्रोत्रपुटे निलीनम्।
कुलाभिमानो[162] मुनिनैव[163] मुक्तो मुक्ते बधूभिर्नयनांशुपाशे॥[164]
तिष्ठन्तु कामाकुल[165]दृष्टिपाता भावाश्च[166] तेषामुपजातिभेदाः।
एकाऽपि वाणी स्मितमञ्जुरासां[167] करोति पुंसामपरामवस्थाम्॥[168]

द्वादशोपजातयः। अयञ्च न्यायोऽन्यत्रापि[169]स्यात्। तेन[170] त्रैष्टुभानामन्येषां वा वृत्तानां पादाः समाक्षरसंख्या द्वौ द्वावेकभूयं भूत्वा द्वादश,[171] त्रयस्त्रय एकभूयं भूत्वाऽष्टादश,[172] चत्वारश्चत्वार एकभूयं भूत्वा चतुर्विंशतिरिति विषमवृत्तानि।[173] एषां विषमाक्षराणां राश्यूनमिति[174] (V. 5) संख्योक्ता। यत् पुनः क्वचित्—

एह्येहि फुल्लाम्बुजपद्मनेत्र नमोऽस्तु ते देव पराऽप्रमेय।
प्रसह्य मां पालय लोकनाथ रक्षेह मां[175] भूतशरण्यसङ्घ॥[176]

इत्यादिषु प्रथमस्य तृतीयस्य च पादस्य लघ्वन्तत्वं दृश्यते, तदप्येष्वेव[177] विषमेषु लघ्वन्तं गुर्वन्तं वा पादं[178] द्रष्टव्यम्। नेन्द्रवज्रोपेन्द्रवज्रापादसंकरजम्। तयोर्गुर्वन्तत्वात्।[179] ततश्च यदेके[180] वर्णयन्ति— गन्त इत्यत्र पादान्तेऽपि लघो[181]र्गुरुसंज्ञा विधीयत इति, तदपि[182] प्रत्युक्तम्। विषमेष्वेव तदुपपत्तेः।[183]

एवं तर्ह्यर्धान्तेऽपि[184] तथैवास्तु।[185] नैतत्। आर्यादीनामर्धस्य लघ्वन्तत्वासम्भवात्। दृश्यते च[186] ह्रस्वान्तमर्धं चीनांशुकमिव केतोः प्रतिवातं नीयमानस्येत्यादिषु। तदर्धस्यैवावश्यं[187] गुरुसंज्ञा विधेया। अन्यथा मात्रासंख्या[188]पकर्षात्तदेव[189] प्रयोगक्षेमत्वाद[190]न्येषामपि गृह्यते॥[191]

(155) M : पादस्य in place of परस्य वा (156) M reads the sentence : पूर्वादिः परस्यादिरिति परादिः पूर्वान्ति इति वा। (157) A : पुंसो (158) A : दृष्टा ; S : स्पृष्टो (159) M : या उपजात⁰ (160) A : वापि (161) A : चलन्ति ते वा (162) S : कुलाभिमानी (163) M : मुनिरेव (164) A : ⁰पाली S : ⁰पाशः (165) A : तामाकुल⁰ (166) M : भावश्च (167) M : स्मि मजुरासां ; S : स्मितमञ्जुरागां (168) M : पुंसामिव रामवस्याम् (169) M drops अपि (170) A adds अन्येऽपि (171) M adds : द्वादश विषमवृत्तानि भवन्ति (172) All the MSS. read षट्त्रिंशत् (173) A adds भवन्ति ; M drops एकभूयं भूत्वा (174) A : विषमाक्षराणि कुनमिति ; M : विषमं च राश्यूनमिति (175) M : रथो···मा (176) A. cites here *Kumāra* I. 3*ab*. (177) M : तदप्येष्वेकव (178) A : ⁰सङ्करजं M : लघ्वन्तगुर्वन्तपादसंकरजा (179) M : इन्द्रवज्रोपेन्द्रवज्रापादसंकरजातयो गुर्वन्तत्वात् (180) M drops यद् (181) A & M : ह्रस्वस्य (182) A drops तदपि (183) M : विषमेष्वेतदुपपत्तेः (184) M & S drop अपि (185) A : तथैव माऽस्तु (186) M : लघ्वन्तत्वसम्भवाद्दृश्यते च। (187) M : तदर्धमेवावश्यं ; A : तदद्धि एवावश्यं S : तदर्धस्यैवावश्यं (188) A drops संख्या (189) M : तत्तस्य⁰ (190) A : योगक्षेमकत्वाद् ; S : प्रयोगक्षमत्वाद् (191) M & S : कथ्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ६ ॥ दोधकं[192] भौ भ्गौ ग् ॥ १९ ॥

मास्त्रयो गौ च द्वौ दोधकम्—

द्यूतवधादिभिरर्थसमीहा[193] देहविपत्फलसाहस-[80]-कर्म ।[194]
दोधकवृत्तमितीह भजन्ते धृष्टविदग्धबधूजनवश्याः ॥[195]

॥ ६ ॥ शालिनी म्तौ त्गौ ग् समुद्रर्षिभिः[196] ॥ २० ॥

मः तौ[197] गौ च शालिनी । चत्वारः सप्त च यतिस्थानम्—

नीवीमङ्गे[198] स्रंसयित्वा[199] वसानाः केशानग्रे संकिरन्तीर्विकीर्य ।
लीलां लीला[200]शालिनीर्दर्शयन्तीर्न प्रेक्ष्यन्ते[201] पण्डिता जेतुकामाः ॥

॥ ६ ॥ वातोर्मी म्भौ त्गौ गश्च ॥ २१ ॥

ममता गौ च द्वौ वातोर्मी । चकारात् पूर्वयतिरनुकृष्यते[202]—

अन्ये ताभिर्विजिता[203] वाणिनीभिर्भूयो भूयो हृदि चिन्ताविलासैः ।[204]
त्यक्त्वा लज्जां कुलधर्मांश्च नीत्या[205] संसेवन्ते धूतवा[206]तोर्मिधर्मम् ॥[207]

॥ ६ ॥ भ्रमरविलसितं म्भौ न्लौ गश्च ॥ २२ ॥

मभनलगा भ्रमरविलसितम् । चकाराद्यत्याकर्षः[208]—

दृष्ट्वा क्वापि[209] भ्रमरविलसितान्[210] देशांश्चान्या[211] वनगिरिसरितः ।[212]
कान्तां कामी[213] हृदि ननु[214] कुरुते धन्यस्त्वन्यः[215] शुभमृषिचरितम् ॥[216]

वानवासिका च ॥

॥ ६ ॥ रथोद्धता न्रौ ल्गौ ग् ॥ २३ ॥[217]

रनरा लगौ च रथोद्धता—

यत्र केवलमनोरथोद्धता नाश्रिताऽपि[218] विकरोति मानसम् ।
तत्र सन्निहितवाणिनीजने[219] श्रद्दधीत विजयाय कः पुमान् ॥

अपरान्तिका च ॥

(192) M : तोथकं (193) M : द्यूतवदादिभिरर्धसमीहा (194) M : देहविफलीफलसाहसकान्तम् (195) M : शालिन्युक्ता त्मौ त्गौ ग् । समुद्रर्षयः (196) S : वेश्याः (197) A adds द्वौ (198) M : अग्रे (199) M : संसयित्वा (200) A : लीलां (201) M : प्रक्ष्यन्ते (202) आकृष्यते (203) M : निर्जिता (204) M : हृदि चित्ता ; A : हृतचित्ता (205) A : नित्यं ; S : रीत्या (206) A : धृत°; M : भूत° (207) A : °धर्माः (208) A : यतिराकृष्यते (209) A दृष्टा वाऽपि ; M : दृष्ट्वावपि (210) A & M भ्रमरविलसिता (211) A : देशाश्चान्या ; M : देशांश्चान्यान् (212) A : गिरिवनसलिलाम् ; S : गिरिवनसरितां (213) A : कामी कान्तां (214) A : न तु ; M : वर्तुं ; S : वत (215) A : वन्यः अन्यः (216) A : शुभ ऋषिचरितम् ; M : अन्यशुभमृषिचरितम् (217) M omits the *vṛtti* and illustration on this *sūtra* and runs on to the next *sūtra*. (218) S : नार्पिताऽपि (219) S : °भामिनीजने

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ६ ॥ स्वागता र्नौ भ्गौ ग् ॥ २४ ॥

रनभा गौ च द्वौ स्वागता—

पूर्वमेव महिलामधुमत्तः[220] ताभिरेव हृदयं हृतशेषम् ।[221]

अद्य[222] क्लिश्यति[223] वपुर्विरहेण[224] स्वागतानि कुशलानि खलस्य ॥

आपातलिका[225] च ॥

॥ ६ ॥ वृत्ता नौ स्गौ ग् ॥ २५ ॥

नौ द्वौ सो गौ च[226] वृत्ता ।[227] वृन्तेति पाठान्तरम्—

क्षपयति[228] मनसिशये[229] स्वाङ्ग[230] रमयति युवतिजने चित्तम् ।[231]

निपतति विपरिणतो[232] वृत्तात्[233] फलमिव विपरिणतं वृन्तात् ॥[234]

[81] ॥ ६ ॥ श्येनी र्जौ र्लौ ग् ॥ २६ ॥

रजरा लगौ श्येनी—

श्येन्यमूषु कामिनीषु यत्[235]स्मिते दन्तपंक्तिरायता विलान्तरा ।[236]

श्येन्यसौ[237] स्वयं नरस्य रागिणः[238] चित्तमीनहारिणी[239] किमु स्त्रियः ॥

॥ ६ ॥ प्रत्यवबोधो भ्तौ न्गौ ग् ॥ २७ ॥[240]

भतना गौ च प्रत्यवबोधः —

यद्रसदिग्धान्[241] युवतिकलापादीक्षणवाणान्[242] रतिपतिरस्यन् ।

प्रत्यवबोधं हरति नराणां तेन स आस्ते शवरकुलेऽपि ॥[243]

कुड्मलदन्ती श्रीर्वा ।[244] पञ्चसु षट्सु च यतिः ।[245] वानवासिका च । अत्र[246] नवभ्यो यदि खलु सगणस्तान्तु जगत्यां[247] विदधति[248] ललनाम् । वानवासिका च ॥[249]

नयमा गौ[250] चेदनवसिता[251]—

यदपि वधूनां[252] नेत्रकलापादनवसितेषो[253]र्विभ्रमवाणान् ।

हृदयममित्वा मुञ्चति चित्ते वसति[254] ततोऽयं[255] धन्विषु[256] कामः ॥

220) M : महिमामधुहृद्यः (221) A : हृतशेषः (222) A : अस्य (223) A : कृश्यति (224) M : विवहेण ; S : विरहे च (225) M : उत्पातलिका (226) M adds द्वौ (227) M & S add नाम (228) A : कम्पयति (229) A : मनसि यो (230) A : स्वास्त्यं ; S : स्वान्तं (231) M & S : वित्तम् (232) M : विपरिणतं (233) M : वृन्तात् (234) M : तावत् ; S : वृत्तात् (235) A : या (236) A : आयतघनान्तरा (237) A : श्येन्त्यसौ ; S : श्येत्यसौ (238) A drops रागिणः (239) A : कामिनी रिणि ; M : चित्तमीन हरिणी (240) A does not recognise this as a separate *sūtra*. (241) M : द्रुसदश्यान् (242) A : ईक्षणवाणा (243) A : कुलेषु ; S : कुलानि (244) A drops श्रीः ; M : कुभृद्मलादि श्रीः (245) A : सप्तसु यतिः (246) A : यत्र (247) M : जगणः गत्यां (248) M drops विदधति (249) A adds वा after ललनां ; M drops वानवासिका च ; : ललनां वानवासिकां वा (250) A drops (251) M : चेद्वानवासिका ; S : च नवासिता (252) A : धानां (253) M : अनवसितेषु (254) A : भववसति (255) A : ततो वि (256) A धवीषु ; S : धनिषु ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पट्सु पञ्चसु[257] यतिरूपचित्रा च ॥

अथ जगत्याम्—

॥ ६ ॥ जगती ॥ २८ ॥

अधिकारोऽयमाऽध्यायपरिसमाप्तेः। ननु[258] किमर्थोऽयम् ?अ क्षरसंख्ययैव[259] गायत्र्यादिवज्जगतीति गम्यते।

उच्यते—तोटकं स इत्यादिष्वनुक्तसंख्येषु द्वादशानामेवाक्षराणां ग्रहणं स्यादिति। तथापि[260] वृथैव[261] पुटद्रुत[262]विलम्बितादीनां द्वादशाक्षराणां मध्ये पाठादेव तत्सिद्धेः।[263]

एवं तर्हि, पूर्वापरपदार्थवशात् संख्याऽस्मिन् तन्त्रे[264] नाश्रीयत इति सूचयितुम्। तथा चोक्तादीनां पूर्वस्मात् संख्यानियमो[265] नाश्रितः।[266] समानीप्रमाणीवितानानां पादस्यानुष्टुब्वक्त्रमि (5/9)त्यस्मात् परस्मादष्टाक्षरत्वं नाश्रीयते[267]। स्वरूपेणोपात्ता[268] संख्याऽऽश्रीयत[269] एव[270] यजुषां षट् साम्नां द्विरित्यादिषु। अत एवात्र[271] संख्या[272] क्वचित् स्वरूपेणोपनीयते[273] क्वचिद्वस्वादिसंकेतैः॥

[82] ॥ ६ ॥ वंशस्थं ज्तौ ज्रौ ॥ २९ ॥

जतजरा वंशस्थम्—

रसैः सृजन्तीं मदरागविभ्रमां[274]
निपेव्य हालामिव वारवारुणीम्।[275]
पतन्त्य[276]भीका वरवारवाणिनी[277]—
मपि स्ववंशस्थजनोचितक्रियाः॥[278]

॥ ६ ॥ इन्द्रवंशा तौ ज्रौ ॥ ३० ॥

तौ द्वौ जरौ चेन्द्रवंशा—

अर्थैर्नमन्तीषु[279] न हार्दसंस्तवै[280]—
र्यो[281] वारमुख्यासु रतोऽतुलास्वपि।[282]
तस्मिन्न[283] जातु क्षतकीर्तितेजसि[284]
श्रीरिन्द्रवंशाभिजनेऽपि तिष्ठति॥

(257) M : पञ्चसु षट्सु (258) A adds च (259) A : संख्यायैव (260) M : अथापि ; S : तत्रापि (261) A : व्यर्थमेव (262) A : °धृत° (263) M : पाठादेतत्प्रसिद्धेः (264) A : तत्र (265) A drops संख्यानियमो (266) M : नाश्रीयते श्रितः (267) A drops पर......श्रीयते ; M : adds : उक्तादीनान्तु न पूर्वस्मात् संख्यानियमो (268) A : रूपेण रूपात्तत् (269) M : संख्यापूर्वा समाश्रीयते (270) A ends the sentence here. (271) M adds च (272) A : संख्यायाः (273) A : स्वरूपे नोपनीयते (274) M : मदिरा गविभ्रमा (275) A : वारवाणीम् (276) A : पतत्य° (277) M : वरवाणि (278) M : क्रियाम् (279) A : अधोन्नमन्तीषु (280) A : सहार्दवास्तवैः ; S : महार्घसंस्तरैः (281) M : या ; S : ये (282) A : °स्त्रिव ; M : स्वजप्रातुलास्वपि (283) M : तस्मान्न (284) A : क्षतकित्रितेजसी ; M : क्षतकीर्तितेजसी

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

।। ६ ।। द्रुतविलम्बितं न्भौ भ्रौ ।। ३१ ।।

नो भौ द्वौ रश्च द्रुतविलम्बितम्—

नवरसस्य परस्य विकारिका
स्वपरसास्वतिरूपगुणासु च ।
रुचिफलं गणिकासु सुखा[285]न्नृणां
द्रुतविलम्बितमग्निशिखास्विव ।[286]

।। ६ ।। तोटकं सः ।। ३२ ।।

सगणाश्चत्वारश्चेत्तोटकम्—

विटवीरजनस्य गृहाः कुलटा—
स्वजना अपराद्धशराः[287] पुरुषाः ।[288]
श्रुतमस्य महा[289]समरस्य कथा
अपि तोटकगन्धक[290]नाटकवान् ।।

[291]तोटकमेव सगणाः[292] षट् चेद्धृतौ[293] ललितं नाम वृत्तम् ।।[294]

।। ६ ।। पुटो नौ म्यौ वसुसमुद्राः ।। ३३ ।।

नौ द्वौ मयौ च पुटः । अष्टौ चत्वारश्च यतिस्थानम्——

विटजन[295]सहवासा क्षुणणनारी[296]
रुचिरसजवाचा[297] सद्भिरार्यैः ।
अणुकमपि[298] मजन्ते[299] सुस्वभावाः
पुटमिव[300] कुसुमानां पुण्यगन्धाः ।।[301]

(285) A : फलं (286) M : °शिखामिव (287) M : स्वजनानपराद्धशराः (288) M : प्ररुषाः ; S : परुषाः (289) A : वहत्° (290) A : तोटकं गर्भ° (291) A adds before this : नाद्य संरम्भप्राया वाक् (292) M drops सगणाः (293) A : अतिधृतौ (294) M adds स्यात् (295) A : विद्वज्जन° (296) A : क्षणं नारी ; S : क्षुन्ननार्यः (297) A : धनसहवासा ; M drops रुचिर° ; (298) M : अणकमणि ; S : अणुकर्मणि (299) A : भजन्ति (300) M : पुनमिव (301) M commits Haplology here and drops the following lines including the next *sūtra* and its illustration (first half) ; A adds : अणकं गव्यम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ६ ॥ प्रमुदितवदना नौ रौ ॥ ३४ ॥

नौ द्वौ रौ च द्वौ प्रमुदितवदना। चञ्चलाक्षी नौ राविति केचित् पठन्ति——

न मदनमृगचञ्चलाक्षीं व्रजेत्[302]
प्रमुदितवदनाञ्च वेश्याङ्गनाम्।
त्यजति हि[303] धनलोलुपां तां[304] स्मरो
न सुरभिरिति[305] शालभञ्जीमिव ॥[306]

॥ ६ ॥ जलोद्धतगतिः जसौ जसौ रसर्तवः ॥ ३५ ॥

जसौ द्विकौ जलोद्धतगतिः। षड्साः षड्तवो[307] यतिस्थानम्—

गुणोद्धतगतिः कुलोत्तरवधूः[308]
धनोद्धतगतिः सुमाननवधूः।[309]
तनूद्धतगतिः पणोचितवधूः[310]
यथा तनुनदी[311] जलोद्धतगतिः ॥

[83] ॥ ६ ॥ भुजङ्गप्रयातं यः ॥ ३६ ॥

यश्चत्वारो भुजङ्गप्रयातम्[312]—

गलत्कञ्चुकान्तैर्बहिः स्नेहकान्ता[314]
परेष्वासजन्ती[315] रसं प्राणमूल्यम्।[316]
भुजङ्गप्रयातं पदं घृष्यमाना[317]
भुजङ्गीव वक्त्रे[318] न वेश्या[319] निषेव्या ॥[320]

अर्धे यतिरिति केचित्। एवं याः षट्चेद्धृतावाप्यायनी[321] नाम वृत्तम् ॥

(302) A : व्रजतु मदनमृग्यचञ्चलाक्षीं ; M: न तु वनमृगचञ्चलाक्षीं ; S : व्रजतु (303) A drops हि (304) A : मदलोलवान्तां; S: वद लोलुपान्तां (305)A M&S: सुरतिरिति (306) A: सालभञ्जीमिव ; M: सालभञ्जमिव (307) A: षट् षट् (308) M : कुतोत्तरवधूः ; S: कुतो नरवधूः (309) A : सुमध्यमवधूः (310) M : पणोचित-वरः (311) M : यथैव ललना ; S: यथा्तुलना (312) M omits the name. (313) M : कञ्चुकाग्रैः (314) M & S: स्नेहकारैः (315) A : परेष्वालपन्ती (316) A रसं प्राणपूल्याम् ; M : रसप्राणमूल्यम् (317) M : पदङ्घ्रिः समाना ; S : वदन्तीष्यमाना (318) A : वक्त्रा (319) M : विवेश्या (320) A & M : निवेश्या (321) A : षट् चेत् ऋताप्यायनी ; M : षट् चोष्टनौ व्राप्यायनी

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ६ ॥ स्रग्विनी रः ॥ ३७ ॥

राश्चत्वारः स्रग्विनी—

चन्द्रकान्तप्रभा[322] चन्द्रशाला शुभा
मत्त[323]वेश्याङ्गना मण्डिता[324] स्रग्विनी ।
यत्र तत्र स्मरोऽ[325]नङ्ग एवाङ्गवान्[326]
स्यादिति[327] प्रायशः षिड्गसंसत्कथा ॥[328]

अत्राप्यर्धे यतिरिति केचित् ॥

॥ ६ ॥ हिमविकरा न्यौ न्यौ ॥ ३८ ॥

नयौ द्विकौ हिमविकरा—

नयगुणयुग्मं रसयुगयत्या[329]
हिमविकरा[330]स्याद्गजललितं वा ।[331]
कुसुम[332]विचित्रेत्यपरमतेऽसौ
मदनविकारेत्यपरमतेऽपि ॥[333]

वानवासिका च ॥

॥ ६ ॥ शशप्लुता[334]त्यौ त्यौ ॥ ३९ ॥

तयौ द्विकौ शशप्लुता—

स्मृत्वाऽप्यधि[335]पादं मञ्जीरकशिञ्जां[336]
कर्णे[337] गुरुपाशौ[338] हस्ते वलयानि ।
कण्ठे मणिमालां वेशेषु[339] वधूनां
कामग्रहपीडां[340] को नाम सहेत[341] ॥

अर्धे यतिः । मणिमालेत्यन्ये[342] ॥

(322) A : ⁰निशा ; S : ⁰निभा (323) M : मन्व⁰ (324) M : मण्डित⁰ (325) A : स्वरी (326) A : सङ्ग एवाङ्गनां ; M : ⁰नङ्गवाङ्गवान् ; S : सङ्ग एवाङ्गवान् (327) M : स्यति (328) M : ⁰ष्यङ्गसंसत्कथा (329) A : हिमरसवत्या (330) M : हिमकविकरा (331) गजललितां (332) A : किमिति ; S : किसम⁰ (333) A : मदनविचारेऽप्यपरमते च ; M : मदनविकारेऽप्यपरमतेऽपि (334) M : शशप्लुतौ (335) A omits the first four letters. (336) M : मञ्जीरकसिञ्जाः (337) M & S : कण्ठे (338) M : गुरुपादौ (339) M : वशेषु (340) M : कामगृहपीड़ां (341) M : हस्ते ; S : सहते (342) A adds : पठन्तीति शेषः । तां शशप्लुतां मणिमालेति केचित् पठन्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ६ ॥ प्रमिताक्षरा स्जौ सौ ॥ ४० ॥

सजौ सौ च द्वौ प्रमिताक्षरा—

प्रमिताक्षरेण वचनेन हित[343]
कथयामि ते[344] शृणु च तत् कुरु च ।
गणिकाश्रितामपि पुरीं सततं
भुजगाश्रितामिव[345] तरीं[346] जहिहि ॥

॥ ६ ॥ वैश्वदेवी मौ याविन्द्रियर्षयः ॥ ४१ ॥

मौ द्वौ यौ च द्वौ वैश्वदेवी । पञ्च सप्त च यतिः[347]—

पूर्वाषाढाणाञ्चापभावे[348] सहाया[349]
नित्यभ्रष्टानां[350] मूलसंस्थानवृत्तेः ।
अग्रे कुम्भस्य स्थायुका चन्द्रकान्ता[351]
रूपाजीवा स्याद्वैश्वदेवीव[352] तारा ॥

चन्द्रकान्तेत्यन्ये[353] ॥

[84] ॥ ६ ॥ कान्तोत्पीड़ाम्भौ स्मौ समुद्रवसवः ॥ ४२ ॥

मभसमाः कान्तोत्पीड़ा । चत्वारोऽष्टौ च यतिस्थानम्[354]—

कुर्वन्त्येषा कुलभवकान्तोत्पीड़ां[355]
विभ्रेपञ्च[356] स्थिरकुलमर्यादानाम् ।
भ्रश्यत्स्नेहा[357] क्षणमिव नीलीरागा
दोषैर्वेश्या जलधरमालातुल्या ॥

जलधरमालेत्यन्ये ॥[358]

॥ ६ ॥ नवमालिनी न्जौ भ्याविति[359] ॥ ४३ ॥

नजभया नवमालिनी—

परजनदूषणासु सहवासात्[360]
परपरिधान क्लृप्तवसनासु ।

(343) A : चैतं (344) A adds तु (345) M : भुजगान्विताभित्र (346) A drops the word ; S : पुरीं (347) M reads चन्द्रकान्तेत्यन्ये here in a similar manner as in the *vṛtti* on VI. 40. (348) A : चा प्रभावे (349) M : सभायां (350) M : तिर्यक दृष्ट्वा ना ; S : तित्यभृष्टानां (351) M : चम्पकान्ता (352) A : वैश्वदेवी च (353) A adds : पठन्तीति शेषः । वैश्वदेवीं चन्द्रकान्तेति केचित् पठन्ति ॥ (354) M mentions the alternative name here. (355) M : कुलभवकान्ता पीड़ा (356) A : विभेषञ्च (357) A : तस्मात् स्नेहात् ; S : तस्य स्नेहात् (358) A adds : कान्तोत्पीड़ां जलधरमालेति केचित् पठन्ति ॥ (359) M omits इति (360) A : परजनदूषिता सुसहवासात् ; M : वरजन दूषणीषु सहवासा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभिनवमालिनीपु परमाल्यैः[361]
पततु[362]मनो न वारवनितासु ॥

अपि च—नो जौ यश्च तामरसं ललितपदं वा-
भ्रुकुटिकटाक्षविलास[363]विकारैः
कृतविकृतैर्गणिकावदनस्य ।
कथमिव तामरसं तुलनाऽभू-
ल्ललितपदं यदवाप्य [364] न लीनम्[365] ॥

नभजया द्रुतपदं[366]मुखरं वा कलहंसा वा—
द्रुतपदं[367] मुखरनूपुरमेपा[368]
व्रजति भग्नकलहंसरुतश्रीः ।
इति गृणाति गणिकां परधर्मै-
र्न परिपश्यति[369] गुणान् यदि[370] तस्याः ॥

नभजरा मत्तकोकिलं प्रियंवदा च—
सकलचित्तमति[371]मत्तकोकिल-
ध्वनिरियं सुखयति प्रियंवदा ।
इति च[372] शंसति खलो मनाक्[373] क्वचित्
कलरवैरुपनतां[374] पणस्त्रियम्[375] ॥

द्वे इमे[376] अपरान्तिके च । तभजरा ललिता —
अङ्गानि सङ्गललितानि[377]विभ्रमा
चित्रा[378] विचित्ररचना[379] च वागिति ।
एतानि वेत्ति गणिकासु कामुको
जानाति[380] साऽपि मदने न[381] साधुताम्[382] ॥

इति भगवतो यादवप्रकाशस्य कृतौ पिङ्गलनागच्छन्दोविचितिभाष्ये षष्ठोऽध्यायः ॥

(361) M : परमात्यैः (362) M & S ; पतति (363) M : ⁰विकास⁰ (364) M : यदवाद्य (365) M : नलिनम् ; S : स लीनम् (366) A & S : द्रुतपदा (367) A : द्रुतपदा (368) A : ⁰नूपुरमेवा (369) M : चर पश्यति ; S : च न पश्यति (370) A : गुणन्यदि ; M : गुणिन्यदि (371) A : ⁰चित्तमत्ति ; M : सकलश्चित्त मति (372) M drops च (373) A : धनामनाक् ; M : घनोदनः (374) A : कु…रुपनतां (375) A & S : परस्त्रियम् (376) A drops इमे (377) M : सङ्गि ललितानि (378) A : विभ्रमाः चित्रा ; M : विभ्रमाश्चित्रा (379) A : चित्रविचित्ररचना (380) M : जानन्ति (381) M : मदनस्य ; S : मदनेन (382) A : साधुता ; M : समता

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ सप्तमोऽध्यायः

[85] इदानीमतिजगत्यादयश्छन्दसः क्रियन्ते ॥ तत्रातिजगत्याम्[1]—

॥ ७ ॥ [2]प्रहर्षिणी म्नौ ज्रौ ग् त्रिकदशकौ ॥ १ ॥

मनजरा गुरुश्च प्रहर्षिणी । त्रिकं दशकश्च[3] यतिस्थानम्—

छित्वाऽर्थे[4] युवतिजने च सङ्गपाशा-
नाध्याय[5] त्रिभुवननाथनाथमीशम् ।
कुर्वाणो[6]यमनियमादिकाङ्गयोगान्[7]
मोक्षाख्यां व्रजति दशां प्रहर्षिणीं ताम्[8] ॥

॥ ७ ॥ रुचिरा जभौ स्जौ ग् समुद्रनवकौ ॥ २ ॥

जभसजगाः रुचिरा ।[9] चत्वारो नवकश्च[10] यतिस्थानम्—

विभावरीमिह[11] रुचिरामभीप्सतोः[12]
परस्परं शशितमसोर्जिगीषतोः ।
पुनः पुनः क्षयमुदयञ्च पश्यतां
नृणां श्रिये[13] कलहकथा कथं भवेत् ॥

॥ ७ ॥ मत्तमयूरं म्तौ य्सौ ग् च ॥ ३ ॥

मतयसगा मत्तमयूरम् । चकारात् पूर्वयत्यनुकर्षः—

धान्यै[14]र्वन्यैर्वर्तितुकामः[15] फलमूलैः
ग्लानिं स्वानां[16] न स्मरतीत्यत्र न चित्रम्[17] ।
कण्ठाश्लेषश्लाघिजनेनापि[18] विनासा-
वभ्रभ्रेषं[19] मत्तमयूरं वनमेति ॥

(1) M begins the Chapter with the *sūtra* 7/1. ; S begins with तत्रातिजगत्याम् (2) Heretofore A writes ॥ सू ॥ instead of the chapter number at the beginning of each *sūtra* (3) M : त्रिदशकौ (4) M : भित्वाऽर्थे (5) A : °नध्याय (6) M : यं तिष्ठन् ; S : कं वा न : (7) A : °योग (8) A : प्रहर्षणीनाम् ; M : प्रहर्षिणीनाम् (9) A adds here : समुद्रनवकौ (10) M : नवकश्च (11) A : विभावरी मुहु (12) M : अभीच्छतोः (13) M : श्रियै (14) A : धन्ये (15) A : वर्त......कामः ; S : वर्धितुकामः (16) A : ग्लानद्वानां (17) A : स्मरभीतीत्यत्र न चित्रम् ; M : स्मरतीत्यत्र विचित्रम् (18) A : काण्ठाश्लेषश्वासीजनेनापि ; M : कण्ठ श्लेष° (19) A : विनाशावभ्राभ्रेषं ; M : विना सा वभ्रेभ्रेयन S : विनाशाभ्रेण वेषं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अपि च तभसजगा लक्ष्मी:—

लक्ष्मीवता पुरुषवरेण साध्यते
धर्मो विमुक्तिरपरमप्यभीप्सितम्[20] ।
लक्ष्मीवतैव कुपुरुषेण हीयते
सर्वं त्वतश्च[21] न चपलस्य[22] सा शुभा[23] ॥

सजौ द्विकौ गश्च जया, सुमङ्गला वा सुनन्दिनी वा[24]—

चरितं[25] यशांसि विजयात् सुमङ्गलां[26]
रमणीञ्च लोकरमणीं सुनन्दिनीम्[27] ।
सकलं करोति विमलं धनागमः[28]
पदवीञ्च[29] मोक्षपदनिर्मलीमसाम्[30] ॥

सजौ सौ गश्च[31] भ्रमरः—

कलया चिराय चिनुते निकरेभ्यो
धनमेक एष[32] मधुना[33] भ्रमरौघः[34] ।
अपरः पुनस्तदपहर्तुमुपायां-
स्तनुते[35] सदा मतिमतामभियुक्तः[36] ॥

अथ शक्वर्यम्—

॥ ७ ॥ असंबाधा मृतौ न्सौ गाविन्द्रियनवकौ ॥ ४ ॥

मतनसा गौ च द्वावसंबाधा[37] । पञ्च नव[38] च यतिस्थानम्-

आश्लिष्यालोलाः[39] सुरभिसुमनसः[40] कान्ता-
स्वेदिव्यायामक्रमरतमुषितव्राताः[41] ।
[86] एषस्त्वर्थिभ्यो[42] घनवन[43]विरमद्वेगो
वातो व्याचष्टे[44] वन[45]वसतिमसंबाधाम् ॥

(20) M drops the first-half of the verse ; S : ⁰व्यभावितम् । (21) A & M : ततश्च (22) A : नयपरस्य ; M : न च फलस्य (23) A : शुभि (24) A : सजौ द्विकौ गश्च सुमङ्गली वसुनन्दी वा ; M : सजौ द्विकौ च विजयसुमङ्गला ॥ सुनन्दिनी वा ॥ ; S : सजसा जगौ च विजया सुमङ्गला । सुनन्दिनी वा ॥ (25) A : चलितं ; S : चकितं (26) A : विजयां सुमङ्गलां (27) A reads the second *pāda* : ......जनिमा (28) M : विमल त्यनंगमः (29) M : पदवीन्तु (30) A : ⁰निर्मलधाम ; M : निर्मलीमसम् ; S : निर्मलं मम (31) adds wrongly : दौ (32) A : एव (33) M : मधुवाक् (34) M & S : भ्रमरौघम (35) A : पुनस्तदपहर्तुमुपाश्रंस्त...ते (36) A : मभिमयात्मकीमुक्तः ; M : मतिमतामतियुक्तः ; S : मतिमया भीतियुक्तः (37) M : वंतनसा गौ च दौ असंवधा (38) M : पञ्चनव (39) A : आशिष्यामोदि ; M : आश्लिष्या लोलाः (40) M : स्युरभिसुमनसः (41) A : स्वेदिन्यायामश्रुतरसप्रुषितव्राते ; M; स्वेदिव्यायाम्य घतरतः प्रषितव्राते ; S : स्वेदिव्यायामश्रुतरसघ्राणव्रातैः (42) A : एतार्थिभ्यो ; M : एकातार्थिभ्यो ; S : एषार्थिभ्यो (43) A : घनवसु⁰ (44) M : वा चष्टे (45) A drops वन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ७ ॥ अपराजिता नौ सौ लगौ[46] स्वरऋषयः ॥ ५ ॥

नौ द्वौ श्चलगा[47]श्चापराजिता । सप्त सप्त च[48] यतिस्थानम्[49]—

प्रसवसुरभयो[50] निलीनमधुव्रता[51]-
स्तरुणकिसलया[52] वनश्रिय[53] आसताम्[54] ।
इयमपि वनजा लता पुरवासिनां
हरति कुसुमिता मनांस्यपराजिता ॥

॥ ७ ॥ प्रहरणकलिका नौ भ्नौ लगौ च ॥ ६ ॥

नौ द्वौ भनलगाश्च प्रहरणकलिका । चकारात् पूर्वयत्यनुकर्षः[55]—

पिकरुतहृषिता परिगत[56]पवना
तरुगतनयना[57] मधुरसरसिका[58]
मृगमदमुदिता वन इह जनता
प्रचलति[59] मदनप्रहरणकलिका ॥

वानवासिका च ॥

॥ ७ ॥ वसन्ततिलका त्भौ जौ गौ ॥ ७ ॥

त्भौ जौ द्वौ गौ च वसन्ततिलका ॥

॥ ७ ॥ सिंहोन्नता काश्यपस्य ॥ ८[60] ॥

एषैव सिंहोन्नतेति काश्यपस्याचार्यस्य मतेन[61] ॥

॥ ७ ॥ उद्धर्षिणी सैतवस्य ॥ ९ ॥

एषैव उद्धर्षिणीति[62] सैतवस्याचार्यस्य मतेन—

सिंहोन्नताभ्र[63]समयाप्तपयोधरश्री-
र्हेमन्तहेमकमला[64] शरदभ्रवासाः[65] ।
उद्धर्षिणी शुचिगुणैः[66] शिशिरालकान्ता
कान्ता[67]वसन्ततिलका च गिरि[68]र्मुमुक्षोः ॥

(46) A : ग्लौ ; M : त्गौ (47) A : रसगला॰ (48) M drops च ,(49) M & S omit स्थानम् (50) M : प्रसन॰ (51) A : लिनिममधुव्रताः (52) A : ॰स्तरुण तरुण (53) A : वरश्रियः (54) A drops आसताम् (55) M : पूर्वत्याकर्षः (56) A : पिकरुतहृपितपरिगृत॰ (57) A : ॰पवनान्तरागनयना (58) M : मधुकररसिका ; S : मधुकररमिका (59) A : चलति न ; S : प्रचरति (60) M omits this *sūtra* (61) M adds वा (62) M : उद्धर्षिणी (63) M : सिहोन्नतात्क॰ (64) A & M : हेमन्त-हेमकमना (65) A : शभदभ्रवासः ; S : शरभद्रवासाः (66) M : शिशुगुणैः (67) M : का ता (68) A omits च गिरिः ; S : न गिरेः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अपि च—नरौ[69] द्विकौ ल्गौ सुकेसरम्[70]—

हृदि यदम्वुजस्य[71] मुकुलं सुकेसरं[72]
वहति तत्र यो हरिमनन्तमव्ययम्।
स[73]खलु नित्यमर्जयति[74] शोमनं धनं
न हृदि[75] शक्रभोग्यधनमारमुद्वहन्॥

भजसना[77] गौ च द्वौ स्खलितकान्तिः[78]—

प्राग्वहुधनो[79] बहुयशाश्च भुवि[80] भूत्वा
दैवरचिताद्यदि[81] पुनश्चरति भैक्षम्।
जीवति[82] कथं पुनरसौ स्खलितकान्तिः
प्राप्तयशसां हि मरणं वरमकीर्तेः[83]॥

इन्दुवदना[84] लघुरुपान्त्य इह यदा॥ अथातिशक्वर्याम्—

[87] ॥ ७ ॥ चन्द्रावर्ता नौ नौ स् ॥ १० ॥

नाश्चत्वारः सश्च चन्द्रावर्ता। शशिकलेत्यन्ये[85]—

सुरसदसि हरिरभजत[86] सरसिजां
विपमशररिपुरतिकृशशशिकलाम्।
विपमुरगकुलममृतममरगणः
कुटिलतरविधिचरितमिद[87]मसमम्॥

सप्तस्वष्टसु यतिः॥

॥ ७ ॥ मालर्तुनवकौ चेत् ॥ ११ ॥

एषैव[88] षगणव च यतिश्चेन्माला[89]—

स्रजमिव किल परशिरसि विनिहितां
श्रियमपि[90] दृढमभिदधति[91] परगताम्।
परपिहितसिचयमिव[92] परवनितां
परतनुमिव निजतनुमपि सुधियः[93]॥

(69) M omits अपि च and starts : नतौ (70) M : मुकेतुमाला ; S : मुकेशरम् (71) A : यदं वजस्य (72) A & S : मुकेशरं (73) A : न (74) A : नित्यमाजयति ; M : कृत्यमार्जयन्तीति ; S : नित्यं वर्जयति (75) A : न खलु (76) M : शत्रु० (77) A : भजनसा (78) M : स्खलितकान्ता च (79) A : :...ना (80) A : कवुविल (81) A : दैवचरिताद्यदि (82) A drops जीवति (83) M : वरमकीर्तिः (84) A & M : इन्द्रवदना (85) A : शशिकलितेत्यन्ये। एतामेव शशिकलितेति केचित्। M : एतामेव शशिकलितेति यावत्। (86) M : हरिमभजति (87) M : ०रचितमिद० (88) M : चन्द्रावर्तैव (89) A : यतिस्थानञ्चेत् (90) A : श्रियमिव (91) M : दृढमपि दधति ; S : दृढमजिधरतु (92) A : परजनधृतसिचमिव ; M : परपरिहितसिचमिव ; S : परजनहितसिचमिव (93) M : कुकवयः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

|| ७ || मणिगुणनिकरो[94] वस्त्रृपयश्चेत्[95] || १२ ||

चन्द्रावर्तेवाष्टसु सप्तसु यतिश्चे[96]न्मणिगुण[97]निकरः—

परजनयुवतिषु कृतरणरणकः[98]
कुलमपसदयति[99] तिरयति सुयशः[100] ।
स्थगयति गुरुमपि गुणगणमखिलं
कुसुमजरुचिमिव[101] मणिगुणनिकरः[102] ॥

[103]इदमतिशक्वर्यामन्तेगुरुकं वृत्तम् । ईदृशं गायत्र्यां वृत्तम[104]भिजिदुष्णिहि सरलं धृतौ विमलमतिधृतौ[105] शुकपदं कृतौ[106] कनकलताऽभिकृतौ समकम् ॥

|| ७ || मालिनी नौ म्यौ यश्च || १३ ||

नौ द्वौ मो यौ च द्वौ मालिनी । चकारात् पूर्वयत्यनुकर्षः—

परकपटमयानामर्थवत्सु स्थितानां[107]-
मदृढगुणशतानामध्वगैः सङ्गतानाम् ।
न हि गुणलयनीत्यास्तुल्यमन्य[108]द्धूना—
मितिविदपि वृणीते[109] पण्डितो मालिनीस्ताः[110] ॥

नान्दीमुखीति[111] भरतः । एषैव[112] शक्वर्यां करिमकरभुजा[113] स्यादन्तिमं गं विना[114] । अपि च । नो जो द्वौ भरौ[115] चारविन्दम्—

भवतु[116] मुखं युवतेः सपद्म सकर्णिकं[117]
भ्रमरनिपान–[88]–पदं सदा[118] विकचं श्रिया[119] ।
न तदरविन्दसमं तथाऽपि मतं यतो[120]
जलदृढसंगपदं सजालदशं[121] सदा ॥

(94) M : मणिगगनिकरो (95) A omits चेत्(96) A : अष्ट सप्त च यतिस्थानञ्चेत् ; M adds च (97) M drops गुण° (98) M : कृतरणरणिकः । (99) M : °दशयति ; S : °शदयति (100) A : मणिगुणनिकसः ; M : मणि सुखयशः (101) A : कुसुमजरुचिरिव ; M : कुसुमितरुचिमिव (102) A : मणिगुणनिकसः ; M : मणि गणनिकरम् (103) M & S add a name here : चित्रा च । (104) A omits : गायत्र्यां वृत्तम् (105) A : विमलमतिः । अतिधृतौ (106) M : प्रकृतौ (107) M : मरकपटमप्यूनां पूर्वत्सुस्थितानां (108) A : गुणलयनीत्यस्तुल्य° M : गणलयनीकस्तुल्य° ; S : गुणलयनीचास्तुल्य° (109) M : इदमप- बृणते ; S : इति वदति वृणीतः (110) A : पण्डिता° M : मण्डिता° S : मण्डनमालिन्दन्याः (111) A : नान्दिमुखोभि° ; M : नदीमुखमिति (112) M : एष्वेव (113) A : हरिमकरविना (114) A drops after स्यात् ; M : स्याद्दत्तमंगं विना ; S : स्याद्दलिमं गं विना (115) A : नौ द्वौ भरौ (116) M : भवति (117) A : सपद्मकर्णिकं (118) A & M drop सदा (119) A : श्रियाः (120) तथापि मतमतये ; M : तथा विम्तयतो ; S : तथाऽभिमतं यती (121) A : जतदृढशृगपदा लजालदशं ; S : जलदृढशृङ्गपदं सजालदशं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इदमेव तृतीयचतुर्थयोर्व्यत्यासात्[122] प्रभद्रकम्[123]। रणौ भौ च[124] द्वौ रश्च सुन्दरं वा रमणांशुकं[125] वा मणिभूषणम् वा—

सुन्दरं वदति धारयते रमणांशुकं
दर्शनाय च करोति निजं मणिभूषणम्।[126]
एवमादि विधिना वनिता नयते[127] वशं
तत्र पण्डितजनो[128] न विमुह्यति[129] नापरः॥

अथाष्टौ—

॥ ७ ॥ ऋषभगजविलसितं भ्रौ नौ नृगौ स्वरनवकौ ॥ १४ ॥

भरौ नास्त्रयो गुरुश्च ऋषभगजविलसितम्। सप्त नव च यतिः[130]—

पिङ्गलनागशास्त्रमिव गहनमृषिगतं[131]
धीर्मम मोक्षवर्त्म[132] कथमनुजिगमिषति।
युज्यत[133] एव वा तदनुविशति हि हरिणी[134]
काननमुद्धतागमृषभगजविलसितम्॥[135]

अपि च। नो जास्त्रयो रगौ च वाणिनी—

यदभिमतः[136] स्वयमेव विनश्यति स्मरोऽयं
विषयसुखानुभवेन[137] निरिन्धनो यथाऽग्निः।
न तदुचितं पुनरेव नवैर्हि[138] वाणिनीना-
मभिसरणैः[139] प्रभवत्ययमिन्धनैरिवाग्निः[140]॥

इयमेव[141] सप्तमाष्टमयोर्लघुगुर्वोर्व्यत्यासात् केषाञ्चित् वाणिनीति[142]॥

अथात्यष्टौ—

॥ ७ ॥ हरिणी न्सौ म्रौ स्लौ ग्रससमुद्रर्षयः ॥ १५ ॥

नसमरसलगा[143] हरिणी। षट्, चत्वारः सप्त च यतिः[144]—

विचरतु वने वन्यैर्जीवन्नरो हरिणीसखः[145]
श्रयतु यदि वा नाना सस्यैर्नवैर्हरिणी भुवः[146]।

(122) M : तृतीयचतुर्थगणयोः (123) A: प्रवज्ञकम् ; प्रभन्दकम् (124) M drops च (125) A : सुन्दररमणांशुकं (126) M drops मणि⁰ (127) M : वनितां यते (128) M : मण्डितजनो (129) A : न मुह्यति (130) A : यतिस्थानम् (131) A : ⁰कृतं (132) A : धिर्मम मोक्षवर्म ; M : धीर्मम पक्ष्मवर्त्म (133) M : युज्यते (134) A : तनुविशति हरिणि ; S : तदु निविशति हरिणी (135) M : काननमुद्धृतामृषभगज-विलसितम् ; S : काननधूर्तरागमृषभगजविलसितम् (136) A : यदभिमतं ; M : यदपि मतं (137) M : सकलसुभानुभवेन ; S : विफलसुखानुभवेन (138) S : नवैश्च ; A : नवैः (139) A : ⁰महिसरणै : (140) M omits the second half of the verse. (141) M : इदमेव (142) A : वारिणीति ;M : वारुणी (143) A : नसमरनलगाः (144) A : यतिस्थानम् (145)M : हरिणीसुखम् (146) A : हरिणीर्भुवः ; M : हरिणीभुवः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मदनहरिणीस्तन्वङ्गीर्वा[147] करोतु सखीः[148] स्त्रियः
सततमथ वा मुक्तिं याचे महाहरिणी हरेः[149] ॥

इह यदि लघवः षट् पूर्वं स्यु[150]स्तदा ललितं धृतौ। यदि च दशकाद्गोऽन्योऽपि सा धृतौ हरिणीपदम् ॥[151]

॥ ७ ॥ पृथ्वी ज्सौ ज्सौ य्लौ ग्वसुनवकौ[152] ॥ १६ ॥

जसौ द्विकौ यलगाश्च पृथ्वी। अष्टौ नव च यतिः[153]—
नृपोऽपि शयने क्वचित् [89] स्वपिति तण्डुलप्रस्थभुक्
परोऽपि लभते सदा फलमिदं कथञ्चिज्जनः।
वृथैव[154] मनुते नृपः सहजलाशयैः सप्तभिः
वधूमिव कुलोद्भवामनुभवामि[155] पृथ्वीमिति ॥

॥ ७ ॥ वंशपत्रपतितं भ्रौ न्भौ न्लौ ग्दिग्पयः ॥ १७ ॥

भरनभनलगा वंशपत्रपतितम्। दश सप्त च यतिः[156]—
सत्सु सतत्त्ववुद्धिरुदिता मन उपशमनी
क्षुद्रनदादिकेषु[157] यदि सा वहु मुखरयति[158]।
जात्यमणिष्वविक्रियमियं[159] जगदपि विशति
क्ष्माचित[160]वंशपत्रपतितं कृशमपि[161] नदति[162] ॥

॥ ७ ॥ मन्दाक्रान्ता म्भौ न्तौ त्गौ ग् समुद्रर्तुस्वराः ॥ १८ ॥

मभनास्तौ च[163] द्वौ गौ च मन्द्राक्रान्ता। चत्वारः षट् सप्त च[164] यतिः[165]—
अत्याक्रामेत् सुजनशतकं वल्लभां स्वामिव स्त्री[166]
मन्दाक्रान्ता न हि रसकरी शोभनाऽपीन्दुयष्टिः।

(147) A : ०स्तदङ्गीर्वा (148) A : सखी ; M & S : सुखो (149) M : सततमथ चामोक्षं या चैन्महाहरिणी हरेः ; S : सततमथ च मूल्यं याचे महाहरिवो हरेः (150) M : सा (151) A : यदिह दशकाद्गोऽन्यो हि स्या तदा धृतौ हरिणापदम्। हरिणः हरितवर्णः। M : यदि च दर्शनात् गोन्योपि सा धृतो हरिं त्रिपदम्। S : यदि च दशमाद्गोऽन्यो धृतौ हरिणीपदं नाम वृत्तम। (152) A : ०सुनवकम् (153) A : अष्टौ नव च यतिस्थानम् ; M : अष्टनवकौ च यतिस्थानम् (154) A : वृधेव (155) A : कुलोद्भवामि (haplology) (156) A & M : यतिस्थानम् (157) A : जुन...टिटिकेषु (158) A : बहुषु वरयति (159) M : ०मणीष्वविक्रयमिदं ; A : ०मणिष्वतिक्रियमिदं (160) M : चित्रित (161) M : भृशमपि ; S : बृषमपि (162) A : न दहति (163) A omits च (164) M : चत्वारः सप्त षट् च (165) A & M : यतिस्थानम् (166) A : अत्याक्रामेत् सुजनशतकं वल्लभां स्वमिव स्त्रीं ; M : अत्याक्रामेत्युदनसदृशं वल्लभं स्वामिवस्त्रम् ; S : अत्याक्रामेत् सुजनसुदृशं वल्लभं स्वामवस्थां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नैवाक्रामेत् खलपरिषदं वारमुख्यामिव स्त्रीं
मन्दाक्रान्ताऽप्युरगवनिता युद्धवत्येव भीत्यै ॥

अष्ट्यामेषा मदनललिता त्सौ[167] चेद्दशकात् । भाराक्रान्ता भवति दशकाद्यदा तगणौ गुरु च कुर्यात्[168] । षट् चेल्लघव इह तदा स्याद्धृतौ चन्द्रलेखा ॥

॥ ७ ॥ शिखरिणी य्मौ न्सौ भ्लौ गृतुरुद्राः ॥ १६ ॥

यमनसभलगाः शिखरिणी । षड्केकादश च[169] यतिः[170]—

अपत्यं वा भव्यं द्रविणमथ[171] वा स्यादुपचितं
वधूर्वा चार्वङ्गी[172] यदि वसतु गेहेऽपि पुरुषः[173] ।
न चेत् सर्वं हित्वा[174] व्रजतु[175] वनमुग्राय तपसे
कथं भुङ्क्ते नाज्यं न दधि न च मृष्टां शिखरिणीम्[176] ॥

धृतौ तु क्रीडेयं यदि तसगणौ द्वौ द्वादशात्[177] ।

अपि च ।[178] नजभा जौ द्वौ लगौ च[179] नर्कुटकम्[180]—

निवसतु [90] नाम वेश्मनि कथञ्चिदयं पुरुषो
यदि रतिमूलयौवनवती[181] वनिताऽस्ति गृहे ।
अथ तु न सा न तद्गृहमवेहि गृहाह्वयकं[182]
न खलु सुखं सुखाह्वयपदं गतनर्कुटकम्[183] ॥

यतिरिह सप्त षट् जलधिजा यदि कोकिलकम्[184] ॥ अथ धृतौ—

॥ ७ ॥ कुसुमितलतावेल्लिता म्तौ न्यौ याविन्द्रियर्तुस्वराः ॥ २० ॥

मतना याश्च[185] त्रयः कुसुमितलतावेल्लिता । पञ्च षट् सप्त च यतिः[186]—

एषा प्राक् तावत्[187] कुसुमितलतावेल्लिता चञ्चरीकै-
रस्यां मातङ्गाः पुनरपि कटात्तर्पयन्त्यैव भृङ्गान्[188] ।

(167) A : स्यात् म्लौ ; M : न्सौ (168) A : दशकाद्यथा जगणो गुरुः तुर्यात् ; M : दशकाद्यदा मगणौ गुरु कुर्यात् ; S : दशमाद्यदा...(169) M : षट् च एकादश च (170) A & M : यतिस्थानम् (171) A : सुबहुवसु ; S : सुवनवसो (172) A : चापुङ्ग (173) A : गेहे तु पुरुषः ; M : गेहे विपुरुषः (174) A : त्यक्त्वा (175) M : विशतु S : वसतु (176) A : भुक्तेनाज्यं न दधि च मृष्टा शिखरिणी ; (177) A : द्वादशपरे ; M : द्वादशपरौ (178) M drops अपि च (179) A drops च (180) M : नत्कुटकम् (181) A : कुलयौवती (182) A : अध तु न सा नु तद्गृहवैहि गृहाद्वयकं ; M : अथ नहि न तद्गृहम-वेति गृहाधनकम् ; S : अथ तु न सा न तु गृहमवेहि गुहाह्वयकं (183) M : नत्कुटकम् (184) A reads : इदमेव सप्तसु षट्सु चतुर्षु च यतिश्चेत् कोकिलकम् ; M : कोकिलम् (185) M drops च (186) A & M : यतिस्थानम् (187) M : एषां प्राक् स्तवत् (188) A : कटात्तर्पयन्ति भृङ्गान् ; M : कटां गर्वयन्त्यैव शृङ्गान् ; S : कटान्तर्पयत्येव भृङ्गान्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एतां[189] गन्धार्थे दिशि दिशि भृशं लोलयन्ति प्रवाता[190]
नूनं भव्यत्वं चपलमनसां सन्निधौ[191] दुःखहेतुः ॥

इहान्योऽ[192]न्त्यादौ चेल्लघुरतिधृतौ मेघविस्फूर्जितं[193] स्याद्रम्भा वा सुवृत्ता वा। षट् चेत् पञ्चभ्यो लघव इह तदा पुष्पदामातिधृत्याम्। प्रकारौ द्वावेतौ[194] यदि युगपदमु[195] विद्धि शोभां[196] कृतिस्थाम्। अपि च। नसौ[197] मौ द्वौ यौ चानङ्गलेखा—

जड[198]जन हृदि प्रागेवासद्यां[199] हारिभिर्भाविभेदै-
श्चिरपरिचिता न्यस्यत्येपोर्व्यामङ्गनाऽनङ्गलेखाम्[200]।
पुनरपि च तां निष्पीतां कृत्वा[201] मन्मथं वर्णयन्तः[202]
कठिनहृदयाः[203] कानेते लोकान् काव्यकारा[204] व्रजन्ति ॥

षट् पञ्च सप्त च यतिः[205]। अथातिधृतौ[206]—

॥ ७ ॥ शार्दूलविक्रीडितं म्सौ ज्सौ तौ गादित्यर्षयः ॥ २१ ॥

मसजसाः तौ द्वौ गश्च शार्दूलविक्रीडितम्। द्वादश सप्त च यतिः[207]—

मन्ये धन्यजनस्य कौशलमिदं यद्धर्ममध्वंसयत्[208]
कृत्वा स्निग्धविदग्धविभ्रमरसश्लाघ्याः[209] सखीर्वाग्मिनीः[210]।
वैदग्ध्यं मकरध्वजस्य[211] भजते[212] हर्म्यस्थलेऽभ्रंलिहे
शैले[213] वा मृगशीलमिच्छति विना[214] शार्दूलविक्रीडितम् ॥

इदमेव कृतौ[215] यदि लोऽन्यो[216] वीतगो[217] मुखतो लघुश्च[218] मुखजो मत्तेभविक्रीडितम्[219]।

[91] अपि च। ज्सौ त्रिशो[220] गश्च रतिलीला[221]—

यदा खलजनो[222] गदोद्यतकरं[223] निशामयति[224] मृत्युं
गतश्च नरकं विकर्मजफलं[225] विपत्तिशतशाली[226]।

(189) M : एतान् (190) A : प्रवातां M : पुरा ताः (191) A : चपलजनतासन्निधौ ; S : चपलमनः सन्निधौ (192) M : drops अन्यो (193) A : मेघविस्फूर्जता ; M : मेघविस्फार्जितं (194) M : प्रकरणाद्द्वावेतौ (195) A : पदममुं ; M : युगपदिमां ; S : यद्यमुं (196) A : शौनां (197) M : नौ (198) M : जल° (199) M : प्रागेवा सन्ध्यां (200) A : °श्चिरदिरवाता न्यभ्येत्येषोर्वीमङ्गनानङ्गलेखाम् ; M : °श्चिरपरिचिता न्यस्यत्येषोर्वीमङ्गनाऽङ्गलेखाम् (201) A : निष्पताकं तु ; M : निष्पत्राकृत्या ; S : निष्पताकृत्वा (202) A & S : वर्धयन्तः (203) A : कलिणहृदयाः (204) A : लकावलिका ; M : लोकान् काव्यकारान् (205) A & M : यतिस्थानं (206) M : अथातिधृत्याम् (207) A & M : यतिस्थानं (208) M : वृद्धाघविध्वंसि यत् ; S : यद्धाघमध्वंसयत् (209) A : श्राव्याः ; M : श्लाघ्या (210) A : सखी वाणिनः (211) M : मकरध्वजाय (212) M : भवते ; S : भवति (213) M : शेते (214) A : मृगशीलमिच्छतिना (215) A : इदमवकृतौ (216) A : विलोऽन्याः ; M : तोऽन्यो (217) A drops the word ; M : विनतो; S : विलगो (218) M : लिवश्च ; S : लवश्च (219) A : मत्तेभविक्रीतम् (220) M : अपि चासौ लृ तौ ; S : अपि च। जसौ तृणौ (221) A : गश्चातिलीला ; M : गश्चरती लीला ; S : गश्च ते लीला (222) A : खलुजनो (223) M : गदोद्यभकरं (224) M : विलोकयति (225) A : परश्च नरकेऽपि कर्मजफलं ; M : गतं च न के विकर्मफलजं (226) A : विपत्तिशतशाखि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तदाऽशनमपि त्यजेदतिभयाज्जनः[227] किमुत हेयां[228]
परस्य महतो जनस्य वनितास्वनित्यरतिलीलाम् ।।

अथ कृतौ[229]—

।। ७ ।। कृतिः ।। २२ ।।

कृतिरित्यधिक्रियते[230] । [231]कृतिग्रहणमुत्तरार्थम् । वक्ष्यते[232] ग्लिति वृत्तमिति (7/24) तत्र विंशतेरक्षराणां ग्रहणार्थम्[233] । अत्र पूर्वापरपादार्धवशात्[234] संख्यानियमो नाश्रीयत इत्युक्तम् ।।

।। ७ ।। सुवदना म्रौ भ्नौ य्भौ ल्गौ स्वरर्षिरसाः ।। २३ ।।

मरभनयभलगाः सुवदना । द्वौ सप्तकौ षट्कश्च यतिः[235]—

न्यस्तार्थैपूत्तमा धीर्गुरुषु[236] लघुषु वा तिष्ठत्यनलसा[237]
तिष्ठन्त्येवाग्रपादे[238] शिरसि च लसिता[239]न्यस्ता [240]सुमनसः ।
शक्यं वा दुष्करं वा तनुरपि कुरुते[241] कार्यं गुणवती[242]
स्वामित्वं[243] प्रेष्यतां वा [244]व्रजति वरवधूर्भर्तुः[245] सुवदना ।।

।। ७ ।। ग्लिति वृत्तम् ।। २४ ।।

गुरुर्लघुर्गुरुर्लघुरित्यावृत्त्या[246] वृत्तं नाम वृत्तम्—

मृद्वनल्पशिल्पतल्परम्यहर्म्यमावसाथ[247] वा तपस्य
नव्यगव्यशालिशालिभक्तभुक्तिमाचराथ[248] वा तपस्य ।
कामकालकान्तकार्यकारि[249]कामिनीं व्रजाथ वा तपस्य[250]
वित्तमप्रमत्तमुत्तमं[251] समाजयाथ[252] वाऽऽर्यवृत्तमेव ।।

(227) M : त्यजेदपि भजानकः (228) A : किमचूर्ण्यं ; M : किमु रुहे या (229) M reads *sūtras* 22 & 23 together as a single *sūtra.* (230) A drops this sentence. M adds after this the *vṛtti* on *suvadanā* and then continues the *bhāṣya* on *kṛtiḥ.* (231) A adds अत्र here. (232) A & S : वक्ष्यति (233) M : ग्रहणार्थः (234) A : ⁰पदार्थवशात् ; S : पूर्वाधिर्थि वशात् (235) A & M : यतिस्थानम् (236) A : न्यस्तार्धेपूत्तमादी⁰ ; M : शक्तार्थेपून्तमाधि (237) M : तिष्ठत्यानलसया ; S : तिष्ठत्यलसया (238) M : तिष्ठन्तैवाश्रवादेः (239) A : हृषिता ; M : लषिता ; S : लभिता (240) A & M : न्यस्ताः (241) M : तदनु नाकुरुते ; S : तनुरधिकुरुते (242) A & M : गुणवति (243) M प्राधान्यं ; S : स्वाधर्म्यं (244) A drops वा (245) A : परवधूर्भर्तुः; M : वरवधूदत्तं ; S : वरवधूदानुं (246) A : व्यावृत्त्या ; M adds वृत्त्यावृत्तौ (247) A : ⁰मावसाद ; M : ⁰मावसाय (248) A : नव्यगव्यशालिभक्तभुक्तिमाचराद ; M : माचराध (249) M : ⁰कार्यकार्य ; S : कार्यकार (250) A : प्रजा धवतपस्य ; M : व्रजातथवा तपस्य (251) M : वित्तमप्रमत्त उत्तमं (252) M : समां जयाथ ; S : समाजयेत

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अपि च। नो मौ द्वौ मः सौ[253] लगौ चोज्ज्वलं[254] मुद्रा वा—

प्रकृतयस्त्रिगुणा[255] महदाद्याः सप्त तथा[256] गुणसंहति-
विकृतयोऽपि च[257] षोडश तासां चेतयिता दृशिरुज्ज्वलः[258]।
विकृतयोऽवयवाश्च यदीयाः[259] सर्वं इमे तमिमं[260] हरिं
विदुरिति श्रुतिनिर्णय[261] [92]-मुद्रावश्रयसंकथितं[262] पदम् ॥

एकादश नव च यतिः[263]। अथ प्रकृतौ—

॥ ७ ॥ स्रग्धरा म्रौ भ्नौ यौ यस्त्रिसप्तकाः ॥ २५ ॥

मरमना याश्च त्रयः[264] स्रग्धरा। त्रयः सप्तका यतिः[265]—

पश्यन्तीमे बधूनां कृशतरमुदरं तासु मोग्यस्य[266] कार्श्यं[267]
व्यूढं[268] पश्यन्ति तासां स्तनघनजघनं देहदुःखं प्रवृद्धम्[269]।
भ्रूभङ्गापाङ्गदृष्टिस्मितभुजविकृतीर्विभ्रमानाहुरासां[270]
न स्वप्नावाप्तलक्ष्मी[271]तरलतरवधू[272]स्रग्धरावस्त्रभोगान्[273] ॥

सप्तभ्यः पञ्चवर्णा लघव इह[274] चेच्चित्रमाला कृतौ स्यात्। प्रथमादन्यो[275] लघुश्च प्रथम इह महा-स्रग्धरेत्याकृतौ स्यात्। लघुयुग्मं वाऽन्ययदि[276] स्यात् प्रथम इह[277] तदा स्यात् पताका विकृत्याम्[278]।

अपि च। नजमा जास्त्रयो रश्च सिद्धिका वा[279] चित्रलता वा शशिवदना वा रुचिरा वा—

अफलयुतां[280] पुरीं श्रयति[281]न त्वटवीं[282] सुफलार्थसिद्धिकां[283]
स्त्रियमपि निन्द्य[284]पुष्पबहुलां न तु चित्रलतां सुपुष्पिताम्[285]।
शशिवदना बधूरिति च यन्मनुते तदपीष्यते मुधा
यत उरुचन्द्रकान्तमुखरागिशुभा[286] रुचिरा वनस्थली ॥

(253) M adds: द्वौ (254) M: लगोज्ज्वलं (255) A: प्रकृतं यस्त्रिगुणाः (256) A drops तथा (257) A drops च (258) A: ते दयिता दृशोरुज्जूलः ; M: चेतधि तादृशिरुज्ज्वलः ; S: चेतदिता दृशिरुज्ज्वलं (259) M: विकृतावयवश्च तदीयाः (260) M: तदिमं (261) M: द्र तिनीरस° (262) A: मुद्रासंकथितं ; M: मुद्राय संग्रथितं ; S: मुद्राविस्मयसकरितं (263) A: यतिस्थानम् ; M reads: एकादशसु नवसु च यतिः (264) A: त्रयो यः (265) A: यतिस्थानानि (266) A: नाशुभोऽङ्गस्य (267) M: कार्यं (268) M: वृद्धं ; S: वुद्धं (269) M: नेह दुःखस्य वृद्धिम् (270) M: भ्रूभङ्गापाङ्गदृष्टि-स्मितभुजविकृतिर्विभ्रमानां हरसाम् (271-72) M: स्वपघनवनिता (273) M: °भोगाः ; S: °भोगातें (274) M drops the lines following this, due to haplology and begins after in. 277 (275) A: प्राथम्येऽन्यो (276) A: वाऽन्यन्यदि ; S: वाणिन्यपि (278) A: अवकृत्याम् ; M: अभिकृत्याम् (279) A drops वा (280) M: अफलतां ; S: अफलयतां (281) M: परिश्रयति (282) A: क्वटवी ; M: कदलीं (283) A: सुफलार्धसिद्धि (284) M & S: नित्य (285) A: सुपुष्पिकां (286) M: °मुखलशुभा ; S: मुखरागशोभा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अत्रैव तृतीयगणस्य षष्ठस्य[287] च विपर्यासे वनमञ्जरी[288]। इहैव यदि लघुरन्तिमोऽथ जलगाश्चोत्कृतौ[289]सुधाकलशः। चतुर्दश द्वादश च यतिः॥

अथाकृतौ[290]—

॥ ७ ॥ मद्रकं भ्रौ न्रौ न्रौ न्गौ दिगादित्याः ॥ २६ ॥

भरौ नरौ द्विकौ नगौ च मद्रकम्[291]। दश द्वादश[292] च यतिः[293]—

पञ्चषभूम[294]हर्म्यमुरुभिर्महार्ह[295]तलिमैश्चितं वसतये[296]
चन्दनमण्डना[297]स्तनुरुहाः स्रजः सुवसनानि[298] चाङ्गरुचये।
प्राणसमा समन्वितगुणा समाङ्गरुचिरा वधूश्च रतये[299]
स्याद्यदि किन्तु[300] मद्रकमयं पुमान् वहति किन्तु चञ्चलमिदम्॥

मद्रक[301]शब्दो गीतिविशेषे[302] हर्षे च। अपि च। मौ द्वौ रः साश्चत्वारो गुरुश्चर्च्चगतिः[303]—

स्वप्नगतेन[304] जनेन साधितराज्यफलं न फलं[305] ह्यदृढत्वा-
देवमिहापि सुखं[306] शुभं न [93] मतं विषयेषु भवं[307] क्षणिकत्वात्।
यच्च[308]जनः स्थिरमेव[309] किञ्चन[310] वस्तु सुखं मनुते मतिमन्द-
स्तस्य च विच्युतिरस्ति नैव विभाव्यत ऋक्षगतिर्दिवि[311] यद्वत्॥

अथ विकृतौ—

॥ ७ ॥ अश्वललितं न्जौ भ्जौ भ्जौ भ्लौ ग्रुद्रादित्याः ॥ २७ ॥

नजौ भजौ द्विकौ भलगाश्चाश्वललितम्। एकादश द्वादश च यतिः[312]—

नव दश[313] वाऽष्ट वाऽपि शुभदा अजासु दशना[314]न सप्तदशनाः
श्रवणयुगं प्रलम्बि शुभदं गलश्च[315] मणिलः[316] पृषन्ति च[317] गले।
शुभमणिकं[318] ललामरुचिरं[319] पराश्वललितक्रमश्च गमनं
तत इह लक्षणं[320] पशुषु च[321] स्थितं न नृपु ते च[322] केचन[323] गुणाः[324]॥

(287) A drops षष्ठस्य (288) A : जलगाश्च यथामृत उत्कृतौ ; खलु ; M : जलव्यश्च यदा तत्कृतौ (289) M : विपर्यासेन मञ्जरी (290) A & M : भद्रकं (291) A : च मुद्रकं ; M : भद्रकं (292) M drops द्वादश च (293) A : यतिस्थानम् (294) A : पञ्चपभ्रम ; M : पञ्चकभूम (295) M : ॰विमार्ग॰ (296) A : ॰श्वित वसतये ; M : ॰श्वातं वस्तयेव ; S : ॰श्वतवसतयः (297) A : चन्दगुमण्डला ; M : तनुरुहमण्डला (298) A : भ्रमणाय स्रजः सुस्व- नानि ; M : भम एधस्पृजः सुवसनानि (299) A : रतम् ये (300) A : स्याद्यदि भिन्न॰ ; M : स्याद्यति किन्नि (301) M : भद्रक॰ (302) A : नीतिभेदे ; S : गीतिवेदे (303) A : ज··· गतिः ; M : कर्पगतिः ; S : कर्पगीतिः (304) A : स्वप्ने गतेन (305) A : साधितरान्यफलं फलं (306) A : म्रुख ; S : शुभं (307) A : भवत॰ (308) M : क्षणिकत्वाद्यच्च without the *ardhaccheda.* (309) A : जनास्थिरमेव ; M : जनस्थिरमेव (310) A & M : किं च न (311) A : रुक्षगतिः (312) A : यतिस्थानम् ; M : एकादशे द्वादशे (313) M : नव शदश दश (314) A : दर्शना (315) A : गदश्च ; S : गरश्च (316) M & S : मणल (317) A : पृषति च ; M : पृषंति च (318) A : शुभमलिकं (319) A : ललाम रुचिर (320) A : लक्षण (321) M & S drop च (322) M : ते न ; S : ताश्च (323) M : कश्चन (324) M : गुणः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ७ ॥ मत्ताक्रीड़ा मौ त्नौ[325] नौ[326] न्लौ[327] ग्वसुपञ्चदशकौ ॥ २८ ॥

मौ द्वौ तो[328] नाश्चत्वारो लगौ[329] मत्ताक्रीड़ा। अष्टौ पञ्चदश[330] च यतिः[331]। अष्टावष्ट[332] सप्त चेत्यन्ये[333]—

तन्त्रीमिश्रं गीतं रामा विदधति निशि निशि कतिपयसमयं[334]
नृत्यत्यन्या[335] तन्वी[336] वल्गन्मणिततितडिदिव[337] कतिपयसमयम्।
अन्या मत्ता क्रीड़ादक्षा[338] रमयति रतिरिव कतिपयसमयं
धन्यः कोऽस्मादित्यौत्सुक्यं विषयिषु विजहिहि विषमिव विषयान्[339] ॥

अपि च। तो जाः षट् लघुर्गुरुश्च शङ्खः—

यद्यप्यमरोऽ[340]मृतपानवशादुपयाति तथाऽपि पुमान् मरणं
यद्यप्यबला सुरलोकभवा कुशरीरमथाऽपि विनिन्द्यतमम्[341]।
यद्यप्यरुजा मनुजाश्च जिताः[342] परलोकसुखाय तथाऽपि न ते[343]
शङ्खोऽपि निधिर्यदि नाम वशे[344] भवति क्षुदथाऽपि[345] नृणां समये ॥

एकादशसु च यतिः[346]। पुर इह नो यदि हंसगति[347]स्तरुणीदयितश्च[348] महत्यपरम्[349] ॥

अथ संकृतौ[350]—

॥ ७ ॥ तन्वी भ्तौ न्सौ भौ न्यौ द्विरादित्याः ॥ २९ ॥

[94] भतनसा भौ द्वौ नयौ च[351] तन्वी। द्वौ द्वादशकौ यतिस्थानम्। पञ्च सप्त द्विषट्केत्यन्ये[352]—

सद्धितवाणी[353] विदुरतिमधुरां[354] स्वादुरसामिव रसगुणयोगात्
सा[355] शुभमर्थं निवहति बहुलं श्रीरिव वारिधि[356] पयसि विशाला।
वर्णविशेषैः कृतशुभरचना चित्रवधूरिव समभुवि तन्वी
क्वापि च तत्त्वं[357]विमृशति यदि सा सर्वजनैरपि भवति निषेव्या ॥

(325) M : सौ (326) M drops नौ (327) M : स्लौ (328) A : तौ ; M : लाश्च (329) M adds च ; S adds तु (330) A : पञ्चदशकं (331) A & M : यतिस्थानम् (332) A : अष्टावष्टौ ; M : अष्टकौ द्वौ (333) A : सप्त चेति वा ; M : सप्तकश्चेत्यन्ये (334) A : तन्त्रीमिश्रं मीनं कामी विदधति शिमिशि कतिपयदिवसं ; M : श्राव्यं गीतं बाला रामा…… ; S : तन्तु मिश्रं गीतं वामा विहरति निशि दिशि…… (335) M : नृत्यन्त्यन्या (336) A : तद्धि S : तर्हि (337) A : वल्गमणिततटिद्गव ; S : वश्गमणितततटिनिव (338) M : अन्या मत्ता क्षा (339) M : विषमान् (340) M : यद्यमरो (341) M : विनिन्द्यमतम् (342) M : मनुजाश्च भिकाः (343) M : परलोकशुभाय न ते ; S : परलोकशुभाय भवति न ते (344) M : वशो (345) A : क्षुदधापि ; M : क्षुत्तथापि (346) A : एकादश द्वादश च यतिस्थानम् (347) A : हेस……ति (348) M : दधितश्च (349) A : समत्वपरम् ; M : समञ्चपरं ; S : महं तपरम् (350) M : सकृतौ (351) M drops च (352) A : षट् चेत्यन्ये (353) A : सदितदिवाणीं ; S : सद्विनराणीं (354) A : वितरति मधुरा° (355) M drops सा ; S : चाशुभमर्थं (356) A : नारी यतो यदि (357) A : तद्वां ; S : तद्धि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अपि च। भयौ गणौ चतुष्कौ मणिमाला—

श्रुत्यवनतोरुप्रेषणसुदक्षां[358] संहतनितम्वां प्राप्य[359] भुवमिष्टा-
मात्म[360]भुवमन्तः साधु विदधानो[361] योगकृतसङ्गां[362] प्राप्य बलयोगैः[363] ।
मानबलगुर्वीं[364] नित्यविजनस्थां संयमितहिक्कां[365] कराठमणिमालां[366]
तत्त्वमिति नार्याः[367] प्राप्तपरिकृष्टा[368] योषितमनार्याः प्राप्तपरिकृष्टाः[369] ॥

षट्सु षट्सु यतिः[370]। अथाभिकृतौ—

॥ ७ ॥ क्रौञ्चपदा भ्मौ स्भौ नौ नौ ग्भूतेन्द्रियवस्वृषयः ॥ ३० ॥

भमसभा नाश्चत्वारो गुरुश्च क्रौञ्चपदा। पञ्चकौ द्वावष्टकः सप्तकश्च यतिः[371] —

पुरायनदीनां[372] सैकतभूमिर्घनतरुविगलितपरिमलकुसुमा[373]
पुष्पविचित्रा स्वादुफलाढ्या[374] विघटितसरसिजदलजलपवना।
योजनगन्धाऽभ्यंगनिसृष्टा[375] सुतरसनवमधुरवनतसुफला[376]
क्रौञ्चपदाङ्का[377] हंसगणाढ्या[378] प्रथयति[379] कथमिव विरहिणमधिकम्[380] ॥

अपि च। रसौ जाः[381] षड् गुरुश्च कुमुद्वती—

पश्य[382]लोक[383]विपर्ययं यदचराड[384]रुचावुदयत्यविख[385]रिाडतमराडले
वर्धते[386] नितरामयं[387] जलधि[388]र्विरही तु जनो[389] नितरां परिशुष्यति[390]।
ताप[391]मर्कमरीचिजं विजहाति जनो विरही तु[392] पुनः परितप्यते
चिन्तया[393]विरहातुरा जनता[394]परिकृश्यति[395]हृष्यति सा तु[396] कुमुद्वती[397] ॥

अथोत्कृतौ—

(358) A : प्रेक्षणसदक्षां ; M : ⁰प्रेषणरसदक्षा ; S : शृणोत्यवनतोरुप्रेषणदक्षां (359) A : ⁰नितंवप्राप्त ; M : ⁰नितम्वप्रान्त ; S : ⁰नितम्वं प्राप्त (360) M : मात्र⁰ (361) A : विदधातिनो (362) M : योगकृतसाङ्गां (363) A : प्राप्तमयोगैः M : प्राप्तवनयोगै (364) A : मानलघुगुर्वीं (365) M : सा यदि नवश्री⁰ ; S : संयतिर्नहिद्धां (366) A & M : कण्ठमणिमाला (367) M : तत्त्वमणिरय्याः (368) M : प्राप्तमणिकृष्टाः ; S : प्राप्य परिकृष्टा (369) A drops the last word of the verse ; S : परिनष्टाः (370) A : यतिस्थानम् (371) A : यतिस्थानम् (372) M : पुण्यनदी⁰ (373) S : कुसुम परिमला (374) A : स्वादुजलाढ्या (375) A : ⁰धङ्गनिसृष्टा ; M : योषितगन्धा संघनिसृष्टा ; S : योजि न गन्धा (376) A : सुतरसनवमधुरविनतसुफला ; M : सृतरसनवमधुरनततरुफला (377) A : क्रौञ्चपदाङ्कौ ; M : क्रौञ्चपदा का (378) A : हंसगणाद्या (379) A : द्यदायति (380) A : विरहिणा-मभिकम् ; S : विरहिणवभिकम् (381) M : भौ (382) A : वश्य (383) M : कोक⁰ ; S : तोक⁰ (384) A : यद्यण्ड⁰ (385) A : °त्यपख (386) M & S : वर्धयते (387) M : नितरामियं (388) M : जयि⁰ ; S : जतदि⁰ (389) A : विरहितजनो ; M : विरभिरभिकृजनो ; S : विरही स जनो (390) M : परिकृश्यतु (391) A : तमकर्म⁰ ; S : तपोकर्म⁰ (392) A drops तु (393) S : चिलया (394) M : जलता (395) A : परिक्लिश्यति ; M : परिशुष्यति (396) A : साधु ; M drops तु (397) A : कुद्वती

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ७ ॥ भुजङ्गविजृम्भितं मौ त्नौ नौ सौं लगौ[398] वसुरुद्रर्षयः ॥ ३१ ॥

मौ द्वौ तो नास्त्रयो रसलगाश्च[399] भुजङ्गविजृम्भितम्। अष्टावेकादश सप्त च यतिः[400]—

[95] जह्यादग्रे[401] क्रोधव्याधिं व्यसनदुरितशतशरणं[402] शरीरविशोषणं[403]
कृत्याकृत्यज्ञानास्थानं[404] निरवधि[405] परिभवविधिना कृतार्थमहर्निशम्।
दूरे जह्यात् क्रोधाविष्ट'[406]भ्रुकुटि[407]कुटिलविकृत[408]मुखं विलोहित[409]लोचनं
जह्याद्रोषश्वासप्रोष[410]प्रकटितपृथुफणिफणकं[411] भुजङ्गविजृम्भितम्॥

॥ ७ ॥ अपवाहं म्नौ नौ नौ न्सौ गौ नवर्तुरसेन्द्रियाणि ॥ ३२ ॥

मो नाः षट् सो[412]गौ च द्वावपवाहम्। नव[413] षट्कौ द्वौ पञ्च[414] च यतिः[415]—

कान्तारेषु तटभुवि[416]विटपिषु[417] रिपुषु पटुषु सखिषु कनके[418] लोष्ट्रे[419]
निन्दायां स्तवनवचसि सुख उदयति[420] बहुविपदि च[121] समदृष्टिः सन्।
आत्मानं परममजनमजरममरमभयमगुणम[422]भिसन्ध्याय[423]-
न्निर्वाणं व्रजति[424] परममथ[425] गमयति[426] भवजल[427]निधिमपवाहञ्च॥

अपि च। ना अष्टौ गौ च द्वौ वनलतिका[428]। अष्टकौ द्वौ[429] दशकश्च यतिः[430]—

इति किल वृषविधिधनविधिरति[431]विधिभवनिरसन[432] विषयोऽमी
क्रमश इह जगति बहुविधमखशतमलमु[433]पशमयितुमुक्ताः।
क्षणमपि यदि जन इह कृतमति[434]रयमथ भवति फलवती[435] वाग्-
निलयनपदमुरु वनगततरुरिव बहुफलवनलतिकानाम्[436]॥

(398) A does not read the गण्स (lacuna) ; M : मौ मतौ° (399) M : रनलगाश्च (400) A : यति-स्थानम् (401) S : जन्यादङ्गे (402) A: व्यसने; M : किलकरमघशतं ; S : वलनकरिणशतशारणं (403) A : विपूल्वणं ; M : विशेषणं (404) A : कृत्याकृत्याज्ञानस्थानं ; M : कृत्याकृत्यज्ञान-स्थानं (405) A : परवध (406) M : भृकुटि (407) A : °कुटिल (408) M : °विकट ; S : °विकर (409) A : विरुक्ष° (410) A : रोष तु श्वासेनैव प्रोषत् ; M : द्रोषश्वासप्रोष...... ; S : रोषश्वासेन प्रोषत् (411) A : पृथुपणफलकं 412) A & M : सौ (413) A : अपवाहकः। नवकः ; M: अपवाहकः नव (414) A : पञ्चकश्च (415) A : यतिस्थानानि (416) A : कभुवि ; M : कठभुवि ; S : कटभुवि (417) A & M : पटुषु ; S : विपटुषु (418) A : कनक ; M : जनके (419) A : लोष्ट ; M : लोष्टे (420) A : सवनवच सिखमुदयति (421) M drops च (422) A : निमजनिमजरममरमभयमगुणम् ; M & S : नमजरर्मुरमभयमगणम् (423) S : °मभिसन्धान (424) A : व्रतजति (425) M : परमथ ; S : परमधः (426) M : गणयति (427) A : भुव° (428) A : द्वावनलतिका ; M : द्वौ वनतिलका (429) A : अष्टौ नगणा गुरू द्वौ (430) A : यतिस्थानानि (431) A repeats धनविधि thrice ; M : °रिति (432) A & S : भवति रसन° (433) M reads अलं after उपशमयितुं (434) M : कृतरति (435) A : फलतति ; M : फलवली (436) M & S : वनतिलकानाम्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[437]इदमुत्कृतौ द्विगुर्वन्तं वृत्तम्। एवं शक्कर्यां द्विगुर्वन्तमुपचित्रकमत्यष्टौ[438] मृदुललितपदम्। पञ्चकौ द्वौ सप्त च[439] यतिश्चे[440]त्स्वरितपदं पञ्च द्वादश[441] च चेद्रसुधारा। संकृतौ कुसुमबाणः।

एवं गायत्र्यादिजातय उक्ताः[442]। सम्प्रति दण्डको नाम जातिः[443]—

॥ ७ ॥ दण्डको नौ रः ॥ ३३ ॥

नौ द्वौ रश्च[444] दण्डकाः[445]। रगणाश्च सप्तावराः स्युः। अन्यथाऽतिशक्कर्यादिष्वन्तर्भावात्। तथा हि नौ द्वौ राश्च[446] त्रय इत्यतिशक्कर्यां वितानमेव[447]। चत्वारश्चेद्धृतौ निशा नाम वृत्तं तारका वा। पञ्च राश्चेत् [96] प्रकृतौ लोला[448] नाम। षट् चेत् संकृतौ भृङ्गाब्जं[449] नीलालकं मेघमाला[450] वा। एतस्मात् सप्त राः कार्याः। ते च यथाकामं[451] वर्धनीयाः[452]। वृद्धिश्चासहस्राक्षरा[453]दित्याचार्याः। त्रिकस्य तु गणस्य वृद्धौ[454] सहस्राक्षरत्वं नोपपद्यत इत्येकोनसहस्राक्षरास्ते[455]॥

॥ ७ ॥ प्रथमश्चण्डवृष्टिप्रपातः ॥ ३४ ॥

एषां रगणवृद्धया प्राप्तानां दण्डकानां प्रथमः सप्तभिरेव रैः कृत[457]श्चण्डवृष्टिप्रपातः[458]—

उपनिषदपि नेति नेतीति यं[459] वागतीतं[460] वदत्यन्यधर्मान् पराकुर्वती[461]
भुवनगुरुगुरुं[462] विदुर्यं पुमांसो[463] जगत्सृष्टि[464]रक्षोपसंहारहेतुं[465] परम्।
श्रयति[466] विहितदण्डकस्तं[467] विभुं सर्वभूतान्तरात्मानमीशं[468] चतुर्वर्गदं
